अथ खलु भगवांस्तासां चतसृणां पर्षदां सम्प्रहर्षणार्थं पुनरपीमां प्रज्ञापारमितां परिदापयमानस्तस्यां वेलायां इमा गाथा[] अभाषत ।

वरप्रेम गौरवु प्रसादु उपस्थपित्वा
प्रज्ञप्तिस्य आवरणक्लेशशमना निशान्ताः ।
प्रह्णता जगान्धमभिप्रस्थित शूरकाना
प्रज्ञापारमित यत्र चरन्ति शूरा ॥ इत्यादि ।

Prof. Bendall speaks of a Ratnagunasamcaya (Cam Cat, p 188) which is divided into 32 sections and which applies to Astasāhasrikā, divided into 32 parivarttas It seems that when it applies to Śatasāhasrikā, it is divided into 84 parivarttas, though that work is divided into 72 parivarttas

The Last Colophon —

भगवत्यां रत्नगुणसंचयगाथायां परीन्द्रनापरिवर्तो नाम द्वात्रिंशतितम । गाथा faded ॥ शतसाहस्रिकाया भगवत्या प्रज्ञापारमिताया संचयगाथापरिवर्त्तश्चतुरशीतितमः समाप्त ।

Post Col —ये धर्म्मा इत्यादि ।

महाराजाधिराजश्रीरुद्रदेवस्य राज्ये संवत् २८५ आषाढ पूर्णिमास्यां आदित्यदिने लिखापितमिदं पुस्तकमिति ।

Nanjio in his catalogue, col 197, para 864, speaks of a Prajñāpāramitā-Samcaya-Gāthā translated into Chinese between A D 980—1000 For a Tibetan translation, see Beckh, p 10, para 1

29

9974 **कारण्डव्यूह ।** *Kāranda vyūha*

Substance, unseasoned palm-leaf 15×2 inches Folia, 58, of which foll 54 and 55 are missing Lines, 5, 6 on a page Character, Newari Appearance, soiled Complete Dated N S *713* = A D *1593*

Colophon —आर्य्यकारण्डव्यूह नाम महायानसूत्ररत्नराज समाप्तम् ।

Post-Colophon statement —ये धर्म्मा हेतुप्रभवा, etc, etc

देयधर्म्मोय प्रवरमहायानयायिनां परमोपासक शाक्यवंशचन्द्रज्योतिकस्य

यदत्त पुण्य भवत् भवचार्य्योपाध्यामातापितृपूर्व्वंगम कृत्वा सकलसत्वराशिनुत्तल-ज्ञायफल प्राप्नुयात् ।

राजाधिराजपरमेश्वरपरमभट्टारक श्रीश्रीजयशिवसिंहमल्लदेवविजयराज्यम् ।

दानपतिश्रीकाष्ठमण्डपमहानगरे चैत्यमण्डितोरमञ्जुश्रीनकविहारावस्थित-चनोरपासकवालिभूचन्द्र + + + + + + +
तस्य पुत्री लक्ष्मीमयि द्विचिय पुत्र चन्द्रशातस्य नारिमनिकलक्ष्मी तस्य पुत्र +
+ + + + + ॥ एते शाजमानप्रमुखपरिवारस्य आयु आरोगजयधनलक्ष्मीवृद्धिरस्तु ॥

श्रेयोऽस्तु सम्वत् ७१३ माघमास्य शुक्लपक्ष सप्तम्याया + + +
परिघयोगे गुरुवासरे एतद्दिने प्रतिष्ठा जुरो ।

लिखितेय श्रीकाष्ठमण्डपसयोतारपूर्व्वपार्श्वे तलुमूरमहाविहारावस्थित खण्डचूकलि + + + महायानकुलवज्राचार्य्यश्रीयन्तुया लिखितमिति ।
यथादृष्टस्त तथालिखित etc , etc

+ + + + + + शुभमस्तु सर्व्वजगताम् ।

The work was printed in 1873 in Calcutta by Satyavrata Sāmaśrami in a series of Jaina works

A full description of its contents is to be found in Nep Bud Lit of Rājendralāla, p 95, where it is named Guna-Kāranda-vyūha The full name of the work is Avalokitesvara-Guna-Kāranda-vyūha

See also Bendall's Cam Cat, pp 9, 34, 38, 47, 52, 77 and 174, and my Nep Cat for 1905, p 89, and that for 1915, pp 9, 157 and 207

Translated into Chinese between the years 980—1001 A D (see Nanjio col 181, para 782) and into Tibetan (see Beckh 32A, para 4)

30.

4785 **कारण्डव्यूह ।** *Kāranda vyūha*

Substance, Nepalese paper 11 × 3 inches Folia, 99 Lines, 6 on a page Character Newari Date, N S 773 Appearance, old and pasted Complete

Colophon —आर्य्यकारण्डव्यूह महायानसूत्ररत्नराज समाप्तम् ।

Post-Colophon —

ये धर्म्मा हेतुप्रभवा हेतुन्तेषां तथागतो ह्यवदत् तेषाञ्च यो निरोध एवं वादी महाश्रमण ॥ श्रीयोऽस्तु सवत् ७७३ सम्पूर्ण लिखित थ्राय शुक्लपक्षमि कुन्हु शुभलिखित श्रीवज्राचार्य्यवोध । अ कारणव्यूह श्रीमहाबुद्ध वज्राचार्य्य- यात दानविया शुभो शुभ ।

31

1725 कारण्डव्यूहम् । *Kāraṇḍavyūha*

Substance, unseasoned palm-leaf 13 × 1½ inches. Folia 77, of which foll. 1 of 62, 6 are restorations. Lines, 5 on a page. Character Newari. Date N. S. 525. Appearance old and discoloured. Complete.

The MS appears to have been restored and given away in N. S. 761 as there is a statement to that effect in an extra leaf.

Colophon —आर्य्यकारण्डव्यूह महायानसूत्ररत्नराज समाप्तम् ।

ये धर्म्मा • । श्रेयोऽस्तु ॥ सम्वत् ५२५ माघशुक्लतृतीयायां तिथौ पुनर्व्वसुनक्षत्रे सिद्धियोगे आदित्यवासरे सम्पूर्णदिने । दानपति श्रीललितक्रमाया श्रीमानीग्लस्थाने श्रीपुनेश्वरविहारगन्धाधिवासिन अभयमानभारोकसा पुस्तकमिदं । राजाधिराजपरमेश्वरपरमभट्टारक श्रीश्रीजयस्थितिराजमल्लदेवस्य विजयराज्ये श्रीनेपालमण्डले ॥ लिखितमिदं यपि विहालि + + + रामदत्तेन । शुभ ।

यादृष्टं पुस्तकं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥
शुभमस्तु सर्व्वदा ॥

32

9975 कारण्डव्यूह । *Kāraṇḍavyūha*

Substance, unseasoned palm-leaf 16 × 2 inches. Folia, 96 according to the pagination on the right hand side and 98 according to that on the left

Two leaves 20 and 46 are missing, hence the difference Lines, 5, 4 on a page Character Newari Date, N S 744 (Sāgara-yuga-muni) Appearance, discoloured Complete

Colophon —आर्य्यकारण्डव्यूहं तत्रमहायानसूत्रतन्त्रराज समाप्त ।

Post-Colophon statement —

ये धर्म्मा etc. etc सम्वत् सागरयुगमुनि सम्प्रजाते वैशाख दिवश अत्र दिने अयं ग्रन्थ आरकोविहारावस्थित श्वखिण्डसराचार्य्य सासुतवज्रनाम्ना धर्म्मसिंहदेवेन लिखित इद ग्रन्थ गृहे प्रविष्टमात्रेण ये कत्ता पुरुषस्य वश आयुरारोग्ये कामनार्थं शास्त्रोक्तफलकामनार्थमनेन वाञ्छितसम्पूर्णकारणार्थं अर्च्चयीत्त स्वाध्यायीतव्या । शुभ ।

33.

10746

Substance seasoned palm-leaf 12¼ × 2 inches Folia (by counting) 51 Lines 6 on a page Written in the Bengali character of the latter part of the XIIth century, which well agrees with that of the last photograph of the third plate in Bendall's Cam Cat

It appears that the leaves were much longer than 12¼ inches, because it is clean cut at both the ends, cutting even the writing When the leaves were entire, there seems to have been two holes for the strings, one to the right and one to the left of the centre The leaves have been so cut that the portions of the right-hand holes are still visible and a portion of the blank space round the hole is visible in every leaf Under the circumstances, it is difficult to describe the MS, which has no beginning, no end, no colophons and no leaf marks I have left the leaves as I found them and, to preserve the present arrangement, I have put down, in the blank round the left-hand hole, Bengali numerals from 1—51

That the book is a Buddhist Nyāya tract is apparent

Leaf 1st

Line 1 प्रतिषेध्याभावस्य व्यवहारयोग्यता वस्तुभूतैव प्रदेशस्य साध्यत इति न स्वभावहेतो स्वभावानुपलब्धिर्भिद्यत इति ; यत्त्वनपेक्षितार्थान्तरसमर्ग-प्रतिषेधमात्रमनुपलब्ध —

25A

Line 6 प्रसङ्गात् क्षणिकतायामेव सत्वमिति यत् सत्त्वक्षणिकमेवेति सतो नश्वरात्मतासिद्धेरन्वयव्यतिरेकरूपव्याप्तिसिद्धिरिति । तदेव स्वभावहेतौ तादात्म्यसिद्धि .

42B

Line 4 विष्ट इति सम्बन्धः । अयञ्च पक्षः किल दिङ्नागाचार्य्यस्यापि अभिमत इति परो दर्शयितुमाह । यथाह दिङ्नागाचार्य्यः किमाह यदा तर्ह्यित्यादि । श्रावणत्वस्य न चा

Line 5 अभ्युपगच्छति तदाय श्रावणत्वलक्षणतः पक्षधर्म्मो हेतुरेव स्यात् । नित्य शब्द श्रावणत्वात् शब्दत्ववदिति । एव परेणोक्ते सति आचार्य्येणोक्त यथन शब्दाख्ये धर्म्मिणि अनित्य . . . ...

34.

4711 अपोहसिद्धि । *Apohasiddhi*

By RATNAKĪRTI

Substance, seasoned palm-leaf 11 × 2 inches Folia, 8 Lines, 7 on a page Character, Bengali of the 12th century Appearance, old, discoloured, and worm-eaten Complete The right end of the leaves is mouse-eaten

Colophon —कृतिरिय महापण्डितरत्नकीर्त्तिपादानाम् ।

Post-Colophon statement —

भवत्यपोहे कृतिना प्रपञ्चो
+ नु स्वरूपास्फुरणान्तु मर्म्म ।
तच्चादृते सर्व्वमयत्नशून्यं
कृते तु सौख्य ननु तावतैव ॥
सम्पूर्ण रात्रिप्रहरद्वयेन कीर्त्तेरपोहो लिखित सुखेन ।
नैर्मोक्यदत्तेन परात्महेतोर्यत्नादतोऽय परिरक्षणीय ॥
शब्दैस्तावन्मुख्यमाख्यायतेऽयस्तस्यापोहस्तद्गुणत्वेन गम्य ।
अर्थरूपो ह्यासतो भासतोऽन्य स्याप्ये वाच्यस्तत्त्वतो नैव कश्चित ।

Printed in the Bibl Ind Series
Not in Nanjio, nor in the Bstan-Hygur

35

4744 क्षणभङ्गसिद्धि । *Ksanabhangasiddhi*

By RATNAKĪRTI.

Substance, seasoned palm leaf 11¼ × 2¼ inches Folia (Part I Anvayamukha) 1 to 11, of which the 4th is missing, and (Part II Vyatirekamukha) 1 to 9 (incomplete) Lines, 7 8 on a page Character, Bengali of the twelfth century Appearance, old and mouse eaten at the right hand side, in consequence of which three or four letters in each line are lost

The Colophon of Anvayamukha —

इति साधर्म्यवदृष्टान्तेऽन्वयरूपव्याप्त्या क्षणभङ्गसिद्धि समाप्ता । कृतिरिय महापण्डितरत्नकीर्त्तिपादानामिति । ग्रन्थप्रमाणम् ३५० । अभियुक्तकत्रिलोचनदत्तेन लिखित स्वार्थं परार्थंश्च ।

Printed in Bibl. Ind Series
Not in Nanjio, nor in the Bstan-Hgyur

36.

8062 उपयोगक्रम । *Upayogakrama*

Substance, modern Nepalese paper, white on one side and yellow on the other 10 × 4½ inches Folia 48 Lines, 6 on a page Extent in ślokās, 500 Character, modern Nāgara written by a Nepalese Appearance, fresh Complete

Last Colophon —उपयोगक्रम समाप्त ।

Post-Colophon statement —

सवत् ४११ श्रावणशुक्ला एकादश्यां बृहस्पतिदिने लिखित ताल-पत्रपुस्तके दृष्ट्वा शुभसवत् १०२७ आषाढकृष्णत्रयोदश्यां मङ्गल-दिने सम्पूर्णंमया लिखितम् ।

This is a work on the analysis of sentences, called Śābdabodha in Sanskrit, belonging to the Buddhist school

It begins —

ॐ नमः मञ्जुनाथाय ।

सुप्तिङन्तं पदं अत्र सुबिति स्वादयः सप्तविभक्तयो गृह्यन्ते, तत्र प्रथमा अपगता, प्रथमं प्रथमैव तावद्विचार्य्यते । का पुनरियं प्रथमा ? सुऔजस् इति प्रथमा । तस्याः पुनरेतत् लक्षणम् । प्रातिपदिकार्थलिङ्गपरिमाणवच[न]मात्रे प्रथमेति । तत्र प्रातिपदिकार्थः सत्ता सत्ताद्वैतवादिनामेतद्दर्शनम् । सत्ता प्रातिपदिकार्थ इति तथाच तेषां दर्शनम् । सत्ता नाम काचिदनादिनिधनरूपा नित्यतया व्यवस्थिता सर्व्वैः शब्दैरभिधीयते तदुक्तम् ।

सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्या[ं] सर्व्वशब्दा व्यवस्थिताः ॥
प्राप्तक्रमविशेषेषु क्रिया सैवाभिधीयते ।
क्रमरूपस्य संहार[ ]तत् सत्त्वमिति चोच्यते ॥
अतस्तां प्रातिपदिकार्थे धात्वर्थे च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुः + तथादयः ॥

यद्येवमभावशशविषाणादिशब्देभ्यः प्रथमा न प्राप्नोति तेषामभाववाचकत्वेन सत्ताया अभावात् नष्टो घट इत्यादौ च प्रथमा न स्यात् नष्टस्य सत्ताया अभावात् । अङ्कुरो जायते इत्यादौ च प्रथमा न स्यात् सतो जन्माभावात् । अत्रोच्यते । नेह वस्तु-सत्ताभिप्रेता । का तर्हि ? अभिधेयसत्ता ।

The original being worm-eaten, this manuscript is full of lacunæ

It describes the meanings of cases, vibhaktis or case endings and so on

It ends —

अत्रोच्यते यया क्रियया यानि कारकाणि सम्बध्यन्ते, तत्क्रियासम्बन्धकृत-एव तेषामपि परस्परसम्बन्धास्तत्त्वा + दोष (?) परमय विशेष एकक्रिया-पूर्व्वकस्तेषां सम्बन्ध इति पारम्पर्य्येण व्यवहितः सम्बन्धः क्रियया तु साक्षा-दिति । तदुक्तं । प्राणिनिकस्तु सम्बन्धः कारकाणां क्रियाकृत ।

क्रियायाः कारकैरेव साक्षाद्योगोऽभिधीयते ।

Not in Nanjio

37.

1075 I. सुगतजन्मरत्नावदानमाला। *Sugatajanmaratnāvadānamālā.*

Substance Nepalese paper 17 × 3½ inches Folia, 108 (by counting), of which the 12th is missing Lines, 8 per page Character, modern Newari Appearance, new

The MS is very defective Between the second leaf and the next leaf now marked 3rd, there is a long gap There is another gap between the leaves now marked 5 and 6, and a third is between the leaves now marked 91 and 92 A former owner of the MS, in order to make it appear to be complete, obliterated the original leaf marks and put new ones, from the leaf now marked 3 to the end In the 3rd leaf we have the colophon of the 21st chapter and that of the 26th in leaf 13B

It goes over the same ground as the Lalitavistara, but it is in verse and is in the form of an *avadāna*

Colophons —

3B, इति (श्रीललितविस्तरे ? added by a different and a later hand) पुराभिनिष्क्रमणपरिवर्त्ता नामैकविंशतितमोध्याय समाप्त, 13B, इति भगवतो दुष्करव्रतचर्य्यापरिवर्त्तो नाम षड्विंशतितमोऽध्याय, 19B, इति बोधिसत्त्वव्रताभिपालनभोजनाहरणपरिवर्त्तो नाम सप्तविंशतितमोऽध्याय, 26B, इति बोधिसत्त्वाभिगमनपरिवर्त्तो नाम अष्टाविंशतितमोऽध्याय समाप्त, 33B, इति बोधिसत्त्वसर्व्वलोकपूजाभिगमनमहाव्यूहपरिवर्त्तो नाम एकोनत्रिंशत्तमोऽध्याय, 53B, इति मारधर्षणपरिवर्त्तो नाम त्रिंशतितमोऽध्याय, 59B, इत्यभिसम्बोधनपरिवर्त्तो नाम एकत्रिंशत्तमोऽध्याय; 65A, इति सप्तकपरिवर्त्तो नाम द्वात्रिंशत्तमोऽध्यायः, 100B, इति धर्म्मचक्रप्रवर्त्तनपरिवर्त्तो नाम पञ्चत्रिंशत्तमोऽध्याय समाप्त, 104B, इति सम्बुद्धजन्ममहायानसूत्रभाषणाश्रवणादिपुण्यप्रशंसापरिवर्त्तो नाम षट्त्रिंशत्तमोऽध्याय, (Last colophon) इति

सुगतजन्मरत्नावदानमालायामानन्दबोधिचर्य्याव्रतसधारणपरिवर्त्तो नाम सप्तत्रिंश-दध्यायः समाप्तः ।

Post-Colophon —

शुभमस्तु जगता सदा ।

Then there are seven lines of Āśīrvāda and phalaśruti

The work begins —

ॐ नम· श्रीरत्नत्रयाय सर्व्वबुद्धबोधिसत्त्वेभ्यो नम ।
यो भगवान् महाबुद्धः पश्यन् पाति सदा जगत् ।
जयन्तु शासनान्यस्य सर्व्वलोकेषु सर्व्वदा ॥
या श्रीप्रज्ञा महादेवी भद्रश्री सद्गुणाकरी ।
सद्धर्म्मसाधनोत्साहं दत्त्वा लोकान् सदावतु ॥
ये जगद्धर्म्मभर्त्तारो बोधिसत्त्वा जिनात्मजा ।
ते सर्व्वे सर्व्वलोकाना भद्र कुर्व्वन्तु सर्व्वदा ॥
त्रिरत्नशरणासीनो महाबुद्धानुभावत ।
वक्ष्यामि त्रिजगच्छास्तुर्बुद्धजन्मावदानकम् ॥
तत् सन्तो ये महासत्त्वा· सम्बुद्धगुणलालसाः ।
ते सर्व्वे श्रद्धया भक्त्या शृणुध्वं बोधिसाधनम् ॥
तद्यथा भगवान् बुद्ध शाक्यसिंहो मुनीश्वर ।
श्रावस्त्या जेतकारण्ये विजहार ससाङ्घिक ॥
भिक्षुद्वादशसाहस्रै सार्द्ध तत्र जगद्धितम् ।
सद्धर्म्मं समुपाख्यातुं सभासने समाश्रयत् ॥
तद्दृष्ट्वा साङ्घिका· सर्व्वे चानन्दप्रमुखा मुदा ।
तत् सद्धर्म्मसुधा पातुमुपाचरन् प्रसादिता ॥
तथा सन्तो महासत्त्वा· बोधिसत्त्वा शुभार्थिन ।
सद्धर्म्मसाधनोत्साहा समाययु प्रहर्षिता· ॥
श्रावका भिक्षवोऽर्हन्तो यतयो ब्रह्मचारिण ।
योगिनस्त्रैलकाश्चापि तथान्ये चाप्युपासका· ॥
भिक्षुण्यो ब्रह्मचारिण्यश्चैलिकाश्चाप्युपासिका ।
एवमन्येऽपि लोकाश्च ब्राह्मणा ऋषयोऽपिच ॥

राजानो राजपुत्राश्च वैश्याश्च मन्त्रिणो जना ।
अमात्या श्रेष्ठिणो भृत्या योद्धसैन्याधिपा अपि ॥

. . . .

2A सर्व्वे ते समुपागत्य समीक्ष्य त मुनीश्वरम् ।
सभासनसमासीनं प्रणत्वा समुपाचरन् ॥
तत्र सर्व्वेऽपि ते लोका समुपेत्य समादरात् ।
यथाविधि समभ्यर्च्य साञ्जलय प्रणेमिरे ॥

.

तान् सर्व्वान् समुपासीनान् दृष्ट्वा स भगवान् जिन ।
आर्य्यसत्य समारभ्य सद्धर्म्म समुपादिशत् ॥
तत् सद्धर्म्मामृत पीत्वा सर्व्वलोका प्रबोधिता ।
सद्धर्म्मसाधनोत्साहं सम्प्राप्याभिननन्दिरे ॥
तत सर्व्वेपि लोकास्ते श्रीघनस्य महामुने ।
बुद्धजन्मावदानञ्च संश्रोतुमभिलेषिरे ॥

38.

4709 **अपरिमितायुर्नाम महायानसूत्र ।** *Aparimitāyur-nāma mahāyānasūttra*

Substance, Nepalese yellow paper 14 × 4 inches Folia 12 Lines, 5 on a page Extent in slokas, 300 Character Newari of the nineteenth century Appearance, fresh Complete

Colophon —आर्य्य महा अपरिमिताय नाम महायानसूत्र समाप्त ।

Post-Colophon —शुभमङ्गल भवन्तु सर्व्वदा । कल्याण भवन्तु । वज्राचार्य्य धर्म्मदेवोनधवता नामन दयका जुरो ॥ शुभ ।

Beginning —

ॐ नमो रत्नत्रयाय ।

एव मया श्रुतमेकस्मिन् समये भगवान् श्रावस्त्या विहरति स्म जेतवने अनाथपिण्डदस्यारामे महता भिक्षुसङ्घेन सार्द्धमर्द्धत्रयो-

दशभिभिक्षुशतैः सार्द्धमर्द्धत्रयोदशैः संवहुलैश्च बोधिसत्त्वै महासत्त्वै ॥ तत्र खलु भगवान् मञ्जुश्रीय कुमारभूतो मामन्त्रयते स्म ॥ अस्ति मञ्जुश्री भूपरिस्था दिशि, रपरिमिता दिशि गुणसञ्चयो नाम लोकधातु, तत्रापरिमितायु.ज्ञानसुविनिश्चिततेजोराजानाम तथागतोऽर्हन्त सम्यक्सम्वुद्धविद्याचरणसम्पन्नसुगतो लोकवित् अनुत्तरः, पुरुषदम्यसारथि शास्ता देवाना मनुष्याना बुद्धो भगवान् एतर्हि तिष्ठति ध्रियन्ते जोपयन्ति सत्त्वाना च धर्म्मं देशयति। शृणु मञ्जुश्रीकुमारभूत इम जम्वुद्विपका मनुष्या अल्पायुषो वर्षशतायुश्च भविष्यति। तेषा वहूनि न कानि मरणानि दृष्टानि। यश्च खल पुनर्मञ्जुश्रीय सत्वापरिमितायुषग. तथागतस्य गुनवर्णपरिकित्तन नाम धर्म्मपर्य्याय लिखिष्यन्ति लिखापयिष्यन्ति नामध्ययमात्रमपि श्रोष्यन्ति धारयिष्यन्ति वाचयिष्यन्ति यावत् पुस्तकगतामपि कृत्वा गृह धारयिष्यन्ति पुष्पधूपदिपगन्धमाल्यविलेपनचूर्णचिवरच्छत्रध्वजघण्टापताकादिभि पूजयिष्यन्ति ते परिक्षीणायुष पुनरता वर्षशतायुषा भविष्यन्ति।

5B तेन खलु पुनः समयेन गङ्गानदीवालुकोपमाना बुद्धकोटीना एकमेतेनैकस्वरेण इदमपरिमितायुसूत्र भाषितम्। ॐ नमो भगवते अपरिमितायु ज्ञानसुविनिश्चततेजोराजाय तथागताय्हत सम्यक्सम्बुद्धाय तद्यथा ॐ पुण्यपुण्य महापुण्य अपरिमितपुण्य अपरिमितायपुण्य ज्ञानसम्भारोपचिते॰ ॐ सर्व्वसंस्कारपरिशुद्धे धर्म्मतथागतसमुद्गते स्वभावविशुद्धे महानयपरिवारे स्वाहा।

For a Chinese translation see Nanjio, Col 21, para 27, and for a Tibetan translation see Beckh, p 122, para 75, also p 189, para 5

Tibetan translations of several commentaries are mentioned in Cordiery, pp 283-284

See Bendall's Cam Cat, p 39, in which it is stated, "It this be the work referred to in Beal's Bud Trip, p 16, the sūtra was translated into Chinese before 1278 A.D"

After the Aparimitāyurmahāyānasūttra, which ends in 12A, there is another short work, named Mānasīpūjā, added in a later hand of which we give the whole text below —

ॐ नमो रत्नत्रयाय ।

यावन्ति पुष्पाणि फलानि चैव
भैषज्यजातानि च यानि सन्ति ।
नवानि यावन्ति वसन्ति लोके
जलानि च स्वच्छमनोरमाणि ॥
महीधरा रत्नमयास्तथान्ये
वनप्रदेशाश्च विवेकरम्याः ।
+ + सुपुष्पाभरणोज्ज्वलाश्च
ये + + + सत्फलनम्रशाखा ॥
देवादिलोकेषु च गन्धधूपा
कल्पद्रुमा रत्नमयाश्च वृक्षा ।
सरांसि चाम्भोरुहभूषणानि
हंसस्वनात्यन्तमनोहराणि ॥
अकृष्टजातानि च शस्यजाता-
न्यल्पानि वा पुष्पविभूषणानि ।
आकाशधातुप्रसराव(धी)नि
सर्वाण्यपीमान्यपरिग्रहाणि ॥
आदाय बुद्ध्या मुनिपुङ्गवाश्च
निर्यातयाम्येष सपुत्रकेभ्य ।
गृह्णन्तु तन्मे वरदक्षिणीया
महाकृपा मामनुकम्पमानाः ॥
अपुण्यवानस्मि महादरिद्र
पूजार्थमन्यत् मम नास्ति किञ्चित् ।
अतो ममार्थाय परार्थचिन्ता
गृह्णन्तु नाथा इदमात्मशक्त्या ॥

ददामि चात्मानमहं जिनेभ्य·
सर्व्वैश सर्व्वञ्च ददाम्यजेभ्य ।
परिग्रहं मे कुरुताग्रसत्त्वा·
युष्मासु दासत्वमुपैमि भक्त्या ॥
परिग्रहेणास्मि भवत्कृतेन
निर्भीर्भवे सत्त्वहितं करोमि ।
पूर्व्वञ्च पाप समतिक्रमामि
नान्यच्च पाप प्रकरोमि भूय· ॥
इति मानसी पूजा समाप्ता ॥

39.

4716 **आर्य्यापरिमितायुर्नाम महायानसूत्र ।** *Aryāpari-mitāyur nāma mahāyānasūttra*

Substance, seasoned palm-leaf 12 × 2¼ inches Folia, 6 Lines, 6 on a page Character, Kutila Appearance, old and discoloured Leaves 5B, 8B and 9A contain faded illustrations

The leaves are marked 3, 4, 5, 7, 8, 9

The third leaf begins —अपरिमितायुःसूत्र भाषितम् ।

ॐ नमो भगवते अपरिमितायुर्ज्ञानसुविनिश्चित तेजोराजाय ...

etc etc etc

The same mantra as quoted under No 38

40.

10784 **अपरिमितायुर्नाम महायानसूत्रम् ।** *Aparimitā-yur nāma-mahāyānasūttra*

Substance, Nepalese paper with black ground Written in silver Folia, 25 Lines 5 on a page Character ornamental Newari Date N S 760 Appearance, old Complete

The last Colophon —

आर्य्यापरिमितायुर्नाम महायानसूत्र समाप्तम् । ये धर्म्मा इत्यादि ।
देयधर्म्मोऽय प्रवरमहायानयायिन परमोपासकशाक्यभिक्षुश्री-

त्रिभुवनरत्नस्य यदत्र पुण्य तद्भवत्वाचार्य्योपाध्यायमातापितृपूर्व्वंगम
कृत्वा सकलसत्वराशिरनुत्तरज्ञानमोक्षफल प्राप्नयेऽस्तु ।

महाराजाधिराजपरमेश्वरपरमभट्टारकश्रीजयलक्ष्मीमल्लसिंहमल्लदेव, तस्य पौत्र श्रीर पट्टापमल्लदेव पुत्र ठाकुरस्य विजयराज्य दानपति कित्ति-पुण्य महाविहाराधिष्ठितखाडाच्छच्छ्रपशाक्यभिक्षु श्रीत्रिभुवनरत्नस्य भार्य्यापुत्रपुत्री मगाणपरिवारस्य न+ यपरिमितपुण्यकपोचका जुरो ॥ श्रेयोऽस्तु ॥

सवत् ८६० मार्ग शुक्ल दशमि तिथि बृहस्पतिवारे सुदिन कुन्नु सपूर्णजुरो । लिखितेय तनुमुरमहाविहाराधिष्ठितखणचोकास्थवज्राचार्य्यश्रीरत्नजयस्य पुत्र महायान+ +वज्राचार्य्य श्रीजयसिंहदेवेन लिखित सपूर्णमिति ।

यथादृष्ट तथा लिखित इत्यादि ।

शुभमगल भवतु ॥

41.

1715 **आर्य्यदुर्गतिधारणीपरिसूत्र ।** *Āryadurgatidhāraṇī-parisūtra*

Substance, Nepalese paper 14 × 4 inches Folia, 7, numbered 84—90 Lines, 6 on a page Character, Newari Date, N S 815=1725 A D Appearance good Complete

This is a very short work, calling itself a Mahāyāna-sūtra, of which the next number, a much bigger work, is evidently an amplification It gives simply a number of *mantras* which are credited with the power of bringing relief to suffering humanity

It agrees with the next number (see below) up to the mantras under the heading of Vajrasphota mantras, the last of which is numbered 28 (समन्तभद्राय स्वाहा) ।

Then it goes on

89A अनेन देवेन्द्र महास्थानसूत्रन सर्व्वदुर्गतिविध्वसना माहायानसूत्रं यो धारय वाचयेत् [स] सुखावतिमनुगच्छति ... ...

Then follow three more mantras with the colophon,

अनेन दुर्गतिधारणि गाथा ।

Then comes the phalaśruti

अण्डजा वा जरायुजा वा स्वेदजा वा . . ..

... . . . सर्व्वदुर्गति + + सुखावत्या मेवायात् ।

ॐ मुनि मुनि महामुनि स्वाहा

नमस्ते शाक्यसिंहाय धर्म्मचक्रप्रवर्त्तिने ।

त्रिधातुकस्थिते सर्व्वं शोधय सर्व्वदुर्गति ॥

मार्गशोधन मुद्रा—

इदमवोचद्भगवानात्तमना स्ते च भिक्षवो भगवतो भाषितमभ्यनन्दमिति ॥

Then comes the Colophon

Colophon —आर्य्यदुर्गतिधारणिपतिसूत्र समाप्त ।

Post-Col. —ये धर्म्मा (इत्यादि)

शुभमस्तु सर्व्वदा कल्याण भवन्तु । सम्वत् (सवत्) ८४५

फाल्गुनकृष्ण[त्रयो]दस्याया तिथौ शर्त्तभिषनक्षत्रे शुभजोगे

जथाकम सुचरे बृहस्पतिवासरे मीनराशिगते सवितलि कुम्भ-

राशि चन्द्रमसि थुकुनु दिन कुन्हु चोयसिधयका जुरो शुभ ।

42.

4848 **सर्व्वदुर्गतिपरिशोधन ।** *Sarvadurgati-pariśodhan*

Substance, Nepalese paper 14 × 4 inches Folia, 9 to 83 Lines, [illegible] on a page Character, Newari Date, N S 873 Appearance, old and discoloured Although the leaves are numbered 9—83, the MS is complete

For the work see Bendall's Cam Cat , pp 78, 79, 81, 94, 142 For a Tibetan translation see Beckh, p 91B, para 2 , p 92, para 4

12B, अथ खलु भगवान् शक्रब्रह्मादिदेवपुत्राणा सर्व्वतथागतहृदयाना धिष्ठानार्थममोघवज्राधिष्ठान नाम समाधिसमापन्ना ॥ ॐ वज्राधिष्ठान समय हूँ .. . . सर्व्वदुर्गतिपरिशोधनराज नाम तथागतहृदयानिश्चारयेत् ॥ ॐ शोधन २ सर्व्वपापविशोधनि + + सर्व्व-कर्म्मावरण विशुद्धे स्वाहा ॥ अस्या विद्याया भाषणानन्तरमेव सर्व्वसत्त्वान् दुर्गति

विनियाति . . . . पुनरपरं देवेन्द्र इद सर्व्वतथागतहृदय ॐ सर्व्वापापविशोधनि ॐ फट् . 13A, लास्याया मन्त्र, मालाया मन्त्र, गीताया मन्त्र, नृत्याया मन्त्र, 18B, धूपाया मन्त्र, पुष्पाया मन्त्र दिवाया मन्त्र, गन्धाया मन्त्र, वज्राङ्कुश मन्त्र, वज्रपाश मन्त्र, वज्रस्फोट मन्त्र, वज्रवेसस्य मन्त्र

15A अथ देवेन्द्रो भगवन्त पथन् प्रदक्षिणीकृत्य वन्दित्वैवमाहः भगवान् सर्व्वदुर्गतिवसिभूताना हिताय सुखाकरनाय यथा सत्त्वे सर्व्वदुर्गति पृथि करनाया ... . अथ खलु भगवान् साक्यमुनि सर्व्वदुर्गति परिशोधनज्ञानवज्र नाम समाधि समापद्य सर्व्वतथागतदुर्गतिपरिशोधनतेजो-राजा नाम मण्डर भाषयत् । . प्रथम तावत् योगी विजने मनोऽनुकुले प्रदेशे मृदुकुसुमालासने (सुकुमारासने ?) निसन्न सुगन्धमण्डरका कृत्वा यथोपहारपूजा करणिया तत सर्व्वधर्म्मनैरात्मा भावयित्त्वा आत्मान ऊका-रेण वज्रज्वाराक्र भावयेत् तस्य कर्णे जीवकारेण पद्म तस्योपरि दशमे अका-लेन चन्द्रमण्डल तस्योपरि ऊकारेण पञ्चसुचिकावश्च तद्दश्च जिह्वाया रिन भवति वज्रजिह्वेति तेन जिह्वा भवति मन्त्रजापक्षमो भवति । etc , etc

77B तत स्वय वज्राचार्य्य . वज्र शिष्यमूर्द्धि स्थाप्य एव वदेत् अय ते समयो वज्र etc

Colophon —82B आर्य्य सर्व्वदुर्गतिबरिशोधनराजोराजस्या तथा-
गतस्यार्हत सम्यक्सबुद्धस्य कल्पैकदश' समाप्त ॥
ये धर्म्मा हेतुप्रभवा (इत्यादि)

देय धर्म्मेय प्रवरमहायानयायिन परमोपासक परमधार्म्मिक धमात्मा वजाचार्य्य श्रीधर्म्मदेवप्रमुखादिसगनाणा ॥ यदत्त पुन्य (इत्यादि)।

स्वस्ति । श्रीमत् पशुपतिररपत्यादि रघुकुलोत्पन्न महाराजाधिराजरविवंशो[द्]-भवश्रीश्रीजयरत्नजित्तमल्लदेवदेवाना सदासमरविजयिना प्रभूथाकुरस्य विजयराज्य ॥

दानपति श्रीभक्तापुरमहानगरस्थाने श्रीप्रशुपतिमहाविहारेस्थित श्रीदेवता-लोके खलचरनधन्मापितावजाचार्य्य पुनदेवस्य भार्य्या ... .
इदं सर्व्वदुर्गतिपरिशोधनपुस्तक लिखितवान् । . . ...

एतत् पुण्यानुभावेन जजमानस्य सगनपरिवाराणा... . . . .

वृद्धिरस्तु। . . . . शुभ सम्वत् ८७३ आषाढमास्य शुक्लपक्ष एकादश्याया तिथौ अनुराधनक्षत्रे॥ शुक्लमजोगे जथाक्रममुहूर्त्ते बुधवासरे कर्क्कराशि सविश्चरी। वृश्चिकराशि चन्द्रमसि। एतद्दिने लिखितं सम्पूर्णमिति॥

यादृशं पुस्तकं दृष्टा etc , etc

Then there are four leaves marked 91 to 94, written mostly in the Newari language

There is one more of a shorter size, containing the beginning of some other work, with space for an illustration

43.

4836 **वसुधारानामधारणीपरिसूत्र।** *Vasudhārā-nāmadhāraṇīparisūttra*

Substance Nepalese yellow paper 10 × 2½ inches Folia 30 Lines, 5 on a page Extent in slokas, 400 Character Newari Date N S 814 Appearance discoloured Complete

Colophon —

आर्य्यश्रीवसुधारानामधारणीपरिसूत्र समाप्त।

Post-Colophon —

ये धर्म्मा हेतुप्रभवा etc सवत् ८१४ चैत्रमस्यशुक्लपक्ष प्रतिपद्याया तिथं रेवतिनक्षत्रयोगे जथाक्रममात्रे शुक्रवासरे मिनराशिगते शुवितरि मेषराशि चन्द्रमसि।

लिखिति श्रीवज्राचार्य्य धर्म्मदेन यवनादयका पुथिचोय धनकादिन जुरो॥ शुभमस्तु सर्व्वदा। ययादृष्ट तथालिखितं लेखको नास्ति दोष। See below

44.

10757

Three batches of seasoned palm leaves all written in the Newari character of the 14th century

I

11 × 2¼ Folia, 17 of which the 5th and 12th are missing Lines 7 on a page Appearance soiled

Beginning —

श्री भगवत्यै आर्य्यवसुधारायै

कल्पोदितेन विधिना परिपच्यमाना

या धारयन्ति विविधरत्नसुवर्णमय्या ।

पूर्णां करोति भवनं सहसैव सर्व्वं

ता सर्व्वलोकजननी प्रणमामि भक्त्या ॥

त्वं देवि सर्व्वगुणरत्नमहानिधान

सत्त्वार्थकार्य्यधनधान्यसमृद्धिहेतो ।

हारार्द्धहारमुक्तामणिकल्पवृक्षा

त्रैलोक्यनाथवसुधा वसुधार नामा ॥

एवम्मया श्रुतमेकस्मिन् समये भगवान् कोशाम्बया महानगर्य्यां विहरति स्म । .... तत्र खलु भगवान् ...... सर्व्वदारिद्राद् खार्णवपरिशोषण नाम धर्म्मपर्य्यायं देशयति स्म ।

आदौ कल्याणं मध्ये कल्याण पर्य्यवसाने कल्याणं स्वर्थं सुव्यञ्जनं केवल परिपूर्णं परिशुद्ध पर्य्यवदात ब्रह्मचर्य्यं सम्प्रकाशयति स्म ।

45.

10757 II

11 × 2 inches Folia, 3—21, of which the 10th, 13th, 15th—17th are missing Soiled With 5 lines on a page Copied in N S 429 = A D 1309

Colophon —

इति आर्य्यश्रीवसुधारा नाम धारणी समाप्ता ।

Post-Colophon statement —

ये धर्म्मा etc , etc

देयधर्म्मोयं प्रवरमहायानयायिन परमोपासक श्रीश्रीकलित-द्रुमाया श्रीमाणीगलोत्तरमहाविहारे वगारच्छ अधिवासित राजकनककारजोतता रोकस्य यदत्र पुण्य तद्भवत्वाचार्य्योपाध्याय मातापितृपूर्व्वङ्गम कृत्वा सकलसत्त्वराशेनअनुत्तरफलप्राप्तमिति ।

राजाधिराजपरमेश्वरपरमभट्टारकश्रीश्रीजयार्ज्जुनदेवस्य विजय-

राज्ये । श्रेयोऽस्तु । सवत् ४६६ चैत्रशुक्लद्वादश्यांपरत्रयोदश्या पूर्व्वफाल्गुण्यांपरे उत्तरफाल्गुण्यानक्षत्रे वृद्धियोगपरे ध्रुवयोगे बुध-वारे लिखितमिदं सद्धर्म्मपुस्तकम् ।

श्रीयोख्युस्थववहारस्नान्द्रवराट नचाचार्य्यश्रीगुणानन्तनतिना लिखितम् । शुभमस्तु ॥

There is one stray leaf with writing much effaced.

46.

10735 **सर्व्वतथागतोष्णीष सितातपत्रोनामापराजिता महाप्रत्यंगिरा विद्या राज्ञी ।** *Sarva-tathāgatoṣṇīṣa-sitātapatronāmāparājita-mahā pratyaṃgirā vidyā rājñī*

Substance, Nepalese black paper. Written alternately in gold and silver. Folia, 22, marked in letter numerals. Lines, 5 on a page. Character, Newari. Date, N.S. 9[illegible]3. Appearance, old. Complete. With an illustration in the first leaf.

21A आर्य्यसर्व्वतथागतोष्णीषसितातपत्रोनामापराजितामहाप्रत्यंगिराविद्या राज्ञी समाप्त ।

Then there is a short Dhāraṇī entitled (22A) आर्य्यावलो-कितेश्वरस्य अभयङ्करि नाम धारणी ।

Post-Colophon —

ये धर्म्मा इत्यादि ।

सवत् ६२३ मिति ज्येष्ठ शुक्ल ४ सपूर्ण ऋषित मया दानपति काष्ठमण्डप-कृति . The other side of the leaf is completely faded.

47.

9987 **षण्मुखी नामधारणी ।** *Saṇmukhīnāma dhāraṇī*

Substance, seasoned palm-leaf. 12 × 2". Folia, 4. Lines, 5 on a page. Character, Newari of the 14th century. Appearance, old and soiled. There are holes on the right and on the left of the centre.

A Tibetan translation of a comm is known from Cord, p 297

1 नमो बुद्धाय।

न दिवि भुवि वा नास्मिल्लोके न वैश्रवणालये
न मरुभुवने दिव्यस्थाने न दिक्षु[वि]दिक्षु वा।
चरतु वसुधा स्फीता कृत्स्ना सपर्व्वतकानना
पुरुषवृषभस्तत्तुल्योऽन्यो महाश्रमणः कुतः ॥

एक गाथा।

सर्व्वबुद्धान् नमस्यामि जिनानप्रतिपुद्गलान्।
शरीराणि च सर्व्वेषां सबुद्धानां यशस्विना ॥
जायन्ते यत्र सबुद्धा बोधिं यत्र स्पृशन्ति च।
प्रवर्त्तयन्ति शिवं चक्रं परिनिर्वान्त्यनास्रवा ॥
यत्र स्थिताश्च + + + + + + श्च तथागताः।
कल्पिता सिंहशय्याश्च तान् देशान् प्रणमाम्यहं ॥
ऊर्द्ध तिर्य्यगधस्ताच्च (न्नस्तास्) दिशासु विदिशासु च।
सशरीराऽशरीरेषु स्तूपेषु प्रणमाम्यहम् ॥
पूर्व्वोत्तरे दिशो भागे तिष्ठते द्विपदोत्तम।
जिनो दुष्प्रसवो नाम तेनेमा गाथ भाषिता ॥
याभिस्तस्त्वभिर्गाथाभि 2 र्ये स्तुवन्ति तथा गतान्।
कल्पकोटिसहस्रेभि र्न ते गच्छन्ति दुर्गतिम् ॥

चतुगाथा।

बुद्धे धर्म्मेऽवज्ञा कौसीद्य तुष्टिरल्पमात्रेण।
रागे माने चरित कौकृत्य चानियतभेदः ॥
सत्त्वानामावरणं तत्प्रतिपक्षोऽग्रयानसभाषा।
सर्व्वान्तरायदोषप्रहाणमेषां तथा भवति ॥

तद्यथा।

ॐ वज्रप्राकारा वज्रप्राकारा वज्रचक्रदृढा
भयानके घमले विमले निमले
चले चुले चुलुके चुलुके चुलु चुलु बुद्धे स्वाहा।
यो ग्रन्थतोऽर्थतो वा गाथाद्वयधारणीं प्रयुञ्जीत।

सद्दि दशविधमनुशसं लभते सत्त्वोत्तमो धीमान् ॥
क्तत्त्वा च धातुपुष्टि प्रामोद्य चोत्तम मरणकाले ।
जन्म च यथाभिकाम जातिस्मरणता च सर्वेत्र ॥
बुद्धेश्च समवधान तेभ्य श्रवणं यथाग्रयानस्याधिमुक्ति ॥
सद्द बुद्धाद्दय 2A. सुखतामाशु बोधिश्च ॥
त्तय हि गच्छन्ति मद्दानिधाना राजाग्निचौरोदकविप्रलब्धा ।
श्रुत निधान हि तथागताना ऋविप्रनाश नङ्गकल्पकोटिभि ॥
सर्वेऽप्रमादो ह्यमृतस्य मूल
सत्त्वार्थयुक्तस्य च बोधिचित्तम् ।
यथोनिशश्चैव विवेकचित्त-
मपरिग्रह' सर्व्वसुखस्य मूलम् ॥ गाथाद्दय ॥

एव मया श्रुतमेकस्मिन् समये भगवान् शुद्धावासोपरि गगनतलप्रतिष्ठिते सप्तरत्नप्रविभक्तचित्ररत्नव्यूहे मद्दामण्डलमाडे विद्दरति स्म असंख्येयेन बोधिसत्त्वगणेन सार्द्ध। तत्र खलु भगवान् बोधिसत्त्वानामन्त्रयते स्म । उद्गृह्णीध्व यूय कुलपुत्रा इमा षण्मुखी नाम धारणी सर्व्वजगद्धितसुखाये। तद्यथेदम्। ससारे मसरतो यो मे कश्चित् दुःखानुभव समानुभूतस्सेऽ 3 सत्त्वसमताऽप्रतिसम्विदितलक्षणा यश्च मे कश्चित् लौकिकसम्पत्तिसुखानुभव स भवतु सर्व्वसत्त्वसाधारणपरिभाग यच्च मे किञ्चित् पापकर्म कुशलमूल कर्म्मावरण तन्माभूदप्रतिदेशनानुत्तरया प्रतिदेशनया यानि च मे मारकर्म्माणि तानि मा भूवन्नपरिज्ञातान्यनुत्तरया परिज्ञया

3B आर्य्यषण्मुखी नाम धारणी समाप्ता ।

The rest of the MS is taken up with a number of Gāthās, uttered by Samantabhadra Bodhisattva, in mixed Sanskrit The MS ends in the middle of a verse

48.

10741

D A number of Dhāranīs with illustrations

Substance Nepalese paper Character Newari modern hand Folia 11+22

I Complete in eleven leaves, the rest separately paged, being in 22 leaves

Colophon —

11B आर्य्यग्रहमातृका नाम धारणी समाप्त ।

II 4A इति श्रीवसुधाराया नामाष्टोत्तरशत बुद्धभाषित समाप्त ।

III 8A आर्य्यवज्रविदारणाहृदयमन्त्रधारणी समाप्त ।

IV 11A आर्य्यंश्रीगणपतिहृदयनामधारणी समाप्त ।

V 15A आर्य्यंउष्णीषविजया नाम धारणी परिसमाप्त ।

VI 17A आर्य्यपर्णशवरीधारणी समाप्तः ।

VII 19B आर्य्यमारिची नाम धारणी समाप्त ।

VIII

इति श्री आर्य्यंग्रहमातृका नाम धारणि समाप्त ।

Post-Colophon Statement —

ये धर्म्मात्यादि । शुभ

49.

3830 **बोधिचर्य्यावतार पञ्जिका ।** (*Bodhicaryāvatāra Pañjikā*)

By Pandita Bhiksu Prajñākaramati

The MS has been lent to Professor Louis de la Vallee Poussin of Ghent, but owing to the war, the MS cannot be obtained for the purpose of cataloguing The following description of the manuscript is given from my paper entitled —"On a new find of old Nepalese manuscripts" in pp 245 249, J A S B 1893

Substance, palm-leaf Character, Newari Date, N S 198=1078 A D In good state of preservation With the first leaf and 26 others missing

Colophon —बोधिचर्य्यावतारे प्रज्ञापारमितापरिच्छेदटीका समाप्ता ।

कृतिरियं पण्डितभिक्षुप्रज्ञाकरपादाना ॥

Post-Colophon —

टीकेयं परमा सुयन्त्रितपदा शुद्धा मनोह्लादिनी
संसारार्णवपारगामिनि जने नौयानयानोपमा
आनुप्राप्तिकरी जिनस्य पदवी तार्योल्लिखिता मया
प्राप्तं यत् कुशलं सुवन्यदि परं तेनास्तु बुद्धो जनः ।
अष्टानवतिसंयुक्ते शतसप्तति वत्सरे
कृष्णे श्रावणपञ्चम्यां वासरे कुजसाह्वये ।
श्रीमच्छङ्करदेवस्य राज्ञो विजयशालिनः ।
बोधिचर्य्यावतारस्य टीका लिख्यामिदं शुभम्
श्रीललितपुरे रम्ये श्रीमानीगलकसञ्ज्ञके
यच्छ्रीराघववनान्तस्य विहारे सुगतालये ।
ग्रन्थस्थविरभिक्षोस्य बुद्धचन्द्रस्य पुस्तकं
तत्पुण्याद्बोधिसत्त्वत्वं लभते परमं पदं । इति ।
विसृजतु सलिलं घनो यथेष्टं भवतु मही बहुशस्यसम्प्रयुक्तां
भवतु नरपति प्रजा विनम्रा भवतु वयनपते सुखाभिवृद्धि इति
कायस्थ भुवनाकरषेण लिखितमिति ।

50.

9979 **बोधिचर्य्यावतार ।** *Bodhicaryāvatāra*

and the Pañjikā commentary.

By Śāntideva

Four several palm-leaves 2″ × 2″ Written in old Newari Character

I Bodhicaryāvatāra with six lines on a page, folded containing the colophon —

बोधिचर्य्यावतारे ध्यानपारमिताऽष्टम परिच्छेद

II Two leaves with five lines on a page—one is marked on the left-hand side अष ८ = 127—the other without leaf-mark contains the colophon बोधिचर्य्यावतारपञ्जिकायां ध्यानपारमितापरिच्छेदोऽष्टमः ।

III The fourth leaf is written in a smaller hand with five lines, and on one side only It quotes the following *pratikas*—एकः पितेत्यादि, सत्त्व रक्षा इत्यादि ।

51.

3829 **बोधिचर्य्यावतारटीका ।** *Bodhicaryāvatāra-ṭīkā*

By PRAJÑĀKARAMATI

(The ninth or the Prajñāpāramitā Section only)

Substance, palm leaf 12×2 inches Folio 109 Lines, 6 on a page Extent in ślokas 2725 Character Bengali of the 12th century Appearance fresh but worm eaten in places Complete Written in a neat and small hand

Colophon —

बोधिचर्य्यावतारे प्रज्ञापारमितापरिच्छेदटीका समाप्ता । कृतिरियं पण्डितभिक्षु प्रज्ञाकरमतिपादानाम् ।

Post Colophon —

लिखापितेयमनवधिगुणगणविविधरत्नराशिपरिव्याप्तगम्भीरप्रज्ञाप्रतानजलसागरे स्तोप्रकर्म्मावरणपरिकलितजगज्जननिचयोद्धरणक्षतसङ्कल्पे धर्म्मसाकथ्यगलदमृतधाराप्रवाहपरितर्पितानेकजनसमाजैः शाक्यभिक्षुमहास्थविरश्रीवनरत्नैरिति । लिखितेयं मञ्जुश्रीचरणारविन्दरजोरंञ्जितोत्तमाङ्गैः करणिककायस्थश्रीविद्याधरैरिति ।

Printed in the Bibl Ind. Series. Not in Nanjio

52.

9990.

Substance, seasoned palm-leaf Folia, 3 20′ × 2″ Lines, 5 on a page Character, Newari of 14th century Complete

Post Colophon —काष्ठमण्डपीयेन भिक्षुश्रीकीर्त्तिपण्डितेन लिखितमिद पुस्तकम् ।

Except the 3rd leaf the other leaves have been retouched It gives a life of Śāntideva It begins

+ + + + + + नगरे श्रीमञ्जुवर्म्मनाम्नो राज्ञ पुत्र पूर्व्वजिनकृताधिकारः प्राप्तमोक्षभागीयकुशलमूल सम्यक् महायानगोत्र सर्व्वकलाकुशलो यौवराज्याभिषेकसमये कुलिशयोगिनिर्म्माणरूपया जनन्या राजमहिष्या अभितप्तोदकैस्त्राप्यमानस्तापमसहमान उक्त । पुत्र नव स्वर्गं न गच्छन्ति, राजा चित्रकर कविरिति । नरेश्वरीभूय पाप कृत्वा मृतस्य निरयगतस्य अतोऽपि तीव्रतर दु:ख ते भविष्यत्यलमनेन राज्येन । गच्छ वत्स बुद्धबोधिसत्त्वदेश श्रीमञ्जुवज्राधिष्ठानं, तत्र भद्र भविष्यतीत्युक्त स मातुरादेश शिरसि निधाया-कुटिलहृदयो हरिदश्ववरमभिरुह्य चलित । स चानेकदिनान्यनिश गच्छन् भोजनपानादिक मनस्यकुर्व्वन् तदादेशैकतानमानस क्वचिदरण्ये कन्यारत्नमपश्यत् तया वाजिन विहृत्यासौ भुवमवतारित । स क्षमार्त्तो जल दृष्ट्वा पातुमुद्यत । तया विषोदकमेतदित्युक्त्वा निवार्य्यान्यदमृतोदक पायितो मासश्चाग्निना दग्ध्वा भोजित । स्वस्थ स तामाह । कुतस्त्वमागतासीति । सा प्राह । इहावर्त्ते स महाकरुणारुणविपणः सद्गुणगणाभरणा सिद्धश्रीमञ्जुवज्रसमाधिरस्मद्गुरु . तत्सकाशादहमागतास्मीत्युक्तो लब्धरत्नइव दु खितो जन परमप्रमोदप्राप्त, तत्रैव दर्शयेत्युक्त्वा तयाहृतो घोटकमादाय गतो गुरुगुणगणाधारधीरगम्भीर शमदमप्राप्त गुरुमालोक्य तुरङ्गममात्मानञ्च नमस्कृत्य गुरवे नित्या[नि]त्य दुरन्तभवदु खाब्धेरुपदेशदानेन मा त्यधीष्टवान् तेन च परिपाटीक्रमादुपदिष्टो द्वादशवर्षास्तत्रैव समाधार्य्य मञ्जुवज्रमध्यक्षीकृत्य मञ्जुश्रीज्ञान लब्ध्वा गच्छ मध्यदेशमिति गुरुणा समादिष्टो गत्वा मगधराजान सेवते स्म ।

राउतुत्वेन अचलसेननामा देवदारुखड्गेन कोषगतेन राउतुचर्य्यय धर्म्मारामो विहरति स्म । कालान्तरेण तत्सम्पत्तिमसहमानैरन्यैराउतै राजान विज्ञप्य देव देवदारुखड्गेन अचलस्य सेवेति युद्धकाले कथमसौ युध्येत । तदेव निरूपयास्य खड्गमिति अदृष्योऽसौ न शक्यते नियोक्तु इतीर्ष्याशल्यचित्त[पी]ड्यमानमर्म्मभिस्तैर्मिलित्वा सर्व्वेषा खड्गो द्रष्टव्य इति राजाज्ञया व्याजेन सर्व्वेषा करवालमालोक्या चलसेनस्य निस्त्रिंशदर्शनमुपजातं । अचलसेन आह न मे खड्गो द्रष्टं, युज्यते

त्रिधा गिवारणोऽपि निश्चलात् न्टपतें चच्तुरेक मिधाय तमेव पश्येति विजने दर्शिते तत्खड्गज्वालया राज्ञश्चतुरेक भूमौ पतित। प्रभावदर्शनादावर्ज्जितं न्टप विचिन्त्य .. प्रशस्तशिलके निक्षिप्य (?) निर्व्यऽर्योक्वत्य श्रीनालन्दामहा-विहार गत्वा वेशान्तरेण प्रव्रजितः। शान्तिदेवनामा प्रशान्तत्वात् पिटकत्रय श्रुत्वा ध्यायति स्म। भुञ्जानोऽपि प्रभास्वर सुप्तोपि कुटिं गतोऽपि तदेवेति भूसु-कुसमाधिसमापन्नत्वात् भूसुकुनामाख्यात। सघेऽपि कालान्तरेण कैश्चिदासे कुतूहलिभिरालोचित। किमय किञ्चिज्जानाति नवेति निरूप्यता तावत्। तत्र च प्रत्यब्द ज्येष्ठमासि शुक्लपक्षे ऋद्धिप्रातिहार्य्यैः पूरणप्रभृतय शास्ता पूर्व्वं निराकृता इति तदनुकाराय पाठ क्रियते तत्रैवाय निरूप्यता इत्ययमादिष्टः नाह किञ्चिज्जानामीति तेन पुन' पुनपरिहारे स्वधीष्ट (?) तैर्विहारादक्षि' पूर्व्वोत्तरस्या विस्तीर्णाया धर्म्मशालाया महापण्डितमण्डलमध्ये स च स्वय चिन्तयति स्म पूर्व्वकृत सूत्रसमुच्चय शिक्षासमुच्चय बोधिचर्य्यावताराख्य ग्रन्थत्रयमस्तीति चेतसि कृत्वा सिहासनगत प्राह किमार्षं पठामि अर्थार्षं वा॥ तत्र ऋषिः परमार्थज्ञानवान् ऋषगतावित्यत्र औणादिक किः ऋषिणा जिनेन प्रोक्तमार्षं ननु प्रज्ञापारमितादौ सुभूत्यादिदेशित कथमार्ष इत्यत्रोच्यते युवराजार्य्यमैत्रेयेण॥

यदर्थवद्धर्म्मपदोपसंहित
त्रिधातुसक्लेशनिवर्हणं वच ।
भवेद् भवच्छान्त्यनुशसदर्शक
तदत् क्रमार्षं विपरीतमन्यथा॥

तदाक्रुष्टमार्य्याचेरर्थार्षं सुभूत्यादिदेशना तु भगवदधिष्ठानादित्यदोष॥ कुतूहलान्तैरक्त अर्थार्षमेव तावत् पठ्यतामिति चर्य्यावतार पठति स्म॥ तत्र च पाठे।

यदा न भावो नाभावो मतेः सन्तिष्ठते पुर ।
तदान्यगत्यभावेन निरालम्ब[ः] प्रशाम्यति॥

इत्येत्र श्लोके भगवान् मञ्जुश्री' पुर आविर्भूत, स च तेनैव सार्द्ध मन्त-रीक्षगत क्रमादन्तर्हित॥

ततः भद्रदर्शनसविमैस्तत्पुस्तकत्रय विचारे पोठकुट्या तत्पुस्तकत्रय सूत्रसमुच्चयादि लब्ध्वा पण्डितैर्लोके प्रचारितम्। तत्र सुगतेत्यादिरुक्त।

53

9998 आदिवाग्वज्रत्रिरत्नबिम्ब । *Ādivāgvajra-Triratna-Vimba*

Substance, unseasoned palm-leaf. 11 × 1½ inches. Folia 2—7. Lines 4 on a page. Extent in ślokas 50. Character, Modern Newari, written in a scribbling hand. Appearance, oldish. Incomplete in the beginning.

Fol. 2 begins —

+ + भूमिश्वरोनाथो दशभूमि [ ] प्रतिष्ठिता ।
सर्व्वेलो[का]स्तथा भक्त्या त्रिरत्नशरणं गता ॥
सत्कारैः श्रद्धयाभ्यर्च्य प्राभाजन् सर्व्वदा मुदा
तदा तत्र सदा भद्र महोत्साह समन्तत ः
प्रावर्त्तत निरुत्पातमेतद्धर्मानुभावत ।
इति मे गुरुणा ख्यात श्रुत मया तथोच्यते ॥

...

2A इति तेन समाख्यात जयश्रिया सुधीमता ।
श्रुत्वा ते श्रावका सर्व्वे प्राभ्यनदन् प्रबोधिता[ ] ॥
तदा रत्ना प्रसन्नात्मा जिनश्रीराज उन्मना ।
त्रिरत्न शरण गत्वा चचारैतद्व्रत सदा ॥
तत्सघा यतयश्चापि चतुर्ब्रह्मविहारिण ।
त्रिरत्नभजन कृत्वा व्रतमेतत् सदा चरन् ॥
ततस्ते व्रतिन[ ] सर्व्वे परिशुद्धत्रिमण्डला[ः] ।
अर्हन्तो निर्म्मलात्मानो वभूवु र्भोगिभागिन ॥
ये वापीद त्रिरत्न ग्रथितगुणगण श्रावयन्ते हि लोकान् ।
श्रद्धाभक्तिप्रसन्ना[ ] 3 प्रमुदितमनसा ये च शृण्वन्ति मर्त्या ॥
ते सर्व्वे वोधिसत्त्वा सकलगुणभृत श्रीसमृद्धा सुधीरा ।
भुक्त्वा सौख्य सदा ते दशवलभुवने सम्प्रजाता रमेयु ॥

तद्यथासौ महाबुध शाक्यमुनिर्जगद्गुरो ।
धर्म्मराजा महाभिज्ञः सर्व्वज्ञोऽर्हन् मुनीश्वर ॥
भगवान् श्रीघनः शास्ता तथागतो विनायक ।
मारजित् सुगतो नाथस्त्रैधातुकाधिपो जिन. ॥
श्रीमन्तो नाथनाथस्य गृहस्थस्य महामते [ ]।
विहारे जेतकोद्याने विजहार ससाङ्घिकः ॥
तदा तत्र महासत्त्वा बोधिसत्त्वा जिना .. ।

•

3.A + + + + + + सर्व्वे सद्धर्म्म श्रोतुमागता ।
तत्र त श्रीघन दृष्ट्वा सुप्रसन्नाश्रया मुदा ॥
तत्पादाब्ज प्रणत्वा तु सभाया समुपाश्रयेत् ।
सर्व्वे प्रत्येकबुद्धाश्च ह्यर्हत[ ] समुपागता. ॥
भगवन्त तमानम्य तत्रैकान्ते समाश्रयन् ।
श्रावका भिक्षवश्चापि यतयो ब्रह्मचारिण ॥
शास्तार त प्रणत्वा तत्सभाया समुपाश्रयन् ।

...

ब्रह्मादयो महाभिज्ञा भासयन्तः समन्तत ।
दूरात्तं सुगत दृष्ट्वा प्रणमन्त[ ] समागता. ॥

• •

4. तत्र स भगवाञ्छास्ता दृष्ट्वा सर्व्वान् सभास्थितान् ।
सर्व्वसमाोघणा नाम समाधिं विदधे तदा ॥
तस्मिन्नवसरे तत्र रश्मयन्ते प्रभास्वराः ।
भुवनस्य दिश सर्व्वाः भासयन्त 4A समागता ॥
तदा तत्रास्ति सस्पृष्ट विहार तत्र सर्व्वत ।
हेमरत्नमया ह्यासन् स्तम्भा सर्व्वे प्रशोभिता ॥
कूटागाराश्च सर्व्वेऽपि सुवर्णरत्नशोभिता ।
द्वाराणि तत्र सर्व्वाणि हेमरूप्यमयानि च ॥

• •

5 एतन्महाद्भुतं दृष्ट्वा सर्व्वलोका सुरादयः ।
विस्मयाक्रान्तचित्तास्ते पश्यन्त समसुन्मुखा[] ॥
· ·   · ·   ·
तदालोक्य सुधीमान् स बोधिसत्त्वो जिनात्मज ।
कृती सर्व्वस्य वरदो विष्कम्भी 5A सविलोकयन् ॥
यः श्रीमान् महाभिज्ञ आर्य्यावलोकितेश्वर ।
बोधिसत्त्वो महासत्त्व सर्व्वलोकाधिपेश्वरः ॥
भाजितस्यामिताभस्य हृताज्ञः करुणामय ।
लोकधाता सुखावत्या सत्त्वानुद्धर्त्तुमागतः ॥

एवमसौ महासत्त्वो महापुण्य समृद्धिमान् ।
6 इहापि पापिन सत्त्वान् वमुद्धर्त्तुं समागत ॥
इत्यादिष्ट मुनीन्द्रेण श्रुत्वा स सुगतात्मज ।
धीमान् सर्व्वनीवरण[] विष्कम्भी विस्मयान्वित ॥
भगवन्त मुनीन्द्र त समालोक्य सकौतुक ।
लोकेशपुण्यमाहात्म्य दृष्टमेवमभाषत ॥
भगवन् नरकेऽवीचौ महानग्निस्तदोज्ज्वल
वीचीर्न ज्ञायते तस्य ज्वालया महतोऽर्च्चिष ॥
तत् कथ स महासत्त्वो लोकेश्वर कृपान्वित ।
तत्र सत्त्वान् समुद्धर्त्तुं प्रविशति जगद्गुरु ॥
वप्रप्राकारपर्य्यन्तमयोमय महीतलम् ।
6A न्तमहदग्निखदा तत्र प्रोज्ज्वलाग्निशिखाकुला ॥
तस्या सन्योषिना कुम्भी महती तैलपूरिता ।
तस्या मत्ता दुरात्मान पापिष्ठा दुरितारता ।
एव ते प्राणिनो दृष्ट्वा चसह्यवेदनातुरा
स्वदुष्कृताभिभुञ्जन्ते तिष्ठन्ति परितापिता ॥
तत्राप्यसौ महासत्त्वो लोकनाथो जिनात्मज
प्रविष्ट कथमुत्कृत्य सम्प्रेषय शुभे व्रते
बोधिमार्ग प्रतिष्ठाप्य प्रेषणीया सुखावती ।
ये चापि पापिनो दुष्टास्तानपात्यं प्रयत्नत ।

7A प्रबोधय ममालोक्य चारयस्व शुभे सदा ।
इत्येवं वचनं श्रुत्वा सबोधिं यदि वाञ्छसि ॥
बोधिचर्य्याव्रतं धृत्वा सत्त्वरक्ष जगद्धिते ।
यद्येवं कुरुषे लोके दयाधर्म्मरतो वसन् ॥
ततः सद्धर्म्मराजस्त लोकेश्वर जिनात्मजं ।
समीक्ष्य साञ्जलिर्नत्वा सम्प्रयाति स्वमालयं ॥
इत्यादिवाग्वज्रचिरत्नविम्ब समाप्तम् । शुभम् ।

There is also a leaf marked 1, containing the following.—

श्रीभगवत्यै वज्रवैरोचनीदेव्यै नमः ।
देवी त्वमेव गिरिजा कमला त्वमेव ।
पद्मावती त्वमसिता विद्य + + माता ।
व्याप्ता त्वमेव भुवने जगदेकरूपा ।
तुभ्यं नमोऽस्तु म[न]सा वपुषा गिरा च ॥
यानत्रयेषु दश पारमितेति गीता
विस्तीर्णयानगमनाकुलशून्यतेति ।
प्रज्ञाप्रसङ्गमतुलाम्रतपूर्णपात्रा

54

9988

The first leaf of a MS of seasoned palm leaf Written in the Newari character of the sixteenth century *It contains the following* —

सत्त्वार्थएव मम भक्तिरभक्तिरन्या
भक्तिस्तु तस्य मयि यो न कृपा जहाति ।
त्यक्ता कृपा विचरत स्खलितानि यानि
प्रोद्वर्त्तमर्हति कृपेव तु तानि नान्य ॥
तेनार्च्चितोऽस्मि स च शासनधूर्द्धरो मे
सत्त्वेषु यस्य करुणानुगता प्रवृत्तिम् ।
शील श्रुतश्च करुणा च मतिश्च पट्वी
यस्यास्ति तेन सुगतोऽर्च्चित एव नित्यम् ॥

सत्त्वोपकारमधिकृत्य गतोऽस्मि सिद्धिं
सत्त्वार्थमेव तनुमेष समुद्वहामि ।
सत्त्वान् छिनत्ति मनसापि हि यस्य कस्मात्
मामेव संश्रयति+मयि निर्व्यपेक्षः ॥
पूजा तु सा भवति सत्त्वहिता कृपापि
पूज्यस्तान् विहेठयति तेन विहेठितोऽहं ।
सत्त्वोपकारपरमा हि ममाग्रपूजा
सत्त्वापकारपरमस्य पराभवः स्यात् ॥

55

10732 लोकेश्वरशतकटीका *Lokeśvara-śataka-ṭīkā*

By DHARMARĀJA

Substance, Nepalese paper 8×6 inches Folia, 61 Lines 10 on a page Character, Newari Date ? Appearance discoloured

Lokeśvaraśataka is a century of verses in praise of Lokeśvara by Vajradattācārya The present MS contains a commentary on the first 31 verses of Lokeśvaraśataka, by Dharmarāja

It begins —

ॐ नमः श्रीलोकनाथाय ।
नमो गुरवे ।
प्रणम्य धर्म्मराजेन प्रज्ञादेवीं जिनप्रसू ।
क्रियते शतकस्येयं टीका लोकेश्वरी मया ॥

. . .

श्रीवज्रदत्तकविराजौर्व्वादपूर्व्वक श्रीमल्लोकेश्वरावयवमाहात्म्य वर्णयति स्म ॥ भास्वदित्यादि ।

The 60th leaf contains 3 lines and a half only Then there is a leaf written on one side only

For Tibetan translations see Beckh, p 119 A, para 14, p 125 A, para 12, and p 141A, para 55

56

10741C **परमार्थनामसंगीति ।** *Paramārtha-nāma Saṅgīti*

Folia, 21 Substance, Nepalese paper Character, modern Newari See the next number

Colophon —

इति आर्य्यमायाजालात् षोडशसाहस्रिकात् महायोगतन्त्रान्त-पातिसमाधिजालधिपटलाद्भगवन्ततथागतश्रीसाक्यमुनिभाषिता-भगवतो मञ्जुश्रीज्ञानसत्त्वस्य इयपरमार्थानामसंगीति परिसमाप्त ।

Post-Colophon —ये धर्म्मात्यादि etc

लिखित वज्राचार्य्य चिरत्नभद्रेनेति ।

दानपति ते भूसाकोया साक्यभिक्षुभाजनदयात चोपाबिया जुलो ।

यादृश पुस्तक etc

शुभम् ।

Other Colophons —

8B अध्येषणाज्ञानगाथा षोडशः ।

4A प्रतिवचनगाथा षट् ।

4B षट्कुलावलोकनगाथा द्वे ।

6B. वज्रधातुमहामण्डलगाथाश्चतुर्द्दश ।

9B सुविशुद्धधर्म्मधातुज्ञानगाथा पञ्चविंशति ।

10B आदर्शज्ञानगाथा पादोन सार्द्धोदश ।

15B प्रत्यवेक्षणाज्ञानगाथा द्वाचत्वारिंशत् ।

18B समताज्ञानगाथाश्चतुर्विंशतिः ।

20A कृत्यान्तज्ञानगाथा पञ्चदश ।

21A पञ्चतथागतज्ञानगाथास्तुतिपञ्च मन्त्रविन्यास ।

Printed in Russia along with Mahāvyutpatti in 1887 Described by Raja Rajendralal Mitra in Nep Bud. Lit, p 175

There is an illustration of Manjuśrī with 8 hands

Beginning —ॐ नमो मञ्जुनाथाय ।

अथ वज्रधर[.] श्रीमान् दुर्द्दान्तदमक[] पर॰ ।

त्रैलोक्यविजयी वीरो गुह्यराट्कुलिशेश्वर ॥

विबुद्धपुण्डरीकाक्ष प्रोत्फुल्लकमलानन [.] ।

प्रोल्लालय वज्रवचो स्वकरेण मुहुर्मुहु॰ ॥

भ्रुकुटितरंगप्रमुखैः रत्नत्रै वज्रपाणिभि॰ ।

दुर्द्दान्तदमको वीरो वीरवीभत्सरूपीभि॰ ॥

For a Tibetan translation, see Beckh, p. 72, and for the Tibetan translations of its various commentaries see Cord, pp 265—267

57.

10760 **परमार्थनामसंगीति ।** *Paramārtha-nāma Sangīti*

Substance, Nepalese paper with black ground 9×3¼ inches Folia 13—22 and 28—31 (14 by counting) Lines, 5 on a page, of which the first, third and the fifth are in gold and the second and the fourth are in silver The silver lines are mostly faded Written in the Newari character of the 15th century

Fol 16B प्रत्यवेक्षणाज्ञानगाथा द्वाचत्वारिंशत् ४२ ।

Fol 19B, समताज्ञानगाथा चतुर्विंशति २४ ।

The 24th verse runs —

अनङ्गकायाग्र कायाग्र॰ कायकोटिविभावक ।

अशेषरूपसन्दर्शी रत्नकेतु र्महामुणि ॥

22A पञ्चतथागतज्ञानस्तुतिगाथा ।

28A तृतीयचक्रस्येयमनुशंसापदानि द्वापञ्चाशत् ५२ ॥

58.

10759 **अभिधानोत्तर ।** *Abhidhānottara*

Substance Nepalese paper yellow on one side and white on the other 11½×2¾ inches Folia 116 Lines, 9 on a page Character, Modern Newar [illegible] dated in original dated N S 415 = A D 1295 Appearance [illegible]

A work of Buddhist Tantra See Nep Bud Lit, pp 1—3 For a Tibetan translation of Abhidhānottara, see Beckh, p 75, para 5

It is complete in 3 + 66 patalas The manuscript noticed by Rajendralāla is defective as it contains 65 patalas

2A, इत्यभिधानोत्तरे अवतारणसमयगुह्यरहस्यपटल प्रथम , 4B, ॰ प्रार्थनापटलो द्वितीय , 8B, ॰ हृदयतत्त्वपरमार्थपटलस्तृतीय ।

15A, इति कायसम्वरविधिपटल प्रथम 18A, महासुरतपद्मजालसम्वरमभिधानोत्तरपटलो द्वितीय , 20B, अभिधानोत्तरे सम्वरगुह्यपालिपटलस्तृतीय:, 23B, इत्यभिधानोत्तरसमये सम्वरपटलश्चतुर्थ , 24B, इत्यभिधानोत्तरे पीठपञ्चक्रमपटल पञ्चम:, 29B, ॰ सर्व्वे अनवस्थितक्रमभेदविधानो नाम षष्ठ पटल ; 33A, ॰ मञ्जुवज्रविधिपटल त्रिचक्रोल्लिप्तसप्तम , 40A, इत्यभिधानोत्तरोत्तरे योगीनीपीठसिद्धिक्रमनिमित्तनिर्द्देशो नाम नवम पटल , 48B, ॰ कोषप्रस्तावपाठसम्प्रदायपटलो दशम:, 49B, ॰ पीठादियोगिनी एकादशपटल , 50A, ॰ श्रीहेरुकडाकिन्या वीरयोगिन्या डाकिन्या भावनोत्पत्ति द्वादशम पटल , 51A, ॰ आदिकर्मकयोगभावनापटल त्रयोदशम , 52A, ॰ मध्येन्द्रियभावनोपदेशपटलश्चतुर्द्दश , 54B, ॰ तीक्ष्णेन्द्रियभावनोपदेशपटल पञ्चदशम , 55B, ॰ चतुर्डाकिनीयोगसम्वरविधिपटल षोड़शम , 58A, इत्यभिधानोत्तरे योगसम्वरविनयपटल सप्तदशम , 59A, अभिधानोत्तरोत्तरे प्रत्यङ्गिरापटलोऽष्टादशम , 60A, ॰ अमृतसञ्जीविन्या सर्वकर्मकारी नाम भावनापटल ऊनविंशतितम: ; 61B, ॰ योगिनीगुह्यसमयतत्त्वावतारणपटलो विंशतितम:, 63B, ॰ कुलषट्चक्रवर्त्तिसम्प्रदायपटल एकविंशतितम , 64A is left blank, 67A, ॰ कायवाक्चित्तपीठानुक्रमपटलो द्वाविंशतितम , 68B, ॰ समयोत्थापनबुद्धकापालोत्पत्तिस्त्रयोविंशतितम , 69B, ॰ वज्रसत्त्वोत्पत्तिपटलश्चतुर्विंशतितम , 70A, ॰ मञ्जुवज्रसाधनपटल पञ्चविंशतितम , 71A, इत्यभिधानोत्तरे डाकवज्रसाधनपटल षड्विंशतितम , 72B, ॰ महारहस्य आलिडाकस्य साधनपटल सप्तविंशतितम', 73B, अभिधानोत्तरोत्तरे प्रश्नडाकसिद्धिनिमित्तनिर्द्देशपटलो नामाष्टविंशतितम , 76B, ॰ समयसम्वरोद्भवे महामण्डलराजा नाम ऊनविंशतितम पटल' २८ (This should be the 29th

—a clerical error), 77B, ॰ धृतगुणोत्पत्तिपटलस्त्रिंशतितमः, 79A, ॰ वर्षापणविधिपटल एकत्रिंशतितम, ॰ विश्वरूपसाधनपटलो द्वात्रिंशत्तम; 80A, ॰ श्रीगुह्यसमयोत्तमपटल त्रयस्त्रिंशत्तम, 81B, ॰ कवचहृदययागोत्पत्तिभावनापटलश्चतुस्त्रिंशत्तम, 82A, ॰ छोमापटलः पञ्चत्रिंशत्तम·, 83A, ॰ योगिनीलक्षणपटल षट्त्रिंश·, 83B, ॰ डाकिनीलक्षणपटलः सप्तत्रिंशत्तम, 84B, ॰ लामालक्षणपटलो अष्टत्रिंशत्तम, 85A, ॰ अङ्गमुद्रालक्षणपटलश्चत्वारिंशत्तम·, ॰ डाकिन्यङ्गमुद्रापटलः एकचत्वारिंशत्तम; 86A, ॰ डाकिनीछोमालक्षणपटलो द्वाचत्वारिंशत्तम, 87B, ॰ भूतसौख्याम्बुपरतलस्त्रिचत्वारिंश·, 88A, ॰ डाकिनीवीरकर्मप्रसरसाधकयोगिनीवीरहृदयाद्वयपटलश्चतुश्चत्वारिंशतितम·; 89B, ॰ पटप्रतिमाविधिप्रतिष्ठाधिवासन पञ्चचत्वारिंशपटल, 91B, ॰ मण्डलविधिपटल· षट्चत्वारिंशतम, 92B, ॰ गायत्र्या सन्ध्यापटल· सप्तचत्वारिंशत्, 93A, ॰ उपहृदयसाधनोत्पत्तिभावनापटलोऽष्टचत्वारिंश; 95A, ॰ द्वाविंशत्युत्तरहृदयोत्पत्तिभावनापटल एकोनपञ्चाश, 96A, ॰ मण्डलविधिपटल· पञ्चाश, 97A, ॰ धर्मधातुपुरभावनापटल· एकपञ्चाश, 97B, ॰ गुह्यभावनापटलो द्वापञ्चाशत्तम, 100A, ॰ गुह्याक्षरोत्पत्तिसाधनपटल त्रिपञ्चाश; 102A, ॰ मूलमन्त्रखटिकोद्धारपटल चतु·पञ्चाश, 104A, ॰ कवचहृदयभावनापटल पञ्चपञ्चाश, 104B, ॰ हृदयमन्त्रकवचो देव्या हृदयभावनापटल षट्पञ्चाश, 106A, रक्षाचतुर्मुखाधिष्ठानलिपिमण्डलचतु क्रोधवज्रहुङ्कारोत्पत्तिखटिकोद्धारपटल सप्तपञ्चाश·, 106B, ॰ वर्गयोगपटलोऽष्टपञ्चाश·, 109A, ॰ ज्ञानगुह्यपटल षष्ठितम, 110A, ॰ चतुर्देव्या सम्पुटगुह्यपटल एकषष्ठितम, 110B, वज्रभैरवक्रोधाधिपतिसम्पुटोद्घाटपटलो द्वाषष्ठितम, 112B, ॰ सप्तजन्मपशुसाधनपटलस्त्रिषष्ठितम, 114B, ॰ स्वाधिष्ठान स्वधर्मोत्तरोत्पत्तिभावनापटलश्चतु षष्ठितम, 115B, ॰ आत्मभावपूजापटल पञ्चषष्ठितम, (*Last Colophon*) इत्यभिधानोत्तरोत्तर नाम सम्बरगुह्यातिगुह्यरहस्यमहातन्त्रराजानन्निक्तोत्तत्त्वोपदेशभावनापटलः षट्षष्ठितम ।

अभिधानोत्तरोत्तरा नाम महातन्त्रराज समाप्त ।

Post-Colophon —ये धर्म्मा इत्यादि ।

शुभ श्रेयोऽस्तु संवत् ४१८ मिति आश्विनकृष्ण अमावास्या तिथौ आदित्यवासरे लिखित सम्पूर्णम ।

End —एवमवोचद्भगवान् वज्रसत्त्वस्ते च सर्व्वतथागतक्रोधराजाभिधानो-
त्तरोत्तरे डाकडाकिनीजालसंवर भगवतो भाषितमभ्यनन्दन्निति ।

59

10846 **हेरुकतन्त्र (सम्बरोदय)।** *Heruka Tantra (Sambarodaya)*

A Tantra of the Sahajia sect—purporting to be an extract from Heruka Tantra, extending over 300,000 verses

Substance, thick Nepalese paper with black ground 13½ × 3½ inches Folia, 82 Lines, 5 on a page Extent in ślokās, 1600 Appearance, fresh Complete Written in gold, in N S 948 = A D 1828

Last Colophon —

इति श्रीहेरुकाभिधाने तन्त्रराजे त्रिलक्षोद्धृतसम्वरोदयकल्पे
श्रीमहासम्बरोदयतन्त्रराजे सर्व्वयोगिनीरहस्यविपठितसिद्धे त्रयो-
त्रिंशतितमः पटलः समाप्त ।

Post-Colophon statement —

ये धर्म्मा? etc शुभसंवत् ६४८ मि आषाढशुक्ल पञ्चमि भृगु
रेवति कुन्हुत्यवते पुस्तक सिधयकादिन जुरो ॥

दानपति जयमान महतारथ पु सा रयताखा वाहाल यातामकार वीरघ
सिंह पुत्र वीरनरसिंह ध्वजविरसिंह चिकिधिधन पौत्र धनसि विरभद्रसि ज्ञान-
विरसिं पुत्रपत्नी भागेलक्ष्मी सुर्य्यलक्ष्मी रक्ष्मी पौत्रपत्नी दयालक्ष्मी पौत्री
जितालक्ष्मी वसुन्धरी शुभलक्ष्मी विश्वलक्ष्मी युते परिवारसमुच्चयेन चोद्धावरस
वीरधंसिंहन यशोनामन दिव गत सभार्य्या चन्द्रलक्ष्मीनामन सम्बरोदयतन्त्रराज
चोचक दयका जुरो ॥

थ्ययतेया पुण्यन सकलपरिवारया इह लोकससुखसम्पत्ति परजन्मसलुखावती
सवास जुयमाल जुर शुभ ॥

श्रीऽ महावैरोचन प्रतिमा दयका जुरो ।

लिखितेय सुवर्ण्णपनादि महानगलसे श्रीपुर महाविहाला श्रीवज्राचार्य्य
धिर्ज्जनरसिंहेन लिखिता ।

यथा दृष्ट तथा लिखिता यदि शुधमशुध वा सोधनीय बुधैर्गुनै ॥

For a Tibetan translation, see Beckh, p 76, para 2

Beginning —

ॐ नम. श्रीवज्रसत्त्वराय

एवं मया श्रुतमेकस्मिन् समये भगवान् सर्व्वतथागतकायवाक्-चित्तवज्रयोगिनीभगेषु विजहार। आर्य्यानन्दप्रभृति-वीतराग-प्रमुखैरार्य्यावलोकितेश्वरादिरशीतिकोटियोगिनी च मध्ये वज्र-पाणि अवलोक्य स्मितमकार्षीत्।

वज्रपाण्युत्थायाशनादेकांसमुत्तरासङ्गं कृत्वा दक्षिणजानुमण्डलं पृथिव्या प्रतिष्ठाप्य कृतकरपुटो भूत्वा भगवन्तमध्येषयामास।

श्रोतुमिच्छामि भगवन् उत्पत्तियोगलक्षण।

उत्पन्नं च कथ देव सर्व्वाकारैकसवर ॥

कथ वायु आपश्च पृथिव्याकाशमेव च।

पञ्चाकार कथ देव षड्विधश्च तत प्रभो ॥

कथ त्रिकायमधिष्ठान बाह्य वाभ्यन्तरे स्थिति।

कथं ते देवतारूप कथयस्व देवतौ प्रभो ॥

चन्द्रसूर्य्य कथ देव पथ पञ्च कथ भवेत्।

कथं ते शरीरस्वभावन्तु नाडीरूप कथं तत ॥

के ते नाडी प्रमाणस्य शनिरयिण्डि तत् कथ।

समयसङ्केतच्छोमस्य कथयस्व मम प्रभो ॥

के ते पीठादिसङ्केत बाह्याध्यात्मकमेव च।

कथ भूम्यादिलाभस्य कथ निमित्तदर्शनम् ॥

कथ ते द्वादशकर्म्म मन्त्रजाप कथ भवेत्।

अक्षमाला कथ युक्ति के ते जापस्य लक्षणम् ॥

के ते मण्डलमावर्त्त देवताकारयोगत।

सिद्धिमन्त्र कथ देव कौमारीतर्पण कथं ॥

के ते दिवसेन कर्त्तव्य अलिबलि कथ प्रभो।

पञ्चामृतादि कथ देव पञ्चाकुशश्च तद् भवेत् ॥

कथयस्व मण्डलालेख्यं सूत्रपातं कथ भवेत् ।
कथ ते भूमि सशोध्यं रक्षाचक्र कथ भवेत् ॥
आचार्य्यं केन कर्त्तव्य कथ शिष्यस्य सग्रहं ।
के तेऽभिषेक प्रमाणाश्च चतुर्थश्च कथम्भवेत् ॥
कथ कालस्य नियम मृत्युवञ्चनमेवच ।
के ते चतुर्युगाख्यस्य चतुर्द्वीप कथं भवेत् ॥
युगे युगे कथ सिद्धि चर्य्याचारि कथं भवेत् ।
के ते योगिनीतन्त्रस्य योगतन्त्र कथ भवेत् ॥
कथ सूत्रान्त' प्रमाणस्य के ते पारमिता तथा ।
प्रतिष्ठाहोमयागस्य सिद्धिमन्त्र कथ भवेत् ॥
रसायन कथं देव मद्यपानं कथं भवेत् ।
मन्त्रोदय कथ देव मन्त्रोद्धार कथं भवेत् ॥
निग्रहश्च कथ देव अनुग्रहश्च कथं भवेत ।
तत्त्वाच कथ भगवन् शून्यता करुणा कथ ॥
कथ शून्यस्वभावत्व कथं तथतास्वरूपकम् ।
देवरूप कथ नाम योगिनीलक्षणा वली ॥
सर्व्वधर्म्मपरिज्ञान भावाना कथय प्रभो ॥

3A. इति श्रीसम्बरोदयतन्त्रस्य अध्येषणापटल प्रथम ।
5A इति उत्पत्तिनिर्द्देशपटलो द्वितीय ।
6A. इति उत्पन्नक्रमनिर्द्देशपटलस्तृतीय ॥
8A इति चतुर्भूतपञ्चाकारषड्विषयदेवताविशुद्धिपटलश्चतुर्थ ।
12B. इति चन्द्रसूर्य्यक्रमोपदेशपटल पञ्चम ।
13B इति पद्मपञ्चकनिर्द्देश षष्ठमः ।
15A इति नाडीचक्रक्रमोपायपटल सप्तम ।
18A. इति समयसङ्केतविधि पटल अष्टम ॥
20A इति क्षेत्रपीठसङ्केतभूमिनिर्द्देशपटलो नवम ।
24A इति कर्म्मप्रसरोदयो नाम पटलो दशम ।
26A इति मन्त्रजापनिर्द्देशपटल एकादशम ॥

27A. इति मन्त्रजापाद्यमालानिर्द्देशपटल द्वादश ।

30B. इति श्रीहेरुकोदयनिर्द्देशपटलस्त्रयोदशम ।

32A इति वज्रयोगिनिपूजाविधिनिर्द्देशपटलचतुर्द्दश ।

33B इति पात्रलक्षणनिर्द्देशपटल पञ्चदश ।

34B इति पञ्चामृतसाधननिर्द्देशपटल षष्ठदश ।

37B इति मण्डलसूत्रपातनविधिलक्षणोनिर्द्देशपटल सप्तादश ।

40A इति अभिषेकपटल अष्टादश ।

43A. इति मृत्युनिनिर्त्तिदर्शन उत्क्रान्तियोगपटल एकोनविंशति ।

43B. इति चतुर्युगनिर्द्देशपटल विंशति ।

45B. इति चर्य्याव्रतनिर्द्देशपटल एकविंशति

47A. इति देवताप्रतिष्ठाविधिपटलो द्वाविंशति ।

51B. इति होमनिर्द्देशपटलस्त्रयोविंशति

56A इति कर्म्मप्रसरोविधिप्रयोगनिर्द्देशपटलश्चतुर्विंशतितम ।

58A इति रसायणविधि पटलः पञ्चविंशति ।

62A. इति वारुणीनिर्द्देशपटल षड्विंशतिम ।

66A. इति मन्त्रोद्धारणविधिपटल सप्तविंशति ।

68B. इति होमविधि पटल अष्टाविंशति ।

70A. इति तत्त्वनिर्द्देशपटल एकोनत्रिंशति ।

72A इति चित्रादिरूपलक्षणनिर्द्देशपटलस्त्रिंशति ।

75B इति चतुर्योगिनीनिर्द्देशक्रमसंबोधिचित्तसंक्रमनपटल एकत्रिंशति ॥

78B. इति बल्युपहारनिर्द्देशपटलो द्वात्रिंश ।

The last colophon has been quoted above All the queries put to *Bhagavān* are thus fully answered in the thirty-three paṭalas.

The work ends thus —

अहो सौख्यं अहो सौख्यं अहो सुक्ष कथ कथं ।
अहो सहजमाहात्म्य सर्व्वधर्म्मस्वभावता ॥
दृश्यते च जगज्वलेन्द्रतद्वत
श्रूयते च प्रतिध्वनैकसद्वत ।

पश्यते च मरुमरीचिसन्निभा
प्राणपानगगनोपमोदिता ॥
यदा जिघ्रते न भक्ता सुगन्धवत्
ग्रसते च खल ग्रसा सूर्य्यं यथा ।
संस्थिताश्च गिरिमेरुतत्सम
आलम्बनस्वप्नादमालिका तथा ॥
मायेन्द्रजालव्यवहारमात्रगता
एवं यथा सहजसौख्योदय तथा ।
भावस्वभावरहिता विचिन्त्यरया
नित्योदित सुगतमार्गवर नमोऽस्तु ॥
सर्व्वपूजां परित्यज्य गुरुपूजां समारभेत् ।
तेन तुष्टेन तल्लभ्यते सर्व्वज्ञज्ञानमुत्तमम् ॥
किं तेन न कृतं पुण्यं किंवा नोपासितं तपः ।
अनुत्तरकृताचार्य्यवज्रसत्त्वप्रपूजनात् ॥
अथ पापहराश्चैव+ + + + +सात्त्विकः ।
समयाचाररक्षाचक्रसमयं तस्य प्रदर्शयेत् ॥
श्रीहेरुकाविधानतन्त्रस्य पाठस्वाध्यायलेखनात् ।
सिद्धिर्म्रद्धिश्च सौभाग्य बोधिसत्त्वत्व प्राप्नुयात् ॥
श्रीसम्बरोदयतन्त्रस्य भाविते चिन्तिते यदा ।
महाभाग महासौख्य दारिद्र्यदुःख नश्यति ॥
सर्व्ववीरसमायोगडाकिनीजालसम्बरं ।
नानाधिमुक्तिका सत्त्वाश्चर्य्या नानाविबोधिता ॥
नानानयविनेयान्तमुपायेन तु देशिता ।
गम्भीरधर्म्मनिर्द्देशे नानाधिमुक्तिका यदि ॥
प्रतिक्षेपा न कर्त्तव्या अचिन्त्या सर्व्वधर्म्मताः ।
शून्यताकरुणाभिन्न अचिन्त्यो बुद्धनाटक ॥
श्रीहेरुकसमायोग डाकिनीवृन्दमाश्रीत ।
सत्त्वावतारमुक्तिन्तु तत्र सर्व्वत्र रता इव ॥
सर्व्वडाकिनीसमायोगा श्रीहेरुकपदे स्थिता ॥

60.

9986 हेरुकतन्त्र (सम्बरोदय) । *Heruka Tantra (Sambarodaya)*

Substance, seasoned palm-leaf 12 ×2' Folia, 9—marked 2 11, 12 13 (the last two completely effaced) 17, 21, 23, 26, 28 Written in the Newari character of the 14th century, except the leaves 2, 23, 26, 28 which seem to be a restoration by a much later hand Appearances, faded Lines 5 on a page There are two holes, one on the right and the other on the left of the centre

Colophons —

2B, इति सम्बरोदयतन्त्रस्य अध्येषणा पटल प्रथम , 11A, इति पथपञ्चकनिर्द्देशपटल षष्ठम , 13B, इति च्छोम्मापीठसङ्केतभुमिनिर्द्देशपटल. नवम , 21B, इति मन्त्रजापनियमनिर्द्देशपटल एकादशम , 23A, इति हेरुकोदयनिर्द्देशपटलस्त्रयोदशम , 28B, इति पात्रलक्षणनिर्द्देशपटल पञ्चदशम ।

See pp 76 and 177 of my Nep Cat for 1915

61.

9988 तत्त्वज्ञानसंसिद्धि । *Tattvajñāna Samsiddhi*

Substance, seasoned palm-leaf 12 ×1½' Folium, one, very nearly faded Character, Newari of the 14th century

The last leaf of the work

Colophon —इति तत्त्वज्ञानसंसिद्धि समाप्ता ।

शुभमस्तु सर्व्वजगताम् ।

Two commentaries on this work are known from my Nep Cat 1915, pp 45 and 46—one, entitled Marma-Kanikā, a Pañjikā commentary, written by Bhiksu Vīrya Śrī Mittra of Vikramaśīla, which has a Tibetan translation (see Cord , p 63), the other, Mahāsukhaprakāśikā by Dhyānacandra with the title of Madhyamakaruc

The first is a palm-leaf manuscript in the Durbar Library (No IV, 864E) The second is a paper MS in the same library (No III, 592) This is a fragment of the text, not yet found

62.

3828 **सम्पुटतिका** or **सम्पुटोद्भवकल्पराजः ।** *Samputatikā* or *Samputodbhava Kalparāja*

Substance, seasoned palm leaf 12¼ × 2 inches Folia, 85, of which the last seems to be a restoration There are two leaves marked 11 Lines, 8 and 9 on a page Extent in slokas 2,200 Character, old Newari Date N S 145 = 1025 A D (of the restored leaf) Complete

The first two leaves are injured but the injuries have been repaired by pasting paper and writing the lost portion in a later hand Generally the ink is fresh except in the last but one leaf

Last Colophon —इति श्री सम्पुटोद्भवसर्व्वतन्त्रराजे सर्व्वकल्पनिदानतिलके एकादशम । इति सम्पुटतिका नाम महातन्त्रराज समाप्त । ये धर्मा इत्यादि ।

Last Colophon statement —सवत् १४५ भाद्रपद शुदि १२ जिनाधरि (?) सपूर्ण देय + + + + श्री गुणवर्ममह[ख]विर श्रीप्रज्ञाजुरी पीतक ।

For a Tibetan translation see Beckh, p 77, para 8

It begins —

एव मया श्रुतमेकस्मिन् समये भगवान् सर्व्वतथागतकायवाक्चित्तवज्रयोषिद्भगेषु विजहार ॥ तत्र खलु भगवानप्रीतिकोटियोगीश्वरमध्ये वज्रगर्भमवलोक्य स्मितमकार्षीत् । समनन्तरस्मितेऽस्मिन् वज्रगर्भ उत्थायासनादेकांशमुत्तरासङ्गं कृत्वा दक्षिणं जानुमण्डलं पृथिव्या प्रतिष्ठाप्य कृताञ्जलिपुटो भगवन्तमेतदवोचत् । श्रोतुमिच्छामि ज्ञानेन्द्र सर्व्वतन्त्रनिदान रहस्य सम्पुटोद्भवलक्षणम् । अहो वज्रगर्भ साधु साधु महाक्षप साधु साधु महाबोधिसत्त्व साधु

साधु गुणाकरा यद्रहस्य सर्व्वतन्त्रेषु तत्सर्व्वं पृच्छतेच्छया।
अथ ते वज्रगर्भप्रमुखा महाबोधिसत्त्वा प्रहर्षोत्फुल्ललोचना
पृच्छन्तीह स्वसन्देहान् प्रणिपत्य मुहुर्मुहुः सर्व्वतन्त्र किमुच्यते
निदान कथम्भवेत् रहस्येत्यत्र किमुच्यते सम्पुटोद्भव कथ नाम-
लक्षण, तन्त्र कथम्भवेत्। भगवानाह .

सर्व्वे च ते तन्त्राश्च सर्व्वतन्त्रा सर्व्वतन्त्रशब्देन समाजादय तेषा निदानभूत निश्चितमित्यर्थ। हरिहरहिरण्यगर्भश्रावकप्रत्येकबुद्धानामगोचरत्वात् रहस्य। सम्पुटं प्रज्ञोपायात्मकं तदेवोद्भवं सम्पुटसमाधिरित्यर्थ। उद्भव उत्पत्ति एवम्भूत-स्थिरचलभावस्वभावात्मक लक्ष्यत इत्यनेन लक्षण।

3B. इत्यभिधानाभिधेयबोधिचित्तोत्पादादिभावनातत्त्वप्रकरण प्रथम, 5B, इति पञ्चेन्द्रिय पञ्चबल सप्तबोध्यङ्गार्य्याष्टाङ्गमार्गपर्य्यन्तादिविवरण बोधि-चित्तावतार नाम द्वितीयप्रकरणम्, 8B, इति सर्व्वतन्त्रनिदानरहस्यात् सम्पु-टोद्भवकल्पराज प्रथम समाप्त।

10B, इति बोधिचित्ताभिषेको द्वितीयस्य प्रथम प्रकरणम्, 11B प्रज्ञोपायार्थभावना द्वितीयस्य द्वितीय प्रकरणम्, 12A, द्वितीयस्य तृतीय प्रकरणम्, 14B, सर्व्वतन्त्रनिदानरहस्यात् श्रीसम्पुटोद्भवकल्पराजो द्वितीय।

16A, इति हेरुकोत्पत्तिस्तृतीयस्य प्रथम प्रकरणम्, 17A, इति तृतीयस्य द्वितीयम्, 18A, इति तृतीयस्य तृतीय प्रकरणम्, 21B, इति सम्पुटोद्भव-कल्पराजस्तृतीय।

22A, अक्षरवाकच्छोम्मा चतुर्थस्य प्रथमप्रकरणम्, 22B, इति कट पूतनीचिह्नमुद्रा चतुर्थस्य द्वितीयं प्रकरणम्, 24A, इति चिह्नमुद्रा चतुर्थस्य तृतीयं (प्रथम (?)) प्रकरणम्, 24B, इति सम्पुटोद्भववज्रडाकिनीसंकेत-कल्पराजश्चतुर्थ।

25A, इति मेलापकस्थानं पञ्चमस्य प्रथमप्रकरणम्, 27A, इति स्कन्ध धात्वायतनविशुद्धि पञ्चमस्य द्वितीयं प्रकरणम्; 28B, चर्य्यालिङ्गनं पञ्चमस्य तृतीयं प्रकरणम्, 30A, इति सम्पुटोद्भवचर्य्याकल्प पञ्चम।

32A, षष्ठस्य प्रथम प्रकरणम्, 33A, देहन्यास षष्ठस्य द्वितीयं प्रकरणम्, 35A, षष्ठस्य तृतीय प्रकरणम्, 37A, इति श्रीसम्पुटोद्भवमहातन्त्रे वसन्ततिलकं नाम कल्पराज षष्ठ।

41A, अथ कर्म्मविधि वक्ष्ये येन सिध्यन्ति साधका, 41B, अथ रसायनविधि वक्ष्ये सर्व्वसारसमुच्चयम्, 42B, उद्वर्त्तनविधि, 43A, इति सर्व्वज्ञानोदयो नामायुर्वेद्य सप्तमस्य प्रथम प्रकरणम्, 45A, इति होमविधि सप्तमस्य द्वितीयप्रकरणम्, 49B, सर्व्वकर्म्मप्रसरचक्रोदयो नाम सप्त[म]स्य तृतीय प्रकरणम्, 55B, इति श्रीसम्पुटोद्भवे महातन्त्रे सर्व्वकर्म्मध्यानोदयो नाम कल्पराज सप्तम समाप्त ।

56A, इति घण्टातत्त्व अष्टमस्य प्रथमप्रकरणम्, 57A, इति मन्त्रशाप भावना अष्टमस्य द्वितीय प्रकरणम्, 58A, इति तीर्थिकाज्ञानापनयन नाम अष्टमस्य तृतीय प्रकरणम्, 59B, इति सम्पुटोद्भवसर्व्वक्रियासमुदयकल्पराजोऽष्टम ।

60B, इति सर्व्वतथागतोत्पत्तिर्नवमस्य प्रथम प्रकरणम्; 61B, इति वस्तुपहारो नवमस्य द्वितीय प्रकरणम्, 62B, इति पटपुस्तकनिर्णयो नाम नवमस्य तृतीय प्रकरणम्, 63A, इति सम्पुटोद्भवचतुष्क्रियातत्त्वराज नवम कल्प ।

63B, इति आचार्य्यमहासाधन दशमस्य प्रथम प्रकरणम्; 64A, इति महासुखसिद्धिपूजासत्कारो नाम दशमस्य द्वितीय प्रकरणम्, 64B, इति बुद्धमायाविकुर्व्वित नाम दशमस्य तृतीयं प्रकरणम्, 65A, इति सम्पुटोद्भवसर्व्वतन्त्रनिदानमहाराज दशम समाप्त ।

There are no sections in the eleventh chapter the colophon of which is quoted above

63.

4851 **सम्पुटोद्भवकल्पराज ।** *Samputodbhava Kalparāja*

Substance, palm-leaf 12×2 inches Folia 91 Lines, 6 on a page Extent in slokas, 2,200 Character, Bengali of the early 12th century Appearance, old and discoloured Complete

Colophon —इति सँ श्रीसम्पुटोद्भवसर्व्वतन्त्रनिदानमहाकल्पराजः दशम समाप्त ।

In a later Newari hand

ॐ मनिपद्मङ्कार धर्म्मधातुसमुद्भव ।
यावतोदयपर्य्यन्तं तावद्बोधिकरण्डक ॥
मनिप्राण मडाधार पद्मसानन्दगुह्यष्टक ।
प्रणवाग्निसंयुक्त' ह्य + + + + ॥ (?)

The same work as the preceding ending in the tenth chapter

64.

8070 **गुह्यसमाज** । *Guhyasmāja*

Substance, palm-leaf $11\frac{1}{4} \times 2$ inches Folia, 73 Lines, 5, 6, 7 on a page Character, old Newari The script agreeing with that of A D 1025—1065, as shown in Bendall's Table of Letters (Catalogue of the Buddhist Sanskrit Manuscripts in the University Library, Cambridge) Appearance, old, worn out and discoloured Complete

There are two restorations in this MS The original was written in the beautiful Newari of the 11th century This portion comes up to fol 46 marked in letter numerals The rest of the work up to 68 is a restoration on palm-leaf in a different and a later hand Among the original 46 leaves 10, 12, 13, 23 were lost and they have been restored in 9 paper slips. Hence the work is complete now in 73 leaves The left-hand marks do not agree with the right-hand ones as the latter includes restorations. The work is complete in 18 patalas

This is the first of the three parts of Guhya Samāja-Tantra. See Rajendralāla's Nep Bud Lit, pp 261—264, Cambridge Catalogue of Bendall, pp 15—17 It consists of 18 chapters (patalas). For the other parts of Guhyasamāja see Cam Cat, pp 70—73 and pp 140—141

For a Tibetan translation see Beckh, p. 85, para 11, where it is called Sarva-Tathāgata-Kāya-vāk-citta-rahasya-Guhyasamāja-nāma-Mahā-kalpa-rāja

65.

10761 **वसुधारणी** or **वसुधारासंगीति** । *Vasudhāraṇī* or *Vasudhārāsamgīti*

Substance, Nepalese paper, with black ground Folia, 14 (by counting), marked (with letter numerals on one side and figures on the other) 1 2 3 5, 6

9 and 12 to 19 Lines, 5 on a page of which the first, third and the fifth are in gold and the second and the fourth are in silver The silver lines have faded away more or less everywhere Character, Ornamental Newari (Lanza) of the early 13th century

A ritual of Vasudhārā—the mother-earth—in the form of a Saṃgīti

After invocation and preface it begins in 3A

एवं मया श्रुतमेकस्मिन् समये भगवान् महानगर्य्यां विहरति स्म

तस्मिन् खलु पुनः समये कौशाम्ब्यां महानगर्य्यां सुचन्द्रो नाम गृहपतिः प्रतिवसति स्म ।

See Bendall's Cam Cat, p 65

66.

4727 **लघुकालचक्रतन्त्रराजटीका ।** *Laghukāla-cakra-Tantrarāja-Tīka* entitled *Vimalaprabhā.*

Substance, palm-leaf 19×2½ inches Folia, 55 Lines, 6 on a page Character, Newari of the 15th century Appearance, old and discoloured Incomplete at the end

The text was translated into Tibetan See Beckh, p 73, para 3 For the Tibetan translation of the Commentary see Cord, p 15, Bundles 109, 110

Beginning —

नमो मञ्जुनाथाय ।

नमः श्रीकालचक्राय शून्यताकरुणात्मने ।

त्रिभवोत्पत्तिक्षयाभाव ज्ञानज्ञेयैकमूर्त्तये ॥

साकारा च निराकृति भगवती प्रज्ञा तयालिङ्गित

उत्पादव्ययवर्ज्जितोऽक्षरसुखो हास्यादिसौख्योज्झितः ।

बुद्धाना जनकस्त्रिकायसहित त्रैकाल्यसंवेदकः

सर्व्वज्ञः परमादिबुद्ध (द्ध) भगवान् वन्दे तमेवाद्वयम् ॥

बुद्धं सिंहासनस्थं त्रिभुवनमहितं वज्रयोगैर्विशुद्ध-
तत्त्व[ं] कायप्रभेदे न भवभवगतं षोडशाकारमेकम् ।
ज्ञानज्ञेयैकभूतं जिनवरसमयं द्वादशाकारमङ्गै
सत्वार्थे बोधिचित्तं जिनकुलिशपदं कालचक्रं प्रणम्य ॥
सर्व्वज्ञो ज्ञानकायो जिनपतिसहजो धर्म्मकायस्तथा च
सम्भोगो निर्म्माणकायोपि दिनकरवपुष मद्यमत्रायताच्च ।
योगशुद्धो विमोक्षे मतिभवविभवै कायवाक्चित्तरागै
प्रज्ञोपायोऽद्वयो यो ह्यसुरदनुनुत' तं प्रणम्यादिबुद्धम् ॥
शून्यताज्ञानसंशुद्धं विशुद्धं ज्ञानमक्षरम् ।
अनिमित्तज्ञानसंशुद्धं धर्म्मात्मा चित्तमद्वयम् ॥
वागप्रणिहितज्ञानशुद्धो मन्त्रोक्षयोऽध्वनि ।
एवमनभिसंस्कारज्ञानशुद्धोच्युनाविल· ॥
प्रज्ञोपायात्मको योग सस्थानकायवर्द्धिग ।
वज्रसत्त्वो महासत्त्वो बोधिसत्त्वो तथागत ॥
उक्तसमयसत्त्वो यो भावाभावाक्षयो विभुः ।
अनादिनिधन शान्तो बोधिचित्तं प्रणम्य तम् ॥
निर्म्माणकायवाक्चित्तज्ञानैकं योगसम्बरम् ।
सम्भोगकायवाक्चित्तज्ञानैक योगसम्बरम् ॥
श्रीधर्म्मकायवाक्चित्तज्ञानैकं योगसम्बरम् ।
सहजकायवाक्चित्तज्ञानैकं योगसम्बरम् ॥
जाग्रत्स्वप्नसुषुप्तन्तु न तुर्य्येन्द्रियजं सुखम् ।
न ज्ञानचित्तवाक्कायचतु स्थानेषु संस्थितम् ॥
कर्म्ममुद्रापरित्यक्ता ज्ञानमुद्राविवर्ज्जितम् ।
महामुद्रासमुत्पन्न सहज नान्यथा सह ॥
विकल्पभावनातीत महामुद्राक्षर सुखम् ।
ग्राह्यग्राहकसस्थानकल्पजल्पविवर्ज्जितम् ।
गन्धर्व्वनगराकारं प्रतिसेनाखरूपकम् ॥
प्रज्ञोपायात्मकं योग एवकार प्रणम्य तम् ।
परमाणुधर्म्मतातीता प्रतिसेनाखरूपिणीम् ॥

सर्व्वाकारवरोपेता महामुद्रा प्रणम्य ताम् ।
जननी सर्व्वबुद्धाना उत्पादक्षयवर्ज्जिताम् ॥
चर्य्या समन्तभद्रस्य विश्वमाता प्रणम्य ताम् ।
आलिकालिसमापत्तिऊफट्कारादिवर्ज्जित ॥
अक्षरोद्भवकायश्च कालचक्र प्रणम्य तम् ।
सर्व्वज्ञ ज्ञानकायाख्य मार्त्तण्डवपुष विभुम् ॥
पद्मपत्रायताक्ष त तत्त्व षोडशभेदत ।
चतु कायात्मक बुद्ध वज्रसिहासनस्थितम् ॥
स्तुत सुरासुरैर्नत्वा सुचन्द्राध्येषित पुरा ।
शुद्धज्ञानैकयोगो जिनवरसमयस्त्रित्तधर्म्मैकयोगो
वाक्सम्भोगैकयोगस्त्रिभुवनमहित: कायनिर्म्माणयोग ।
ज्ञानज्ञेयोदयोसौ गतभवविभवो वज्रसत्त्वश्चतुर्द्धा
प्रज्ञोपायात्मक त न्सुरदनुनुत वज्रयोग प्रणम्य ॥
एक पद वज्रमणौ रजोऽर्को
उष्णीषशुक्रे शशिनि द्वितीयम् ।
न्यस्त महाच्छेद्यमभेद्यमिष्ट
भर्त्तुस्त्रिलोकमहित शिरसा प्रणम्य ॥
वाय्वग्निवार्य्यवनिमण्डलमेरुपद्म-
चन्द्रार्कतेज उपरीश्वरमारमूर्द्ध्नि ।
न्यस्त पद भुवनमात्रपदेश सार्द्ध
चतु सुरेन्द्रनमित शिरसा प्रणम्य ॥
एव यो वज्रयोगोऽपरिमितसुगतै सेवितो दर्शितश्च
सङ्गीतो बोधिसत्त्वैर्वरकुलिशधरै· मन्त्रविद्भि समस्तै ।
त मार्ग वक्तुकामोऽक्षरपरमसुख कालचक्रे श्रुतोऽह
ह्याकाशे शीघ्रगामी व्रजति खगपति किन्नरो ह्यन्यपक्षी ॥
यस्मिन् समस्तभुवन प्रकट स्वदेहे
गीत समन्तमलिविघ्नधरैर्जिनेन्द्रै ।
तस्मिन् महाजलनिधि प्रविशु प्रविष्ट
पार प्रयामि यदि तत्र जिनानुभाव ॥

यद्याकृतं दशबलेन पुरात्मतन्त्र
गुह्याधिपस्य गदितात् परमादिबुद्धात् ।
तस्मात्जचक्रलघुतन्त्रमिदं कालीये
मञ्जुश्रिया निगदित सकल मुनीनाम् ॥
टीका सुचन्द्रलिखिता सर्व्वयानार्थसूचिका ।
षष्टिसाहस्रिका यासीत् पुण्डरीकेण सा मया ॥
लिख्यते लघुतन्त्रस्य मूलतन्त्रानुसारिणी ।
ग्रन्थद्वादशसाहस्री सवचपदभेदिनी ॥
श्रुत्वा तन्त्रमिदं जिनोक्तविधिना सेक गृहीत्वोत्तर
योगी वा लघुतन्त्रराजमखिल व्याख्यानमार्गे स्थितः ।
त्यक्त्वा मानमनेकभोगविभव चित्त गुरोरर्पितो
बुद्धत्वाय परोपकारचरित टीका शृणोति प्रभो ॥
योऽभिज्ञारहितः करोति महती श्रीवज्रयाने स्थित
शास्त्रानेकविकल्पधर्म्महृदय पाण्डित्यदर्पान्वित ।
टीका सोऽर्थगजः प्रमत्त इव तत् तन्त्र स्वकं ध्वसयेत्
शत्रोस्तन्त्रजयाय यत् स्थितमिदं पारस्य वन्धु सदा ॥
पाण्डित्येनाभिमानी जिनपतिवचनाज्ञातशील सदार्थे
टीका कृत्वाग्रयाने प्रविशति नरकं घातयित्वा परार्थान् ।
कौशल्ये प्राणिघाताद्यकुशलपथिनि स्त्रीसुखाकृष्टचित्त
श्रीप्रज्ञासौख्यनष्टः कुलिशपदहतो वाह्यभोगाभिभूतः ॥
शास्त्राश्च व्याकृता ये जिनपतिसुखदे वज्रयाने समस्ता
टीका सर्व्वेतिकारा वरकुलिशधरा मादृशा बोधिसत्त्वा ।
तेऽस्मिन् बुद्धानुभावं सुरभुजगनृणा पावनार्थं ब्रुवन्ति
यद्याभिज्ञान येषामन्तमिति जिनेन्द्रा वय ते ब्रुवन्ति ॥
नानाबुद्धिरनागतेऽध्वनि सदा तर्कादिशास्त्रार्पिता
बौद्धाना परतर्कसङ्गमवशान्मिथ्या भविष्यत्यपि ।
तर्कादर्पितया तयेष्टविषये ये मार्गसन्देशका-
स्तेषामेव कुबुद्धिदोषमथनी टीका मया लिख्यते ॥

रागानन्तजले विवेकरहितद्वेषाहिनक्राकुले
मोहोर्म्मिप्रचुरे गतागतघनश्रीलोभवेलातटे ।
क्रोधत्यादिवमादिकर्म्मवडवास्याग्निरौद्रव्यथे
नौ टीका कर्णधा[रो]रा भवद्रवनिधौ श्रीवज्रयाने सदा ॥

Colophons —

7A, इति श्रीमूलतन्त्रानुसारिण्या द्वादशसाहस्रिकाया लघुकालचक्र-तन्त्रराजटीकाया विमलप्रभाया सकलमार + + विनाशन परमेष्टदेवतासन्मार्ग-नियमो महोद्देश प्रथम ।

16B, इति ० अभिधेयाभिधानसम्बन्धप्रयोजनप्रयोजनप्रयोजनमभिसवीच्य भगवतस्तन्त्रदेशनोद्देशो द्वितीयः ।

22A, इति • देशकाध्येषकमूलतन्त्रलघुतन्त्रसम्बन्धोद्देशस्तृतीय ।

30B, इति ० सर्व्वञ्येत्यादिना तन्त्रराजदेशकाध्येषकसाधनोद्देशश्चतुर्थ ।

33B, इति ० देशकादिसङ्ग्रहोद्देश पञ्चम ।

38A, इति ० मण्डलाभिषेकादिसङ्ग्रहोद्देश षष्ठ ।

15A, इति श्रीपरमादिबुद्धोद्धृतश्रीकालचक्रतन्त्रराजटीकाया द्वादशसाह-स्रिकाया विमलप्रभाया लोकधातुसङ्ग्रहोद्देश सप्तम ।

16B, चन्द्रकलादिविस्त्रमन्त्रसग्रहोद्देश ।

The Extent of Buddhism and its Literature.

इह तथागताभिसम्बुद्ध आर्य्यविषये भगवति परिनिर्व्वृते सति सङ्गीतिकारकै यानत्रय पुस्तके लिखित । तथागतनियमेन पिटकत्रय मगधभाषया । सिन्धु-भाषया सूत्रान्त । सस्कृतभाषया पारमितानय । मन्त्रनय तन्त्रतन्त्रान्तर सस्कृत-भाषया प्राकृतभाषया अपभ्रंसभाषया असंस्कृतशवरादिम्लेच्छभाषया । इत्येवमादि सर्व्वज्ञेन देशितो धर्म्म सङ्गीतिकारकै लिखित । तथा भोटविषये यानत्रय भोटभाषया लिखित । चीने चीनभाषया । महाचीने महाचीनभाषया । पारसिक-देशे पारसिकभाषया । सीतानद्युत्तरे चम्पकविषयभाषया । वानरविषयभाषया । सुवर्णाद्विविषयभाषया । तथा नीलानद्युत्तरे रुद्राख्यविषयभाषया । तथा हिमवन्त-तस्योत्तरे सूरम्मविषयभाषया । एव कोटिकोटिग्रामात्मकेषु षण्णवतिविषयेषु षण्णवतिविषयभाषया लिखित । एव द्वादशखण्डेषु स्वर्गमर्त्त्यपातालेषु नागसत्त्वसते

सङ्गीतिकारकै र्यानत्रयं लिखितमिति । श्रावकै: श्रावकयान, प्रत्येकै: प्रत्येकयान बोधिसत्त्वै पारमितामहायान मन्त्रमहायान हेतुफलात्मक नानासङ्गीतिकारकै सत्त्वाना वैनेयार्थ । अनया नानासङ्गीतिकारकै नानाविषयभाषया लिखितागमयुक्त्या विचार्य्यमाणो बुद्धो भगवान् सर्व्वज्ञ सर्व्वज्ञभाषया धर्म्मदेशक: नान्यो हरिहरादीना । 30A,

The Relation of Buddhist and Kalacakra Ritual

तस्मादिदानीं रत्नत्रयशरणं गत्वा कालचक्रतन्त्रराजे लौकिकलोकोत्तरसिद्धिसाधनमार्गाभिषेकाध्येषणा कुर्म्मि । सकलसत्त्वाना सम्यक्सम्बुद्धत्वलाभाय इहैव जन्मनीति । 21A,

The Buddhist did not care for Correct Sanskrit

तेषाञ्च सुशब्दवादिना तुशब्दग्रहविनाशाय अर्थशरणतामाश्रित्य क्वचित् वृत्ते अपशब्द । क्वचित् वृत्ते यतिभङ्ग । क्वचित् अविभक्तिक पद । क्वचित् वर्णस्वरोलोप । क्वचित् वृत्ते दीर्घो ह्रस्व । ह्रस्वोऽपि दीर्घ । क्वचित् पञ्चम्यर्थे सप्तमी, चतुर्थ्यर्थे षष्ठी । कुत्रचित् परस्मैपदिनि धातौ आत्मनेपद । आत्मनेपदिनि परस्मैपदम् । क्वचित् एकवचने बहुवचन । बहुवचने एकवचनं, पुलिङ्गे नपुसकलिङ्गं, नपुसके पुलिङ्ग । क्वचित् तालव्यशकारे दन्तमूर्द्धन्यौ । क्वचित् मूर्द्धन्ये दन्ततालव्यौ क्वचित् दन्तेतालव्य मूर्द्धन्यौ । एवमन्येऽपि अनुसर्त्तव्या । तन्त्रदेशकोपदेशेनेति । तथा मूलतन्त्रे भगवान् आह ।

सुचन्द्र सर्व्वबुद्धाणा देयं नित्यैश्ववस्तुक
शिष्येभिश्च गुरूणाञ्च भार्य्यादुहितृपुत्रकं
गन्धो भवति मेदिन्या तोये रूपं रसोनिले
वायौ स्पर्शोम्बरे शब्द धर्म्मधातु म्महानभे ॥
गन्धधूपादिदीपेभि खानपानादिवाससै
पूजयित्वा सदा मुद्रा गुरोर्ददति सत्सुत ॥

इत्येवमादयोप्यपशब्दास्तदान्येपि योगिनावगन्तव्या आगमपाठात् इति । एव टीकाया अपि सुशब्दाभिमाननाशाय लिखितव्य मया अर्थशरणतामाश्रित्य इति । अथ येन येन प्रकारेण कुलविद्यासुशब्दाभिमानक्षयो भवति तेन तेन

प्रकारेण व्यवंशरणतामाश्रित्य बुद्धाना बोधिसत्त्वाना धर्म्मदेशना देशभाषान्तरेण शब्दशास्त्रभाषान्तरेण मोच्चार्य्यं । 21B to 22A.

67.

10766 **लघुकालचक्रटीका ।** *Laghukālacakra-Tīkā*

Entitled Vimalaprabhā

Substance, seasoned palm leaf 22¾×2¼ inches Folia, 222, of which foll 2 3 5 6 11 are missing Lines, 7 on a page Character, Bengali of the latter part of the 10th century Appearance in a good state of preservation Extent in Slokas, 12,000

This is a complete MS of the above

For the text see Cam Cat of Bendall, pp 69—70

Last Colophon —

मूलतन्त्रानुसारिण्या लघुकालचक्रतन्त्रराजटीकाया द्वादशसाहस्रिकाया विमलप्रभाया ज्ञानोपायवैनेयमहोद्देशश्चतुर्थः समाप्तः ।

समाप्तेय टीका ज्ञानपटलस्य ।

Post Colophon —

सम्बुद्धत्वाहृतेन प्रवरमुनिगण स्थापितं बुद्धमार्गे
दत्त्वा प्रज्ञाभिषेक परमकरुणया देशित कालचक्रम् ।
ये + + च्यादिबुद्धात् दिदमिलपटल मञ्जुवज्रेण तन्त्र
राज्ञा श्रीकल्किनाह सुत इह यशस श्रीकलापे न्नपोऽस्य ॥
सम्बुद्धत्वाहृतेन प्रमुदितमनसा श्रीयशस्योदितेन
टीकां श्रीमूलत[न्त्रे] स्फुटकुलिशपदान्वेषिका तन्त्रराजे ।
कृत्वा पुण्य यदाप्त विपुलमतिसित पुण्य + + + दानात्
सम्बुद्धत्वेन लोक प्रभवतु सकलो वज्रिणो लब्धमार्गं ॥
ये धर्म्मा etc

देयधर्म्मोयं प्रवरमहायानयायिन स्थविरमहाकारगुप्तस्य यदत्र पुण्यं तद्भवत्वाचार्य्योपाध्यायमातापितृपूर्व्वंगम कृत्वा सकलसत्त्वराशेरनुत्तरज्ञानफलाप्तये इति ।

महाराजाधिराज श्रीमत् हरिवर्म्मदेवपादीय सम्वत् ३९ ।
सूर्य्यगत्या आषाढदिने २९ ॥

The following was added by a different hand.—[*]

षट्चत्वारिंशतिगते वत्सरे हरिवर्म्मण ।
माघस्य कृष्णसप्तम्या एकादशदिने गते ।
मृतया चुम्बदुकया गौर्य्या स्वप्नेन दृष्टया
कनिष्ठाङ्गुलिमादाय पृच्छयेदनुदीरितम् ।
पूर्व्वोत्तरे दिशोभागे वेगनद्यास्तथा कुले
पञ्चत्वं भाषितवत सप्तवत्सरैरिति ।

For a Tibetan translation of the commentary see p 15 of P Cordier s Catalogue Du fonds Tibetain

The text is divided into 5 Patalas and, in the commentary Patalas again are subdivided into Uddeśas

I

4B, इति मूलतन्त्रानुसारिण्या द्वादशसाहस्रिकाया लघुकालचक्रतन्त्रराज-टीकाया विमलप्रभाया सकलमारविघ्नविनाशन परमेष्ठदेवतातन्त्रार्गनिघनो [निर्द्दे]-देश प्रथम ।

II Begins इति प्रथमं तावत् मूलतन्त्रानुसारेण अभिधेयाभिधान-सम्बन्धार्थेन लघुतन्त्रार्थव्याकरणमुच्यते ।

8B, इति मूलतन्त्रानुसारिण्या द्वादशसाहस्रिकाया लघुकालचक्रतन्त्रराज-टीकाया विमलप्रभाया अभिधेयाभिधानसम्बन्धप्रयोजनप्रयोजन(?) सम्बन्धेशनोद्देशो-द्वितीय ।

III. Begins —इदानीं पुनर्देशकाध्येषकसम्बन्धोऽत्रोच्यते Col missing.

---

* From these extremely obscure verses, we may glean that the original tantra was communicated to Mañjuvajra Bodhisattva who got it from Paramādi Buddha. The commentator was Pundarika, the son of Yaśas, at whose request the commentary was undertaken The Patron of the author was Kalki, a Rājā of Kalāpa

The present MS was copied on the 29th of Āṣāḍha in the 39th year of Harivarma-deva, King of Bengal, whose minister's Praśasti is to be found in the temple of Ananta Vāsudeva at Bhuvaneśvara in Orissa He is said to have reigned during the last half of the 10th century A D.

The addition in a later hand seems to indicate that the MS was five times recited in seven years after the copy was made, on the banks of the river Veng in Jessore.

16B, ० सर्व्वज्ञेत्यादिना तन्त्रराजदेशकाध्येयकसाधनोद्देशश्चतुर्थः ।

इदानीं वज्रयोगसङ्ग उच्यते ।

18B, ० देशकादिसंग्रहोद्देश पञ्चम॰ ।

21B, ० मण्डलाभिषेकसंग्रहोद्देशः षष्ठ' ।

26B, ० इति परमादिबुद्धोद्धृतलघुकालचक्रतन्त्रराजटीकाया ० लोकधातु-
संग्रहोद्देश सप्तम॰ ।

Here ends Patala I called Lokadhātupatala

II

46B, इति श्रीमहादिबुद्धोद्धृतलघुकाल ० अभिज्ञानविधिमतोद्देश'प्रथम ।

62B, इति मूलतन्त्रा ० समुदयसत्यादिमतोद्देशो द्वितीय ।

65B, ० अध्यात्म[ा]रिचक्रम्लेच्छयुद्धकालचक्रकुलतन्त्रनाड़ी क्ष+ + +
महोद्देशस्तृतीय ।

75B, ० अरिष्टमरणलक्षणनाडीच्छेदमतोद्देशश्चतुर्थ ।

81A, ० लोकसत्त्वोत्पादनिरोधहेतुभूतलक्षणलक्षणकालचक्रसयममहोद्देश
पञ्चमः ।

89A, ० रसायनादिबालतन्त्रमतोद्देशः षष्ठः ।

94B, ० खपरदलनन्यासविचारमहोद्देश सप्तम ।

Here ends the Second Patala entitled Adhyātma-patala

III

101A, ० वज्राचार्य्यादिसर्व्वकर्म्मप्रसरसाधनालक्षणमहोद्देशोऽभिषेकपटले
प्रथम॰ ।

109B, ०रक्षाचक्रपूर्व्वकूमभूम्यादिसंग्रहमहोद्देशो अभिषेकपटले द्वितीय ।

118A, ० मण्डलवर्त्तनन्नाममहोद्देशस्तृतीयः । ७० ॥

128A, ० १०३ मण्डलाभिषेकमहोद्देशश्चतुर्थ ॥

137A, १६५ ० ० प्रतिष्ठागणचक्रविषयोगचर्य्यामहोद्देश पञ्चम ।

141B, मुद्रादृष्टिमण्डनविसर्ज्जनवीरभोज्यविषमहोद्देश' षष्ठ ।

Here ends the third Abhisekapatala

IV.

148B, ० स्थानरक्षापायदेशनादिमहोद्देशः प्रथमः ।

151A, ० उत्पत्तिक्रमेण कायनिष्पत्तिमहोद्देशः साधनापटले द्वितीयः ।

157B, ० प्राणदेवतोत्पादमहोद्देशस्तृतीयः ॥

162A, ० उत्पत्त्यनुक्रमसाधनमहोद्देशश्चतुर्थ –

169A, ० नानासाधनमहोद्देश पञ्चमः ।

Here ends the fourth Sādhanapatala

V

182B, योगिनीतन्त्रसारणमहोद्देशः प्रथमो ज्ञानपटले ।

186B, ० चतुःकायादिशुद्धिनिर्णयमहोद्देशो ज्ञानपटले द्वितीयः ।

206B, ० परमाक्षरज्ञानसिद्धिर्नाम महोद्देशस्तृतीयः –

212B, ० देशकाध्येषकमूलतन्त्रलघुतन्त्रसम्ब+ + + + +शस्तृतीयः (?)

Here ends the fifth Jñānapatala

The commentator Pundarīka is regarded by the Thibetans as an incarnation of Avalokitesvara

68.

4801 **चतुराभरण ।** *Caturābharana*

By Bhusukupāda

Substance, palm-leaf 12×2 inches Folia, 7 Lines, 5 6 on a page Character, Newari Date, N S 415 Appearance, old and discoloured Incomplete at the end

It begins thus :—

नमः श्रीभूतडामराय ।

गुरुं नत्वा महायोगं योगिनीहृदिनन्दनं [।]

व्याकृत शयनयोगश्च भुसुकुपादेन योगिना ॥

अथ तत्त्वविपर्य्यासाद् यदि देहो न सिध्यति [।]

कुर्य्यात्तदाविज्ञानं यावज्जिज्ञासयेन्न हि ॥

भोज्य विजन शयन मुद्राधिष्ठानक तथा [।]

वेध जारणमारण चन्द्रसूर्य्यस्य निश्चयं ॥

कामक्रोधाद्यत्र यत्र न स्युः वायुप्रवेशक [।]
बन्धन षट्प्रकाराणां स्ववरगा स्थानस्थान्यत ॥
एतत् सर्वं समाख्यामि यत्नाश्च सार्धभूमिके ॥
यद्यवस्थे तु भूमिं स्थाप्य .(?) सुषोधे गुरुमुखोद्भवे [॥]
प्रातरुत्थाय जप्त्वा कुटीशालायां विधिपतः ।
रक्षा निःसारणं तथा पश्चात् पर्यस्याजन [॥]
पादस्थितद्वयहस्ताभ्यां निजजानुद्वयबन्धन [।]
तनोति वाऽऽदराः इति कृत्वा थाय पञ्च स्थापयेत् ।
स्वपकपादद्वय तदधकायपतानक [।]
जितनितपादसरयान निजजनस्य भाग्यथा विद् ॥
पित्तकन्यस्य कण्ठे तु गुल्यपित नियोजयेत् ।
न पीडयेद्गुरुपक च कुल्यनकच कारयेत् ॥
कुष्ठितं रचत प्राण्या थद्दिश चांरसम्भवं [।]
गुपगोपप्रसङ्गेन (?) पूर्णकुम्भघटो यथा ॥
रविकला सोलह, शशिकला बारह, वेनि आठ वहन्त [।]
तीउष समता, समरस भाइ, न जायत कारण जगकला खाय ॥

इति कुटीशालाविधिः ।

अत परं प्रवक्ष्यामि ध्यानयोगस्य निश्चय [।]
येन विज्ञातमात्रेण कार्यो ह्यायुर्विवर्द्धनम् [॥]
चन्द्रस्य गति त्यक्त्वा यदा वहति दक्षिणे [।]
तत्र वज्रासन कृत्वा ध्यानमेतत् समारभेत् ॥
दन्ते दन्ताग्रं एस्य च संश्लिता ह्यधरपल्लव [।]
नासाग्रे सर्षप पद्ममात्मामध्ये नियोजयेत् [॥]
अङ्गुल्या पासक कृत्वा शिरोबन्ध न कारयेत् ।
अपानमूर्द्धगं कृ[त्वा] मणिपूर नियो(?)जयेत् ॥
रसना घण्टिका नीत्वा रोद्ध त्रिवेणिसङ्गम [।]
चिन्ताविनिर्मुक्तमेतत् [ज्ञेय] ध्यानस्य लक्षणम् ॥

तावत् कालन्तु कर्त्तव्य यावत् संचरते रवि ॥
रविप्रकाशनिलयो ध्यानस्य योजन पुन ॥

इति सूर्य्याभरणं समाप्तः ।

अथ यान प्रवक्ष्यामि सोपान तत्त्वमुत्तम ॥
यस्य युक्तिमात्रेण कालो दूर पलायते ।
अनुत्तान तन कार्य उत्तान करनेव च ॥
सुप्रकार द्वयं पाद द्वादशाङ्गुलमात्रया
त्रिधाहिता नयेत् पाद नाभौ चित्तं नियोजयेत्
दर्पणरश्मिखरज्वले दृतोऽह भक्तपुत्रक ।
स्थिरचला दग्धा वज्रे देवदानवराक्षसा ॥
पाताले च दग्धा नागा ये केचिद्भुवपि स्थिता ।
प्रभास्वरमयं वज्रं द्वादशार्कसमप्रभ ।
आकाशे भ्रमते वह्नि तत्रश्माश्रुतोयद ,
मानुषासुरान् संहार्य्य नभो प्रविशते पुन ॥
सन्ततवृष्टि ततो भूत्वान्तेन पूरिता मही
पुन सञ्जायते रश्मि वज्रेणावपूरक ।
द्विरष्टवर्षीका षोडशकला चन्द्रवत् ॥
देवासुरा यथा मानुषा स्थला तथा
पुनरेव दृष्टिवज्जता पाताले नागमण्डले
एवंविदं सदा ध्यानमापानयोगमारभेत् ।
नाशाप्रचारश्च कृत्वा दृष्टाग्र यन्त्रं सदा ।
अपानं नयोन्य यावत् मूर्च्छते तु शरीरक
दक्षिणायनं यदा भूत्वा यन्त्रस्थाने गते रवि ॥
रेचकपूरकादयो कुम्भवायु प्रवेशयेत् ।
तदा पान परित्यज्य वज्रजापं प्रयोजयेत ।

इति भुसुकुपादविरचितः वृषाभरणं ।

अथातः सम्प्रवक्ष्यामि वज्रासनक्रममयं [।]
यस्य प्रकृतिमात्रेण शरीरे व्याप्तवर्जनम् [॥]
वज्रासनसमारूढ़ः तस्याकारशरीरयः [।]
किञ्चिन्नमति गात्रेण आनन्दितमितमुत्तमं ।
हृदि कमलमध्यस्थमर्कमिन्दुमण्डले
तत्र मध्ये सदात्मानं रक्षितवायुमण्डलं ॥
इडला पिङ्गला चैव उभयो आम्भरोपितौ ।
प्रश्वासो ततो तथा लोयते भ्रमते मध्ये ॥
धम्म पसम्मे धम्म वाम्भ, यफशेर कमल करि शयन [।]
चक्र सूर्य व्यापि शशिसमरस, भाइ रावतु बोले जरमरण भय ॥
जे मदगुरु वज्रयपय सुर काय पखाडि न भाइ सो दूर [।]
योगी एत न जानय खोज गुरुनिन्दा करि तुञ्जन्ति योग ॥

इति भुसुकुपादविरचितदक्षिणभरपटलः समाप्त ।

पुनरपर वक्ष्यामि वामस्य क्रममुत्तम [।]
यस्य यञ्जितमात्रेण कायो वर्द्धते चन्द्रवत् ।
शशिकला चन्द्रिका दशविद्योति प्रकाशयन् [।]
नाभिमूलादधोभाग शून्याकार विभावयेत् ॥
निश्चितकुन्दसमारूढ़ इन्द्रायुधसमन्वित ।
त्रिशून्येन धृताः सर्व्वे सोधितेन पूरिता मही ॥
तत्र मध्ये गताया[त्र] मन्त्रा सर्व्वत्र शोधयेत् ।
पीत्वा कृत्वा सुख दिव्य प्रविशेत् सूर्य्यमण्डले [॥]
चतु पीतसमायुक्तमेतत् शयनलक्षणम् ॥
एव ध्यात्वा सदा योगी भ्रमते तु महीतले ।

देवयान सर्व्वाभरण समाप्तं ॥

यजन विजनवासे शयनञ्च तथा पुनः [।]
वामेन गमनकाय सूर्य्यमिथुनभोजन ॥
काकीमुख ततः कृत्वा यानायानेन योजन ।
सूर्य्याभरणकेवल वृथा सदाञ्च सायाह्नके ॥

भोजनान्ते दुग्धपानं पूर्वचतुष्टयमानतः [।]
रेतःपातादिकाले च पानं शर्करमिश्रितं ॥
गच्छेदकुटिलमलामाकण्ठे दुग्धपानकं [।]
तदा निर्म्मलसङ्काशो गच्छतु स्रवते वङ्कः ॥
सूर्य्यभोजनमैथुन अन्यकाले च खड्गादृक् [।]
अभिचाराणि सर्व्वाणि तदा गच्छति पातनम् ॥
ऋतुदानादि चानेन वृन्दरोपणमेव च [।]
वाणिज्यं सर्व्वकर्म्माणि श्वासेनैव प्रशस्यते ॥
भुक्तान्ते दक्षिणे सूर्य्यभमणाङ्किसवचय [।]
क्रमेण शयनं कार्य्यं पूर्वोदितविधानकैः ॥
रजवीज समायुक्तो + + + + समन्वितः ।
गौरीपथ समालोक्य नस्य चैव समारभेत् ॥
कमलोन्मूलनं कृत्वा ऊर्द्धशाखाव्यवस्थिता [।]
शोषण पोषणं कृत्वा तथा वेधादिताडन ॥
अनुनष्टावलायोगी मूढकायो मदावली [।]
सुनेत्रसिद्धिसम्पूर्णो लोकानाञ्च प्रियङ्करः ॥
प्रथम सूर्य्याभरणं द्वितीयं वृषमेव च [।]
चन्द्र तृतीयक ज्ञेय सर्व्वभरण चतुर्थकं ॥
चक्रप्रधानं सूर्य्योपि वृषमणिपूरक विदुः ।
चन्द्रविसुद्धिचक्रञ्च आज्ञाचक्रञ्च मस्तके ॥
मृषादम्भ तथा सर्व्वं श्रुत्वा सोत्कर्षपौरुष [।]
वङ्कज्ञानाभिमानन्तु श्रूयता शयनक्रमं ॥
दम्भेनैव मता सर्व्वपण्डिता गर्व्वरञ्जिता ।
मृषादम्भविनाशार्थं तेषाञ्च कथित मया ॥
वने प्रविश्य मता के च केचित्तु वनमध्यतः [।]
मिथ्या चोड्डीयण कृत्वा योगिनो मता नान्यथा ॥
एव युक्ता खलाः सर्व्वे निन्दन्ति ज्ञानरूपकं [।]
कुमार्गं प्रथम रूढ़ा मियन्त समाविश्य मध्यग ॥

आत्मानमसता कृत्वा प्रयत्नत॰ ॥ (?)
सेवया विद्यया वापि प्रष्टव्य योगमुत्तमं ।
प्रयासेन प्रष्टीतव्य तेन सिद्धिर्न जायते ॥
दीक्षाख्येण प्रष्टव्य यद्यस्ति जीवित तु+[।]
षट्पद्म षट्चक्र सुषुम्नाधार त्रिस्थान व्योमपञ्चक ॥
वर्णाक्षरस्वरभेद सर्व्वंश्रयनख्यत ।
षट्चक्र षड्ख्यन्च तत्स्थाने पृथक् पृथक् ॥
व्याधेस्तु वर्तुलाकार उदार्य्यार्कसमप्रभ ।
रसान्तपूरितं चक्र षट्कुलेन समन्वितं ॥
जजदीपशिखाकार गुदाधार सद्घाटन ।
एवंविधं सदा ध्यानं न कारेण निवेशन ।
पूनरेव प्रवक्ष्यामि मणिपूरस्य लक्षणं ॥
अर्द्धेन्दु सदृशाकार सूर्य्यस्योपरि संस्थित ।
अपान पूरितं नाभौ दृश+य्यंसमन्वित ॥

6A, इति भोजनलक्षण समाप्त॰; 6B, भोजनविधि॰ समाप्त ॥
अत॰पर प्रवक्ष्यामि कायवाक्चित्त लक्षण ।
यस्यानुष्ठानमात्रेण + + + + + + + + + ॥

Bhusuku is another name of Sānti Deva, the Author of Siksā Samuccaya and Bodhicaryāvatāra Professor Bendal says that Siksā-Samuccaya contains hints of degenerate rites in Mahāyāna The present work by Bhusuku contains much that is degenerate and mystic Hence a long extract is given here But this Bhusuku seems to be another writer of a later age

69.

4753 *The last leaf of the above*

End —ऋद्धिसिद्धिसदायुक्त सर्व्वेषा पूरोमणि ।
यः करोति स सिद्ध्यन्ति अनायासेन योगिनीम् ॥

Colophon —वैशाखी पूनम्या शुसुनपादविरचितचतुराभरण· समाप्त

Post-Colophon —सम्वत् ४१५ जैष्ठ शुक्लदशम्या वृडवासे : शुभमस्तु :

70.

4818 **योगाम्बरीप्रभेदः ।** *Yogāmbarīprabheda.*

Substance, palm-leaf 11¼×2 inches Fols. 10, of which the ninth is missing Lines, 7 on a page Character Newari of the 17th century. Appearance old and discoloured. Incomplete at the end.

Beginning.—ॐ नमः सर्व्वज्ञाय ।

एवं भाषितसर्व्वज्ञ रागीणां ज्ञानगोचरम्

शुद्धावाचिकवख्यानं योगिनीजालसम्वरम् ।

मूलगुरु । भिभिर्म्म । सम्बक । टकारक नेर । नेरशिखर· । मनोहर वज्रपाणिना च ।

एभि· योगीश्वरश्चैव योगशास्त्राभिलाषक ।

अथ भगवान्, अशीति कोटियोगीश्वरमध्ये वज्रपाणिमवलोक्य

अथ खलु वज्रपाणि उत्थायासनादेकांसमुत्तरासङ्गं कृत्वा दक्षिण जानुमण्डल पृथिव्या प्रतिष्ठाप्य कृतकरपुटो [नू]त्वा भगवन्तमेतदवोचत् ।

न तु योगरक्षिता भगवन्तं स्त्रिवसन्ताशीत् ।

श्रोतुमिच्छामि ज्ञानेन्द्र रहयोगस्य लक्षणम्

ज्ञानध्यानविधा, चैव नाडीख्या यथाक्रमा ।

Colophons —2A, इति योगाम्बरीप्रभेदे ज्ञानलक्षणपटल प्रथम

3A, इति ० कर्म्मपटलो द्वितीय

4A, इति ० कर्म्मपटल तृतीय

4B, इति अष्टाक्षरविधान चतुर्थ पटल ।

5B, इति दोलाहारप्रयोगपटल पञ्चम

6A, इति स्वच्छन्दतीचिह्नपरीक्षापटल षष्ठम

7A, इति योगाम्बरिप्रभेदे नाडीचक्रपटल सप्तम

10A, इति ० चन्द्रयोगपटल एकादश ।

10B, इति ० आसाङ्कतिपटल द्वादशम

The page maiks are in letter-numerals Three colophons, viz the eighth, ninth and tenth aie lost in the missing leaf

71.

8056 डाकार्णव । *Dākārnava*

Substance, Nepalese paper, white on one side and yellow on the other 11×5 inches Folia, 197 Lines, 7 on a page Extent in ślokas, 3,800 Character, Modern Newari Appearance, fresh Copied in 1907 under orders Complete

For a description of an old MS of the twelfth century, see my Nep Cat 1915, pp 165—166 For a Tibetan translation see Beckh, p 76, para 1

Colophons —

6A, इति श्रीडाकार्णवे महायोगिनी-तन्त्रराजे ज्ञानार्णवावतार प्रथमपटलः, 20A, ॰ वज्रवाराह्युत्पत्तिनायकौ च यन्त्रचक्रमण्डलभावनादिस्वभावपटलो द्वितीय, 23A, ॰ डाकिन्युत्पत्तिलक्षणसुखसञ्चारकर्म्मतत्त्वव्यवस्थाविधिपटलस्तृतीय', 26B, ॰ नामोत्पत्तिलक्षणमन्त्रन्यासमट्चक्रवर्त्मादिस्वभावनिर्व्वाणादिव्यवस्थापटलश्चतुर्थं ; 29B, ॰ खण्डरोहालक्षणोत्पत्तिचतुश्चक्रनाड्यैव्यवस्थानामोद्देशमन्त्रन्यासादिविधिपटल' पञ्चम, 32B, ॰ महायोगिनीतन्त्रराज्ये रूपिणीलक्षणस्वभावनाडीचक्रस्वभावस्थानव्यवस्थातत्त्वलक्षणविधिपटल षष्ठ·, 34B, ॰ काकास्यादिप्राणोत्पत्तिलक्षणविधिपटल सप्तम ; 37A, ॰ उलूकास्यानिर्णयसम्बिधानोत्पत्ति' प्राणादिलक्षणपटलोऽष्टम·, 39A, ॰ श्वानास्यालक्षणसुखाव्यवस्थाविधिपटल नवम, 42B, ॰ सूकरास्योत्पत्तिमण्डलावतारणादिपटल दशम', 43B, ॰ यमदाड्यैव्यवस्थोत्पत्ति लक्षणनामपटल एकादश', 45B, ॰ यमदूत्युत्पत्तिलक्षणादिमृत्युवञ्चनचक्रभावनोपदेशसङ्क्षेपत पटलो द्वादश, 48A, ॰ यमदंष्ट्रिणीप्रयोगावतारमृत्युवञ्चनादिपटलस्त्रयोदशम' ; 50A, ॰ यममथन्यवतारोत्पत्ति' कालमृत्युवञ्चनादिविधिलक्षणबुद्धावस्थास्वभावपटलश्चतुर्दशम', 66A, ॰ भगवान् सम्यक्समाधिव्यवस्थितनामायन्त्रचक्रपटल पञ्चदशम, 82A, ॰ मूलमन्त्रोद्धारविधिलक्षणपटल षोडशतमः, 83A, ॰ कवचोत्पत्तिलक्षणवज्रसत्त्ववाराह्या विधिपटल· सप्तदशम' ; 84A ॰

वैरोचनादिकवचरक्षाविधिपटलोऽष्टादशमः; 85A, ० पद्मनर्त्तेश्वरादिरक्षाकवचमन्त्रनिर्णयपटल एकोनविंशतितमः; 86A, ० हेरुकादिरक्षाकवचविधिपटलः विंशतिमः, 87A, ० वज्रसूर्य्यादिकवचरक्षाविधिपटल एकविंशतितमः, 88A, ० परमाश्वादिकवचरक्षाविधिपटलो द्वाविंशतिमः, 90A, ० बलिचक्रपूजाविधिपटलस्त्रयोविंशतिम, 94A, ० मण्डलहोमस्याचार्य्यपूजाविधिपटलश्चतुर्विंशतिमः, 96B, ० भगवानित्यादिविशुद्धितथागतप्रतिष्ठाविशुद्धिलक्षणनाम पटलः पञ्चविंशतितमः, 100A, ० प्रचण्डादियन्त्रमण्डलयोगिणीवीराणा मुद्राणा संकेतविहरणलक्षणविधिनामगोचरपटलः षड्विंशतिम', 102A, ० चण्डाक्षीलक्षणमुद्राधिपतिस्वभावविधिपटल' सप्तविंशतिम ; 103B, ० प्रभावतीलक्षणमुद्रावविधिपटल अष्टाविंशतिमः, 104B, ० महानासालक्षणक्षोमविधिनियमपटल एकोनत्रिंशतम', 106B, ० मुद्राप्रतिमुद्रावीरमतीस्वभावविधिलक्षण नाम पटलस्त्रिंशतितम'; 108A, ० खर्बरीअक्षरक्षोमालक्षणस्वभाव' ज्ञाननामपटल एकत्रिंशतितमः, 109B, ० लङ्केश्वरीमुद्रासङ्केतलक्षणमण्डलचक्रस्वभावनामविधिज्ञानपटल द्वात्रिंशतिम', 111B, द्रुमच्छायाखलक्षणमुद्रासंकेतविधिनियमपटलस्त्रयस्त्रिंशतिम, 113B, ० ऐरावतीकायमुद्रालक्षणविधियुक्तिपटलश्चतुस्त्रिंशतिम, 114B, ० महाभैरवान्तर्मुद्राविधानकथनलक्षणविधिपटल. पञ्चत्रिंशतिम, 115B, ० वायुवेगाया प्रयोगविधिमुद्रावर्णकलक्षणपटल षट्त्रिंशतिम, 117A, ० सुराभक्षीप्रयोगक्षोमास्वभावलक्षणविधिपटल सप्तत्रिंशतितम, 121A, ० वज्रवाराह्यादयश्यामादेव्या वश्यहोमयन्त्रचक्रवज्रमण्डलविधिलक्षणनामपटल अष्टात्रिंशतिम, 123A, ० भगवान् मूलमन्त्रस्य सुभद्रादययोगात्माह्वयन्त्रोद्देशकूलनागकर्मविधिलक्षणपटल एकोनचत्वारिंशतिम', 125B, ० हयकर्णवीरादययोगत कवचसीमूलमन्त्रस्य कर्मविधिलक्षणमारणाञ्च पटलश्चत्वारिंशतिम, 127B, ० खगाननाया वीरायाद[य]यन्त्रचक्र उन्मत्तीकरणस्वभावलक्षणविधिहृदयमन्त्रसर्व्वकर्म्मनामपटल एकचत्वारिंशतिम ; 129B, ० चक्रवेगाकर्म्मस्तम्भनवीरादययोगलक्षणस्वभावनामविधिपटल द्वाचत्वारिंशतिम, 131B, ० खण्डरोहाया प्रयोगभावनायन्त्रचक्रमुच्चाटनकर्म्मषड्योगिनीमन्त्रकवचेषु विधिलक्षणनामपटलस्त्रयश्चत्वारिंशतिम ; 133A, ० सौण्डिनीप्रयोगेषु विद्वेषणलक्षणविधियन्त्रचक्रस्वभावनामपटल[चतु]श्चत्वारिंशतिम, 135A, ० चक्र-

वर्म्मिणीमूकीकरणप्रयोगविधिलक्षणयमखड्गलचक्रभावनावीरादययो [ग] राक्षसाकार-यन्त्रचक्र नाम पटलः पञ्चचत्वारिंशतिम , 137A, ० सुवीरायां शान्तिककर्म्म-प्रयोगविधिलक्षणयन्त्रचक्रभावनास्तम्भमन्त्रस्य कर्म्मप्रसर नाम पटल षट्चत्वा-रिंशतिम', 138B, महाबलाया योगेन महारक्षाकीलनमन्त्रस्य कर्म्मबोधि-सत्तस्य यन्त्रभावनोपायविधिलक्षणोनाम पटल सप्तचत्वारिंशतिम', 141B, चक्रवर्त्तिणीप्रयोगादिनानासाधनकर्म्मयन्त्रचक्रभावनामार्गमूलमन्त्रोद्देशविधिलक्षण-सर्व्वकर्म्मक नाम पटल अष्टचत्वारिंशतिम', 146A, ० महावीर्य्याया प्रयोगलक्षणगुह्यरसायनादिपुष्टिककर्म्मश्रीसम्यक्समाधिर्द्देशकमूलमन्त्रस्य विधि-र्नाम पटल' एकोनपञ्चाशतमः, 194B, ० पञ्चविंशतितत्त्वात्मासर्व्वतन्त्राणा-मर्थसूचक सर्व्वरहस्य नाम विधिपटल पञ्चाशतिम , 196A, ० स्तुति पूजादिसमयसेवादयपटल एकपञ्चाशतमः, 197A, (the last colophon) ० योगज्ञानसम्बरक्रियातत्त्वार्णवात्सीत डाकार्णवादिम नामतुल्यतन्त्रराज समाप्तम् ।

Post-Colophons —

वन्दे सर्व्वज्ञगम्य यत ज्ञेय + + + शारिङ्गानि ।
मैत्राख्य कुरु त्वमद्येव मार्ग विशामि सादरे' ॥
ये धर्म्मा हेतुप्रभवा etc

The Scribe's note

इद पुस्तक पुरातनपुस्तके दृष्ट्वा लिखापिता । इति श्रीशुभमस्तु' ।

The first three chapters in their entirety have been published elsewhere by me, because they contain long passages in a curious dialect, absolutely unknown to the world The fifth chapter is here quoted in its entirety, because it contains the names of Devis, called after different districts of India

Leaf 27A

अत पर प्रवक्ष्यामि सत्त्वाना हितकाम्यया ।
खण्डरोहापदे स्थित्वा वज्रडाक स्वय प्रभु ॥
चतुश्चक्रसरोजेषु नाडीशत च विंशति ।
तेषु नाम यथान्याय्य वक्ष्यते तत्त्वभाजना ॥

१ २ ३ ४
मध्यदेशी कलिङ्गी च ओड्डु कर्णाटकोसरी ।

५ ६ ७ ८ ९
सौराष्ट्री मलयी वङ्गी द्रवडी च कलि[ङ्ग] की ॥

१० ११ १२ १३
मालवी तु महाराष्ट्री वरन्दी कामरूपिणी ।

१४ १५ १६ १७ १८
डोहली ढविदेशी च मराडी राढ मागधी ॥

१९ २० २१ २२
तिरभुक्ति (सक्ति) दद्दरण्डी नेपाली सरवासिनी ।

२३ २४ २५ २६ २७
राढी ढिक्करी वङ्गाली खाडी च हरिकेलकी ॥

२८ २९ ३० ३१
सुवर्णद्वीपी सिंहली च डामडी च कत्तोरकी ।

३२ ३३ ३४ ३५ ३६ ३७
सिन्धु हिमालयी बुडी कुरुती जडरी पर्थी ॥

३८ ३९ ४० ४१
जज्जवती वरुणा च ओरियाणलम्पाककी ।

४२ ४३ ४४ ४५ ४६
जालन्धरी अर्ब्बुदी च कश्मीरि कोशली कच्छी ॥

४७ ४८ ४९ ५० ५१
जयती त्रिशक्ती चर्ण्णी बाहरी पूररोहिका ।

५२ ५३ ५४ ५५
मुम्बनी काम्बोजकी च भट्टालिकी गृहदेवती ॥

५६ ५७ ५८ ५९
प्रेतपुरी वलभी च (वभभीच) पेलवी चोपपेलवी ।

६० ६१ ६२ ६३
श्मशाननी उपश्मशाननी महोदधितटी खसी ॥

६४
म्लेच्छी च सर्व्वदेशकी देवी चतुःषष्ठि क्रमात् ।

नाभिचक्रेषु योगिन्य विज्ञेया कुलनाडिका ।

हृदयचक्रे तथा अष्टधृतिका मर्व्वगामिनी ॥

१ २ ३ ४
प्रयागदेवकोटाख्य उज्जयिन्या महालक्ष्मी ।

५ ६ ७ ८
ज्वालामुखी सिद्धसिम्भली माहिलो कौमारी पौरिकी ॥

एवं सर्व्व हृदिस्थाने मायाकारसुन्दोन्निणी ।

कण्ठचक्रस्य देवी च वर्ण्यंते वरनायकी ॥

षोडशैव महाभागा धातूना षोड़शैव तु ।

१ २ ३ ४ ५ ६ ७ ८
रक्ता मुक्ता मज्ज स्वेदा मेधा चर्म मासा अस्थी च

९ १० ११ १२ १३ १४ १५ १६
स्नायु पूया यन्त्र स्वयम्भुव विट्मूत्र पित्तश्लेष्मिका ॥

रहस्यादिपदैर्यातु नाभि सदवाहिनी ।

मस्तकेषु महादेवि चक्रे दाक्षिणनालिका ॥

होमकर्मेषु सर्व्वत्र सर्व्वसिद्धि महङ्कुला ।

१ २ ३ ४ ५ ६
कृष्ण[ा] कराली भीमच्ची नन्दी तीला विनायिका ॥

७ ८ ९ १०
चामुण्डी घोररूपा तु उमादेवी सरस्वती ।

११ १२ १३ १४
भद्रकाली महाकाली स्थूलकाली पराजिता ॥

१५ १६ १७ १८ १९
जया विजया अजिता जयन्ती घोरदंष्ट्री च ।

२० २१ २२ २३ २४
इन्द्री चण्डी चतुष्पथी ग्रामवासिनी रौमिकी ॥

२५ २६ २७ २८ २९ ३०
काम्बोजी डाम्बी चण्डाली मातङ्गी ब्राह्मणी सूमिका ।

३१ ३२
राजपुत्री महर्द्धिकी दिव्यमदपूरिका ॥

इत्येवं नाड़िचक्रेषु खण्डरोहानुगामिनी ॥

कथयन्तु मम स्वामी कि मया[त]त्र गामिका ।

धातु सर्व्वशरीर तु खतुल्यकात्र भावया ॥

भूभागैवर्त्तं आनीयात् देशभिन्ना भूस्येक तु ।
खण्डखण्ड गतो धातुरथवा देशद्वोरय' ॥
गड़कार सूचितो तेन चण्डगर्भेषु लक्षणात् ।
रोप्यते ह्यत्र विज्ञान यादृशा यस्य धातुषु ॥
आलय त विजानीयो कर्म्मखण्डगोच्छिका खयम् ।
ह्यार्थमार्गं महापापं मारगो सर्व्वधातुकं ॥
तैश्च सत्वान् विगातीव खण्डरोहा सर्व्वकर्म्मिकी ।
नायकी वरयोगिन्या खसंक्रान्ता थितो परम् ॥
मीनश्चोदयकाले तु मासि (कामा) फाल्गुनके परे ।
आवरगोदावरीद्वीपे महारागस्वभाविनि ॥
नाभावक्कारकी देवी अद्वयपदमाश्रिता ।
सप्तत्रिंशात्मकमध्ये उत्पद्यन्ति स्वमन्त्रजाम् ॥

ॐ वमगर्वंखवुशुद्धरोवह्निजसाडायेकि हूँगीहूँये फट् व फट्नखाणी हाये हँ २ फट् २ स्वाहा ॐ ।

इदं मन्त्रप्रयोगेण मण्डल सर्व्वकामिकम् ।
एकैकस्य देवीना मध्येषु चतुस्वक्रमा ॥
उपायप्रज्ञात्मक सर्व्व धर्म्मोदयेषु मध्यतः ।
चतुर्द्वारसमायुक्त तोरणं तद्विभूषितम् ॥
खाद्यमान मद्यमास भैरवनादनादितम् ।
नामाचक्र तु गोमास डाकिनी दन्तिमासकम् ॥
वाराधि सर्व्वमासस्य समयसम्बरयोगत' ।
मन्त्रसद्भावतो ज्ञात्वा न मन्त्राक्षरवाचकम् ॥
सर्व्वसत्त्वेषु यदाख्य तन्मन्त्र योगिनी स्मृतम् ।
यदि अक्षरिकं मन्त्र विपगोतीव सन्निभम् ॥
नाडिकारन्ध्ररन्ध्रेषु श्वासाकारसञ्जकम् ।
मन्त्रयान तु चित्त धि आपादान्तनिरोधनात् ॥
देशे देशे तु सचार मध्यदेशेषु चागतात् ।
इमि कृत्वा भयन्तेषु चटात् पानपाययेत् ॥

यन्त्र स्थासने स्थित्वा तु भ्रामयेत् प्राणचक्रवत् ।
चेतनाभ्राम्यमाणे तु मणिरन्ध्र च पीडयेत् ॥
नवरन्ध्रेषु वीज च भावयेद्वज्रादिना ।
अथवा सर्व्वनाडीषु मन्त्रन्यासमिहान्तरे ॥
म क थ्यो क सो म व द्र क्र मा म व का डा ढ भ रा मा ति द ने स रँ
ठि व खा ह सु सि डा क सि ह्नि वु कु न प ज व थ्यो ल । जा ख्य का कौ क ज
त्रि च ल पु मु का भ ट प्रे व पै उ भ्म उ म ख म्ले । इति नाभि ।
प्र दे उ म न्वा सि मा कौ । इति हृदये ।
र सु म खे मे च मा ख ख्ला पू य ख वि मू पि स्ने । इति कण्ठस्य च ।
ह्र क भी न ती वि चा घो उ स भ म स्थू ख ज वि ख ज घो इ च च
ग्रा रौ का डो च मा व्रा ह्व रा [म] । इति मस्तकचक्रस्य ।
अथवा अभेद्यादि नामकम् ।
तेषु चाद्यक्षर सर्व्वं देय मस्तकचक्रके ।
इद यन्त्र महाधीमान् प्राणवायु विधार्य्यते ॥
चक्रकमे सूत्रयेत् कोष्ठ चतुपद्मदलाकृतिम् ॥
वर्त्तुलाकारसर्व्वञ्च पञ्चसूत्राणि पातयेत् ।
अष्टषोडशचौषष्ठि द्वात्रिंश कोष्ठक मतम् ॥
कर्णिकास्थानमासाद्य भ्रमण प्राणशक्तिभि ।
यावदवधूती वायु तावद्यन्त्रमिहोच्यताम् ॥
यदि वा चैव कुर्व्वीत मन्त्र गीयति कालिकाम् ।
धनि प्राणसमाकीर्णा नवनाडी तु रोधयेत् ॥
न रोग न जरा कष्ट न क्षुत्पिपासक सदा ।
एवमादिमनन्त च न व्याधि मरणादिकम् ॥
पञ्चमण्डलके चाथ वाहयेत् सर्व्वयन्त्रकम् ।
धातुरायतनान्यादि भक्षयेदमृतयोगवान् ॥
इत्याह भगवान् स्वामी वज्रडाकस्तथागत ।
सर्व्ववीरसमायोगात् वज्रसत्त्व पर सुखम् ॥

Then comes the fifth colophon

The first list of deities has sixty-four names, of these the majority are formed after the countries where the shrines are The fifty-second name Mumbani seems to be derived from Mumban or Bombay If so, this is the earliest mention of Bombay in Sanskrit Literature. The initial letters of these names are given in the same order to form a mandala or mystic diagram, of which these are the naval The initial letters of another list of eight Dhūtikās or nymphs of different cities form the heart Those of thirty-two different deities form the neck and those of sixteen humours of the body form the head of the diagram The deity celebrated in this patala is Khandarohā Her Mantra is in 37 letters These letters with the four sets of initials form the diagram

The Holy places are thus enumerated —

64A अथ पीठोपपीठादि यथाक्रमाणि च आह ॥
पीठं पूर्णगिरिश्चैव जालंधरमोड्या[य]न ।
अर्व्वुदश्च तथा पीठं गोदावर्य्योपपीठकम् ॥
रामेश्वरदेविकोट मालवश्चोपपीठकम् ।
कामरूप तथा ओड्रं त्रिशकुनं कोशलक ॥
क्षेत्रकालिंगोपक्षेत्रं लम्पाक काञ्चि हिमालयम् ।
प्रेतपूरी गृहदेवी सौराष्ट्रं सुवर्णद्वीपकम् ॥
छन्दोहश्चोपच्छन्दोहं नगरं सिन्धुमेरुक ।
कुलिताचोपच्छन्दोह नदीतीर मेलापकं ॥
उद्यानं सागरं प्रोक्तश्चतुष्पथं चोपमेलकं ।
गिरिमूर्द्धि ग्राममध्य वृन्दा कौमारिपर्व्वक ॥
कुलक्षेत्रोपमेलक श्मशान सुमुनियत ।
चरित्रं हरिकेलश्च मायापूरी श्मशानकं ॥
उपश्मशानं पर्व्वतान्त मन्तखेट सुरः पुरम् ।
कर्णाटपाटकश्चैव पीलवं तु निगद्यते ॥
ग्रामान्त कुंकरश्चैव कर्मारपाटक विभु ।
योगिनीघनपारिस्थ उपपीलवं तथात्र च ॥

पिष्ट (पिन्द) वन गृहपार्श्वे तड़ाग पुष्करणी च तु ।
एषु स्थानेषु या कन्या सहजाश्च स्वयोनिजाः ॥
देशे देशे विजानीयात् ज्ञानयुक्तादयस्थिता ।
द्वादशाना तु चक्राणा सरभेदेन तु पीठजाः ॥
द्वादशपीठादय प्रोक्ता षट्त्रिंशधातुकारणात् ।
एकैकस्य तु धातूना चतुरायतनानि च ॥
द्वादशाकारसत्यार्थं विज्ञेया सह योगिभि ॥

The favourite places of Kaṅkālinīs or skeleton deities are enumerated here :—

154B अथ कङ्कालयोगेन देशे देशे स्वयोनिजम् ।
ज्ञानयुक्ता विजानीयाद्योगिनी वीरनायिका ॥

१
अट्टहासे रक्तादेवी नायकी सर्व्वयोगिनी ।
तस्मिन् स्थाने स्थिता देवी महाघण्टा कदम्बद्रुमे ॥
तस्य देवी सदावीर क्षेत्रपालो महानन ।
कङ्कालसुखमाया सा सम्भवन्ति महात्मना ॥
मुद्रयां तेषु कङ्कालमोड्डानरन्ध्रतोद्गत ।
स्वधातूत्थितविज्ञानं सर्व्वदेशगत क्रमात् ॥

२ ३ ४ ५
कोल्लागिरि वरुणा च देवीकोट विरजक ।

६ ७ ८ ९
एरुणा ततपूरे तु एलापूरे काश्मीरके ॥

१० ११
मरुनगरे तथा च पुण्ड्रवर्द्धनक्षेत्रके ।

१२ १३ १४ १५
जयन्त्या एट्टापुरे तु सोपारे चरित्रे तथा ॥

१६ १७ १८ १९
ओड्डायणे जालन्धरे चौरिके तु मायापुरे ।

२० २१ २२
अम्बुके राजगृहे च भोट्टे विषयेभिस्तथा ॥

२३ २४

मालवे पुल्लीराख्ये तु चतुर्विंशतिपीठके ।
पर्व्वताग्र तावद्दृष्टं वटांतु काञ्चनस्तथा ॥
नटिरुद्ध परात्मना पर्व्वताग्रवनाश्रिता ।
महास्थली वेडगर्भे श्वत्थकूटागारकम् ॥
औदुम्बर शाल्मली तु कारञ्जाशोकमाश्रिता ।
कनकस्तम्भशालन्तु चुडधारू च दिल्लकी ॥
तैलकूटमधुरुद्धेषु च समाश्रिता पुरात् ।
रजयोनि उच्छुश्माङ् महाबलयोगालयम् ॥
कपालं रजप्रचण्डा योनिवीर उच्छुश्माङ्गं ।
महाबलरक्ता तथा योनिवीरशल्लिभवा ॥
योनिवोनसम्भवा तु महाबला कुलोद्भवा ।
भीमवक्त्रोद्भवा चैव नेदमहाप्रवर्तकं ॥
कुसुमयोनिन्या तथा पुनरेव पद स्मृतम् ।
एषु कुलोद्भवा देवी सहजरूपी कान्यकाम् ॥
महालक्ष्मी अग्निमुखी च क्षेत्रपालो वरानन ।
अग्निमुखमिति ख्यातो कङ्कालमुखवेदकः ॥
तस्य चवनग्रहणो योगिनी इयसंस्फुरेत् ।
तेन सन्धुटयोगेषु वीराद्दयवनाश्रिता ॥
सर्व्वेषु हितहेतवो स्थिता च वर्णनखले ।
सद्भावगतिरूपेषु जायते सर्व्वदेशका ॥
वक्रेश्वरी चोर्द्धकेशी क्षेत्रपालो महोत्कट· ।
ऊर्द्ध्वकेशो इति ख्यातो कङ्कालमुखहेतुकम् ॥
शेषपूर्व्वोक्तविज्ञेय विशेष वरयोगिनी ।
कर्णमोटी च रौद्रा तु क्षेत्रपालो महादह ॥
हेतुक परमेश्वर महारौद्र अथापि वा ।
कङ्कालमुखशून्येषु विज्ञेया परम पदम् ॥
सौख्यरूपा चामला च क्षेत्रपालाट्टहासकम् ।
महानादोऽपि विज्ञेया कमला च महर्द्धिकी ॥

कङ्कालचण्डालिनी तु ज्वालामध्ये महासुखम् ।
अभिमुखी महावीर्य्या क्षेत्रपालो घण्टारवः ॥
महावीर्य्या इति ख्यातो कङ्कालसुखसम्भव ।
पिङ्गलाख्या भीषणाक्षी क्षेत्रपालो महाजम्बुकः ॥
महाभयलोचना वा कङ्कालसुखपूरक ।
महाभीमा महाबला क्षेत्रपाला महागज ॥
अथवा गजकर्णा तु क्षेत्रपालो गजकर्णक ।
कङ्कालसुखमारूढ सर्व्वनाडीषु तन्मयम् ॥
गोकर्णा च पर्व्वताग्री क्षेत्रपालो महाभीमक ।
नाडीजङ्गामथापि वा कङ्कालसुखलीनकम् ॥
क्रमणी भीमवक्त्रा च क्षेत्रपालो करालक' ।
मोहकरो वृहत्मुख कङ्कालसुखमासक्त ॥

157B. सर्व्वचक्रजयास्चैव भयानकस्तथापरा ।
सौम्यास्या दिव्यरूपी च साधकाना प्रियङ्करा ॥
यसस्विनी प्रसस्विनी एव सर्व्व यथाक्रमम् ।
अट्टहासे तु चक्रस्था कोलगिर्य्यामडस्थिता ॥
वस्त्रस्था सिद्धि[भि]खल्या देवीकोटेषु प्रेतस्थाम् ।
विरजाया पट्टस्था तु एरण्डे शूकरस्थिता ॥
तत पुरे प्रेतस्था तु खरस्था च एलापुरे ।
काश्मीरे धातवस्था तु मरुदेश महिस स्थिता ॥
नगरे मुण्डपृष्ठे तु मडस्था पुण्ड्रवर्द्धने ।
जयन्त्या करङ्कस्था तु एड्रापूरे कूटस्थिता ॥
सोपारे परेतस्था तु करङ्कस्था चरित्रके ।
ओड्डायने मारस्थातु मड्स्था तु जालन्धरे ॥
क्षीरिका अभिस्थिता च मायापूरे मडोपरि ।
अवुको सिंहस्थिता च चक्रस्थिता राजगृहे ॥
भोटविषये प्रेतस्था मडस्थो मालवे तथा ।
एव क्षेत्रेषु सिद्धि स्यात् कङ्कालेषु प्रयोगत ॥

कारङ्गानुरूपसौख्य कन्दुनालसमुत्थितम् ।
व्याप्तं सर्व्वेषु सत्त्वानां ज्ञानमेतत् स पश्यति ॥

72.

3825 **वज्रडाकतन्त्र ।** *Vajradāka-Tantra.*

Substance, palm leaf 12 × 2 inches Folia, 126 Lines 7 on a page Extent in slokas 3600 Character, Newari of the 14th century A.D. Appearance, old and worm eaten Incomplete

For a Tibetan translation see Beckh 75, para 6

It begins —

रहस्ये परमे रम्ये सर्व्वात्मनि सदा स्थित. ।
सर्व्वडाकिनीमय सत्त्वो वज्रडाक सुखं परम् ॥
असौ स्वयम्भू भगवानेक एवाधि दैवत ।
सम्भवान्नादरूपादिविनिष्क्रान्तासमयाचारगोचरा ॥
दुर्लभ त्रिषु लोकेषु आदिमध्यान्तसंस्थितम् ।
न रागो न विरागश्च मध्यमो नोपलभ्यते ॥
सर्व्वात्मनामसुश्रेय अद्वयज्ञानमुत्तमम् ।
दुश्चारिण्योऽपि सिध्यते सर्व्वलाभसुखोत्सवै ॥
सर्व्वाकाशचरा सिद्धिर्डाकिनीति प्रसिध्यति ।
सर्व्वतो विश्वमुद्रा तु सर्व्वतो विश्वसम्वरै ॥
सर्व्वडाकिनीसमायोग वज्रडाक प्रसिध्यति ।
अतत्त्वाशययोगाना देवतालम्बन प्रति ॥
प्रतिविम्बसमायोगो निमित्ताादिषु जायते ।
आत्मयोग स्वसमयः सिध्यते परमाक्षरः ॥
वोधिचित्तसमायोगश्चर्य्याधिपप्रमुश्च यम् ।
वोधिचित्तमिद वज्रं सर्व्ववुद्धस्वभावत ॥
तस्मात् सर्व्वप्रयत्नेन पूजयेद्विम्बरूपिनम् ।
जगद्दरस्वभावेन व्याप्य विश्व व्यवस्थितम् ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] पश्चात् तथा ।
[illegible] + ।
[illegible] प्रतिष्ठति ।
एक एव महाभूत सर्वानन्दप्रदायकः ।
[illegible] महामायासमावृत ॥
[illegible] पश्चात् [illegible] तथा ।
[illegible] पुनरीश्वरो तथा ॥
[illegible] महामायाश्वगामिनी ।
पञ्चभूतस्वभावेन स्थिता सा वचनायिका ॥
सर्वभूतसमायोगात्मिनी परमोज्ज्वला ।
पञ्चधा सो [illegible] देहवन्धा स्थिता श्रुतिः ॥
इत्यादि [illegible] सूतम् ।
[illegible] + + + ॥

सर्व्वायतनसमायोग वज्रडाक परं सुखम् ।
शून्यरूपमिदं सर्व्वं शून्याकारेण चक्षुषा ॥
पश्यता निर्व्विकल्पेन सता नि शङ्कता भवेत् ।
व्योमरूपाणि सर्व्वाणि व्योमरूपेण चेतसा ॥
नि:सकभावनायुक्तो निर्व्विकल्प प्रजायते ।
इत्याह भगवान् वज्री वज्रसत्त्वस्तथागत ॥

2A सर्व्वतथागतमेघप्रतिहतसमयमहासुख नाम समाधि क्षम कृत्वेदमुवाच ।

यावत् संसारवाचस्था भवन्ति वरशूरय ।
तावत् सत्त्वार्थमतुल शक्ता कर्त्तुमनिर्वृता' ॥
एत एव हि सत्सत्त्वा सर्व्वायाशे सदाभया' ।
अविषसा सुसत्त्वार्थ महावीर्य्येण कुर्व्वते ॥
आकाशनिष्ठवासन्तु भवप्रणिधिशुद्धये ।
सत्त्वार्थोद्यतचित्ताना सौरिणा भवशुद्धये ॥
एषाञ्च देवपुत्राणा नित्य राग प्रमादिनाम् ।
अन्येषा रागिणामर्थे सर्व्वरागविशुद्धये ॥
दास्यामि कल्पविसर महासुखसुसिद्धये ।
अनादिनिधनं चाद्यं सर्व्वकल्पादिभाषितम् ॥
भूतपूर्व्वमतीते पि कल्पादौ हि महासुख' ।
वज्रसत्त्वमहातन्त्र आशीदेकोऽधिदेवत ॥
सर्व्वसत्त्वोद्भवार्थाय सर्व्वलोकाग्रधातुषु ।
गीतवाद्यादिगन्धर्व्वं तत्सर्व्व[स्य] भवाधिप ॥
सुरतोह हि सम्वृत्त सर्व्वसत्त्वसमुद्भवः ।
तत प्रसूता सत्त्वास्तु कामरागविवर्ज्जिताः ॥
तेषान्तु विनय ज्ञात्वा चाहरोद्भववर्ज्जित ।
जगाम ब्रह्मता पश्यन् निरात्मा गगनोपमाम् ॥
भूय कश्चिन्न सत्त्वार्थ न बुद्धार्थमनुत्तरम् ।
शशाङ्क कर्त्तुमात्मार्थ परार्थ हि ततः परम् ॥

ततः सर्व्वं जगदर्थं गगतं शून्यता सदा ।
असत्वागतया सर्व्वं प्रयातं नरकात् पुनः ॥
ततः शून्येषु सर्व्वेषु गोत्रधातुषु संस्थिता ।
सर्व्वबुद्धसमाजेन चोदयामास मां लघु ॥

ॐ महासुखवज्रसत्त्वं ४ वर्णो सुरतस्तम् ।

४ सर्वोदितमाद्ये तु मपि सर्व्वसुखप्रदः ।
शुद्धकामार्थसिद्धिर्हि जातः सर्व्वसुखी जगत् ॥
यथैव कामरूपाय सर्व्वबुद्धैरधिष्ठितः ।
तथापि धर्म्मकायाय सर्व्वबुद्धाधिप[ ] पतिः ॥
सर्व्वबुद्धमहारागः सर्व्वबुद्धमहासुखः ।
सर्व्वबुद्धमहाकाय सर्व्वबुद्धसरस्वति ॥
सर्व्वबुद्धमहाचित्तः सर्व्वबुद्धमहामहः ।
सर्व्वबुद्धमहात्मा सर्व्ववज्रधराधिप ॥
सर्व्वलोकेश्वरपति सर्व्वरत्नाधिपेश्वर ।
सर्व्वडाकिनीसमायोगात् सर्व्वबुद्धसमो भवेत् ॥
सर्व्वबुद्धमयत्वाच्च वज्रडाकः प्रसिध्यति ।
अथ महामण्डलयोगेन सर्व्वमण्डलमालिखेत् ॥
तस्य मध्ये यथान्यायं वज्रसत्त्वं निवेशयेत् ।
सक्षितं चन्द्रवर्णान्तु रक्ताज्वालाकुलन्तथा ॥
बुद्धमालाविरचितं सर्व्वाभरणभूषितम् ।
चतुर्व्वक्त्रं चतुर्भुजं (त्रिनेत्र) जटामुकुटमण्डितम् ॥
चतुर्विद्यासमायुक्तं बुद्धविम्बोपशोभितम् ।
दक्षिणमसितसौम्यं वामे रक्तन्तथापरम् ॥
पश्चिमं पीतसन्निभं कपालस्थं ताण्डवान्वितम् ।
(त्रिदशभयकर) वज्रं खड्गधरश्चैव घण्टाकपालमेव च ॥
डाकिणीचक्रसमाकुलं लिखेद्विविधतायिनैः ।
सर्व्वडाकिणीसमायोगं वज्रडाकः परं सुखम् ॥

इत्याह भगवान् वज्री वज्रसत्त्वस्तथागत ।
माता [च] भगिनी चैव दुहिता बान्धवी तथा ॥
कामयेद्द्वन्द्वयोगेन सर्व्वसिद्धिप्रसाधक ।
3A गोमांस हयमांसानि भक्षयेदविशङ्कितः ॥
[वा]माचार सदा लोके वामतर्पणभक्षणम् ।
वामोद्भवं जगत्सर्व्वं स्थावराद्या सजङ्गमम् ॥
दूती त्यक्त्वा तु गच्छेत् सर्व्वकामविमोहित• ।
दूती रक्ता महामोक्ष सन्दत्येव न संशय' ॥
अव्र[त]घ्न व्रतपूर्णः साधक कृत्यतत्पर ॥
समयकुलाचारो वै एकत्र चरुभोजक ॥
पञ्चवर्णसमाचार एकवर्णन्तु भक्षयेत् ।
मधुरक्तं सकर्पूरं रक्तचन्दनयोजितम् ॥
कुलिशाम्बुजसमायुक्तं + + + + ।
पञ्चामृत भवेदेतत् सर्व्वसिद्धिप्रसाधकम् ॥
अनामाङ्गुष्ठचक्राभ्या लेहयेत् योगवित् सदा ।
सोमयान सदाखाद्य सिद्धिमाप्नोति शाश्वतीम् ॥
एतत् परम समये कथितं तव वरानने ।
सोपायसर्व्वकर्म्माणि निर्व्विशङ्केन स्थापयेत् सदा ॥
निर्व्विकल्पेन भावेन सर्व्वकर्म्माणि सर्व्वदा ।
आचरेन्निर्व्विशङ्केन तत्तेषामुत्तमोत्तम ॥
विषयान् सेव्यमानस्य निर्व्विशङ्केन चेतसा ।
केसोखड्कानुभावेन तन्नयो दूरतिक्रम ॥
यस्तु सर्व्वाणि कर्म्माणि प्रज्ञया विनियोजयेत् ।
सा च शून्यपदे योज्या तया ह्येतन्महात्मनाम् ॥
प्रज्ञासङ्गमरूपाणि निर्व्विकल्पेन चेतसा ।
नि•शङ्काचारसञ्चारस्तपस्तेषा महात्मनाम् ॥
प्रज्ञोपायविनान्यत्र यदि चित्त न संक्रमेत् ।
नियतं तत् समुद्दिष्ट महाबोधिप्रदायका ॥
योगिना अभियुक्ताना निर्व्विकल्पानुगामिनाम् ।

1 तेषां सर्व्वाणि भूतानि प्रज्ञापारमितानि च ॥
पञ्चाद्यर्थमसङ्गाशं तदाकारं वासंस्कृतम् ।
प्रज्ञायत्ता स्मृता तेषां निर्व्विकल्पात्मचेतसा ॥
दर्पणप्रतिबिम्बस्य सप्नमायार्थवुद्बुदोपमम् ।
इन्द्रजालसादृश्यं य पश्येत् स प्रभु स्मृत ॥
तदिदं गन्धर्व्वनगरं विमानस्यैव सङ्कृतम् ।
यथाकारं प्रपश्येथ तस्यायत्ता प्रजा स्मृता ॥

तेन न कस्यचित् स्थितिरस्थिर्यत्राभिनिवेश स्यात् । एवञ्चैव वशम्भूतैरपि मायोपमैर्भावै विशिष्टो सम्भोगसञ्जातसुखपरिणामनया किञ्चिद्विशिष्टसम्भोग-सञ्जात सुखपरपरिणामनया किञ्चिद्विशिष्टफल प्राप्यते न ह्येते स्थिरचला भावा किन्त्वत्राभासमाघनत्वया यथेते विशिष्टभावनाभ्यासबलात् विशिष्टसुखसौमनस्या-दिकं कार्य्यमुत्पाद्य अनुत्तरफलावाप्तौ हेतुभाव प्रतिपद्यते तदात्माभवनदेव नाकश्चिद्दोष (?)

तस्मात् सर्व्वप्रयत्नेन पूजयेत् सर्व्वगामिनी ॥
दुष्करैर्नियमैस्तीव्रैर्मूर्त्ति शुष्यति दु खिता ।
दुःखात् विक्षिप्यते चित्तम्विक्षेपो सिद्धिरन्यथा ॥
मनोमूर्त्तिदृढत्वाच्च सर्व्वसौख्यैर्दृढीभवेत् ।
दु खैश्चलत्वमायाति निरोधम्वाधिगच्छति ॥
कायवाक्सौख्यत्य प्राप्तो वोधिमवाप्नुयात् ।
अन्यथाकालमरणं पच्यते नरके ध्रुवम् ॥
इत्याह भगवान् वज्री वज्रसत्वस्तथागत ।
वज्रडाकिनीसमायोग वज्रडाक पर सुखम् ॥

4B इति वज्रडाकमहातन्त्रे परतत्त्वावलोकविषयावतार ज्ञानपटल प्रथम ।

अथ भगवन्त पुनरपि पूजा कृत्वा प्रणिपत्यैवमाहुः ।
भाषस्व भगवन् देव सर्व्वदुष्टप्रभञ्जन ।

हृदय येन सर्व्वदुष्टा सर्व्वतथागतशासनद्रोहका इन्द्रदेवादयः सर्व्वसत्त्वा दाम्यन्ते श्राम्यन्ते विनेय यास्यन्ति पात्यन्ते । आबोधिमण्ड[ल] नयोद्युक्त कुर्व्वतेति । अथ भगवान् सर्व्वगतकायवाक्चित्तवज्राधिपतिरिदमुदाजहार ।

आईठई वैरोयण तसु वणान्तताइ ॥
तह यह अन्तसवरा दिट्ठामइ ॥
तियसरसिरसि भुषिओ ॥
सआरमण्डलघ मज्झासनो वेलिवाण परिउसिओ ॥
आअरसरपरिसंट्ठिओ सवरो ।
पुणोवि सवरो पञ्चवाणासनो खण्डेन्दुविन्दुसोहिओ ॥
लसमज्झट्ठिओ वीओ ।
दह वाण परिभोसिओ सपु मज्झट्ठिओ
तिअ वअण । पणवि अवद्धअ पडिहासइ ।
हूँ हूँ फलइ णवसरपरिपूरिअइ
फणअ लए विणु । सेसहएअ परिपूरिअइ
पञ्च मज्झट्ठिओ तत्तो ॥ हायाएइ ॥
सवरो रवणुरूढो । इसरसिरसंट्ठिओ पुणोवि पहन्तो । णवमर-परिभोसिओ ॥ सौसवरो रवन्नो रूढो । एमारकलो भरणे ।
ईसरखण्डेन्दु भूषिओ । सोहइ सवरो । रवसोरूढो ॥
पुणोवि पञ्चासर जीवइ । रुवरो खण्डेन्दु विमड डमण्डिओ ।
पुणोवि सअलतत्त्ववरो णाहो ॥ कणरअणविहसणो सेसो ।
वैरोअण विविह पअवर पूरिओ विहिणा ।
5 इत्याह भगवान् वज्री वज्रसत्त्वस्तथागत ।
षड्वीरसमायोगडाकिनीजालसम्वर ।
तस्मिन् हूकारनिर्ज्जातविश्वपद्मार्कमण्डलम् ॥
कर्म्मिवज्रमध्यस्थ वै हूँ तत्त्व विभावयेत् ।
स्फारयेत् डाकिनीचक्र रश्मिमालामनेकधा ॥
द्विभुजैकवक्त्रा त्रिनेत्रा रक्तवर्णा महाघोरा ।
शूलाकार भावयन् का रक्ताक्षा पिङ्गलोर्द्धकेशाम् ॥
नवयौवनसम्पन्ना व्याघ्रचर्म्माम्बरधराम् ।
ललज्जिह्वा महाघोरा भयस्यापि भयङ्करीम् ॥
सर्व्वडाकिनीसमायोगवज्रडाक प्रसिध्यति ।
इत्याह भगवान् वज्री वज्रसत्त्वस्तथागत ॥

पञ्चपूविय कमतयो वहिसमेव्वे गिभगिग्रम्।
फुस फुस सत विमोय ॥ वन्दे पिगउ कुडिल उभड एस पुणो विभणिअर्थम्।
पणिय तोसियस आय। एय विशए एय सवभाव भणिअम् ॥
कमलसयो थाम सरसजुतम्।
मध पासद्विय एम भणियम्म् ॥
भणियासत यट्टियो सारो दधरण पगडेन्दुविन्दुपरिपूरियम्।
एय पुणोवि कथिय ॥ दिणयर सधाय परिभोसियो।
मवरो विसग सण्ठियो वेणि गुणियव्वम्।
फेकारोऽडरण वाणिन्दुविन्दु भोडय फुणो विभणियम् ॥
फटपटाटोपटकाररोधियम् ॥
सपनविकुप्यत मदघर पडाइ णिसवत ॥
पञ्चवग्गवेणि सजुत्तो एयवग्गपडाग पुणोइ भणियम् ॥
भपभपधि वसपधि एय तमाजावलम्बेनम्।
5.1. गिञ्ज गिञ्ज सम पाय गायतु अङ्ग सप्प वोतज्जय विगुणियम् ॥
आयार कवण तिय तिय चउट्ठ पवनसट्ठिय।
एयत्त सभोय भणिएव्व ॥
सोदह रवि आसणुट्ठियो। सवरो चउवाण परिपूरियो ॥
पुणोवि भणिय तिय दिय अन्तिमो असण्ठिय वीओ।
बारह वाण परिट्ठियो। पगडमण्डितभूषितम् पुणो विभणियम्।
कसाकख पञ्चवग्गान्त आसणट्ठियो।
आयरविन्द संजुतुयो एय वि भणियव्वम् ॥
सवरो वेणिवाण सट्ठियो, पुणोवि तिअवाग परिभोसियो ॥
सवरो पुणोइ सवरो पञ्चवाणसण कियो।
एय सवखण्डेन्दुमण्डिभूषियम्।
एयस्स पुणपुण जुणियम्।
कस पघहि सरवरधरो एक एकालियत्तम्।
एयस्सव्व पुण पुण भणियम्।
सवरो उआर सराहडो ॥ खण्डेन्दुविन्दु पुणोवि परिभोसियो

फलारक्खगात्तप सोहिओ वज्जविविह फलफुलकुसुम सङ्कहिओ ॥

अस्य देवि महामाया सर्व्वसिद्धिप्रदायकाः ।

इत्येवं भाषितमात्रेण सर्व्वलोकधातवः कम्पिताः सर्व्वतथागताः सन्त्रस्ता पुनरपि सर्व्वतथागतःबोधिमभिसम्बुद्धा सर्व्वपर्व्वता कम्पिता स्फुटिता सर्व्वदुष्ट-विनीता दमिता शामिता । आकृष्टा मण्डलप्रवेशिता॰ समयैर्बद्धा वशीकृता। सर्व्वमातृगणभूतगणग्रहा ज्वराश्चर्व्वयक्षराक्षसविनायकाः पापा नरका॰ स्फाटिताः पाटिता विनाशिताः ।

7A इति सर्व्वकर्म्मप्रसवविधिग्रह॰ मायाविकुर्व्वणमन्त्रविधिपटलो द्वितीयः;

11B सर्व्वनागाकर्षणपटलस्तृतीयः,

15B इति सर्व्वकर्म्मप्रसरोदयो नाम विधिविस्तरपटलश्चतुर्थः ;

17B. इति सर्व्वनागाकर्षणप्रवेशनविधिविस्तरपञ्चमपटल ,

19A. सर्व्वडाकिनी[म]न्त्रतत्त्वपटलः षष्ठः,

20A हस्तमुद्राप्रयोगकबोजिकाचिह्नलक्षणादिपटल ;

20B सर्व्वडाकिनीच्छोम्मा पटलोष्टम॰,

26B इति सर्व्वयन्त्रोदयो नाम पटलो नवमः,

33A इति श्वासोदेयो नाम दशम॰ पटल ,

34B इति सर्व्वमायाविकुर्व्वितो नाम पटलैकादशमः ;

36A इति वचकोदयो नाम पटलो नाम द्वा[द]शम॰ ;

37A. इति वीरादयपूजासर्व्वकर्म्मोदयो नाम पटलस्त्रयोदशम ,

38A इति देशन्यासवीरादय नाम पटलश्चतुर्द्दशम. समाप्त॰;

39B इति कालत्रयोदयमन्त्रतन्त्रकालम्टत्युवञ्चनो नाम मण्डलः पञ्चदशम ;

45A. इति सर्व्ववीरपटलीसोणगंभारिसमायोगचक्रोदयो नाम षोडशम ,

48A इति रसायनविधिपटलो नाम सप्तदशम ,

51A इति मेलापकनिर्णयो नाम साधनविधिरष्टादशपटल ,

55A. इति वज्रडाकमहातन्त्रे सर्व्वभूतग्रहोत्पत्तिसाधनपटलोनामोन-विशतिम ,

58A. इति डाकिनीसमायोगश्वासोदयो नाम विधिपटलविशति॰,

60A इति उत्क्रान्तिध्यानसिद्धविक्रीडितमुद्रायोगोदयो नाम एक-विंशतिम पटल ,

60B इति योगयोगिनीरतिक्रीडावाह्यमुद्रासङ्केतलक्षणविधिपटलो नाम द्वाविंशतितम ,

61B. इति निर्गमनिग्रहाविकारोनामपटलस्त्रयोविंशतितम ।

62B इति होराग्रहो नाम कर्म्मविधिपटल चतुर्विंशतितम' ,

63A इति सर्व्वोदयो नाम पटल' पञ्चविंशतितम· ,

64A. इति कालोदय पटल षड्विंशतितम ,

64B. इति नक्षत्रबलाधिकारविधिपटल सप्तविंशतितम· ,

65B. इति थिरिस्थनिर्णयो नाम पटलोऽष्टाविंशतितम ,

66A. इति ज्ञानोदयो नाम पटल एकोनत्रिंशतितम' ,

66B इति वज्रसत्त्वविकुर्व्वितोदयो नाम पटलस्त्रिंशतितम' ,

69A इति घण्टालक्षणमानविधिरेकत्रिंशतिमः समाप्त ,

70B इति गुर्व्वाराधनसमयसम्वरापटलो द्वात्रिंशतितमः ,

71B मन्त्रविधिपटलस्त्रयस्त्रिंशतितमः ,

72A इति स्त्रोष्ठवज्राभिषेकपटलश्चतुस्त्रिंशतितम ,

72B इति हेरुकीकरण-विधिपटल पञ्चत्रिंशतितम ;

72B इति हेरुकीकरणो विधिपटल' पञ्चत्रिंशतितम ,

73A. इति म्लेच्छनाथसमयसम्वरविधिपटल षट्त्रिंशतितमः ;

73B. इति म्लेच्छसर्व्वायुधमुद्राज्ञानपटल सप्तत्रिंशतितमः ,

74A. दूतीदामनविधिपटलः अष्टत्रिंशतितम· पटलः ,

77A. इति बलाधिकारपटल एकोनचत्वारिंशतितम ,

79B इति छत्रकफलमुद्राज्ञानपटल· चत्वारिंशतितम ,

87B इत्यालिकालिमन्त्रोदयन्यासपटल· एकचत्वारिंशतितम ,

91B इति रहस्यादितत्त्वोदय पटलो द्वाचत्वारिंशतितम ,

93A इति सर्व्वकर्म्मध्यानोदयो नाम होमविधिपटलस्त्रयश्चत्वारिंशतितम ,

94A. इति वेताडसाधनाध्यात्महोमविधिपटलश्चतुश्चत्वारिंशतितम ,

94B इति जपविधिपटल पञ्चचत्वारिंशतितम ,

97B. इति भूम्याधिवासनसूत्रपातनविधि पटल षट्चत्वारिंशतितमः ,

100B इति रसायनद्रव्यवर्गाधिकारविधिपटल· सप्तचत्वारिंशतितम ,

104B. इति सर्व्वकर्म्मप्रसरस्यार्थे होमविधि पटलो अष्टचत्वारिंशतितम,

111A इति वज्रडाकमहातन्त्रे रसायन + + + + विधिपटल एकोनपञ्चाशत्तम ;

121B इति वज्रडाकमहातन्त्रराज्ये वज्रसत्ताश्वासरूपाख्याननिर्द्देशो नाम पञ्चाशतितम ,

125B इति वज्रडाकमहातन्त्रराजे निर्घण्टपटल एकपञ्चाशतितम समाप्त ।

73.

8060 **प्रज्ञोपायविनिश्चयसिद्धिः ।** *Prajñopāya Viniścaya Siddhih*

By ANAṄGA VAJRA

Substance, Nepalese paper—white on one side and yellow on the other 7¼×4¼ inches Folia, 42, of which foll 22—30 are missing Lines, 6 on a page Extent in ślokas, 440 Character Newari Appearance, fresh Copied under orders

For a description of the MS. from which this was copied, see my Nep. Cat, Vol II (1915), pp 64—65

The main work in this MS is Prajñopāya-viniścaya siddhih, by Anaṅga Vajra, who seems to have been a pupil of Śubhākara, from an obscure verse which runs thus in fol 40B —

40B. गुरुचरणाम्बुजसेवा विठयित(?) मस्त शुभाकराख्येन ।
यन्मे तदखिलजगता विह्नित साधारणा कृपया ॥

The main work is the last, there being, as preparatory to the understanding of this, some short works given before it, namely, (1) Yogāvatāra of Nāgārjuna ending in leaf 2A, (2) Svādhisthānaprabheda by Āyadeva, ending in fol 8B, (3) Advayavivarana Prajñopāya-viniścayasiddhi by Ācārya Padmavajra, ending in fol 17A, (4) Nānāsiddhopadeśa —the siddhas being 1 Padmāṅkura (17A), 2 Prajñāraksita (17A), 3 Nalipāda (17B), 4 Ravigupta (17B), 5 Krsnā-

cārya (17B), 6. Saraha (17B), 7. Mahīdhara (18A), 8 Bhūri-pāda (18A), 9 Vīnāpāda (18B), 10 Vīnāpācārya (8B), 11 Vārūpācaryya (18B), 12 Nāgabudha (18B), 13 Dinnāga (19A) In 20B, the 4th work ends and the main work begins It has five chapters, of which the colophons of the first two are lost in the lacuna

31B इति प्रज्ञोपायविनिश्चयसिद्धौ बोधिचित्ताभिषेकस्तृतीय परिच्छेद समाप्त·, 34B ०तत्त्वभावनानाम चतुर्थ· परिच्छेद , 41A. ०तत्त्वचर्य्यानिर्द्देशो नाम पञ्चम परिच्छेद, प्रज्ञोपायविनिश्चयसिद्धि समाप्ता। कृतिरियमनङ्गवज्र-पादाना।

Post-Colophon statement —

स्पर्शेदादौ विचित्र कमलकुलिशयोर्योगतोऽसौ विपाक
पश्चात्स + + रागानलदलितजगत्सङ्कराशि विमर्द्द ।
तस्मिन् निर्वार्य्यमाणे पवनसहचरे रागवह्नौ सरोजे
साय सम्बोधिमार्गं सकलजिनतनूयोगगम्यादिलक्ष्य ॥
प्राक्चक्रीवन्धवद्ध स्वचकनियमितं मेखलाश्वासबद्ध
कण्ठाग्रं चारपाच कमलकुलिशजाश्चित्तनिष्ठातशुद्ध ।
इत्थ वद्धार्द्धयामं प्रहरमपिदिन स्वचवश्चित्तवच्च
धातौ सम्बार्थ्य तूर्णं स्वपुरमथनयेत् कुण्डलाकार (इति) योगी· ॥
शुभ ॥ तालपत्रपुस्तके दृष्ट्वा लिखित ॥ शुभं ॥

The following extract is from the 5th pariccheda of Anaṅga Vajra's work, in which it will be seen what the lofty philosophy of Prajñapāramitā has come to

36A स्वप्नमायोपम सर्व्वं स्कन्धधात्वादिलक्षणं ।
त्रैधातुकमिद सर्व्वं ज्ञात्वेत्थ [च] समासत· ॥
कौकृत्यस्त्यानमिद्धन्तु औवितैश्वर्य्यमेव च ।
तथाष्टलोकधर्म्मांश्च सर्व्वं त्यक्त्वा विदूरत· ॥
अप्रकम्प्य सदा भूत्वा निर्द्वन्द्वः कृतनिश्चय ।
षट्पारमितायोगेन बुद्धसिद्धिप्रसिद्धये ॥

36B. बोधावारोप्य चित्तन्तु तत्त्वचर्य्यां समाश्रयेत् ।
आचरेत् समयं ज्ञात्वं मन्त्रमार्गप्रकाशितं ।
विघ्नमारादिशान्त्यर्थं पश्चात्तमधिश्रयेत् (छयेत्) ॥
एषात्वनुत्तरा रक्षा विघ्नमारादिव्यवस्थिता ।
ज्वररोग (ज्वरागरा) विष (षा) योग डाकिन्युपद्रवग्रहा ॥
मारा विनायकाश्चैव प्रशम यान्त्यनेन हि ।
नरोद्भवं तथाश्वश्च (श्वश्च) श्वोद्गमातङ्गसम्भवम् ॥
प्रदीप भक्षयेत् प्राज्ञः स्थानमेव च पश्चम ।
अन्यैश्च समयैः ज्ञात्वाश्चित्तस्योत्कर्षकारकैः ॥
मत्वत्सम्भोगशान्त्यर्थं प्रीणयेच्चित्तवश्रिया ।
प्रज्ञापारमिता सेव्या सर्व्वथा मुक्तिकाङ्क्षिभि ॥
परमार्थे स्थिता शुद्धा सम्वृत्त्या रूपधारिणी ।
ललनारूपमास्थाय सर्व्वत्रैव व्यवस्थिता ॥
अतोऽर्थ वचनार्थेन प्रोक्ता वाह्यार्थसम्भवा ।
ब्राह्मणादिकुलोत्पन्ना शूद्रान्वै अन्त्यजोद्भवा ॥
दुःशीला परभार्य्याश्च विकृता विकला तथा ।
जनयित्री स्वसार च स्वपुत्रीभ्भागिनेयिका ॥
कामयेत् तत्त्वयोगेन लघु सिध्यति साधकः ।
वशादिसम्भवैः + + श्चित्तस्योत्कर्षकारकैः ॥
करणैर्वाह्यमुद्राभि नानारसविचेष्टितै ।
स्वाधिदेवतयोगेन पश्चकामगुणैर्वरैः ॥
हर्षार्थश्चित्तरत्नस्यात्मानं पूजयेत् सदा ।
गन्धमाल्यादिसत्कारै वीरपूजादिविस्तरै ॥
स्रक्चन्दनवस्त्राद्यैश्चित्तस्यानन्दकारकैः ।
गम्यागम्यादिसङ्कल्पं नात्र कुर्य्यात् कदाचन ॥
मायोपमादियोगेन भोक्तव्य सर्व्वमेव हि ।
धर्म्मधातुसमुद्भूता न कश्चित् परिपश्यिन ॥
प्रभुञ्जीत यथाकाम निर्विशङ्केन चेतसा ।

सम्भोगार्थमिद सर्व्वन्त्रैधातुकमशेषत. ॥
निर्म्मित वज्रनाथेन साधकाना हिताय च ।
अनन्तज्ञानसम्प्राप्ता + + नैव तथागताः ॥
सततम्भावनाशक्तनिर्विकल्पादिषु का कथा ।
सर्व्वभावस्वभावोयम्बोधिचित्तस्वरूपत. ॥

38B. मुद्रालिङ्गनसंयोगाद्वज्रावेशप्रवर्त्तनात् ।
सच्चौराधरपानाच तत्कण्ठध्वनिदीपनात् ॥
विपुलानन्दसम्भोगात्तद्रूपस्फोटनोद्भवम् ।
न चिरान्मन्मथो राजा वज्रसत्त्वः प्रसिद्ध्यति ॥
तथा तथा प्रवर्त्तेत यथा न क्षुभ्यते मन ।
संक्षुब्धे चित्तरत्ने तु सिद्धि नैव कदाचन ॥

The following extract from Padma-vajra's work explains Prajñā and Upāya —

9B. तथाचोक्त; निःस्वभावलक्षणा प्रज्ञा, स्वभावलक्षणा उपाय इति ।
तस्मात् प्रज्ञोपायकरणविधानेन चोदिता
तत कुर्व्वन्ति सत्त्वार्थं विश्वरूपोमणिर्यथा । इति ।

तेन तावत् प्रज्ञेति उपाय इति व्यवस्थितभागद्वयम् । इदानी + + + + + प्रज्ञया केवलया कि बुद्धत्व स्यात् । नोचेदुपायमात्रेणापि । उच्यते चेदम् ॥ न प्रज्ञाकेवलमात्रेण बुद्धत्व भवति, नाप्युपायमात्रेण किन्तु यदि पुन प्रज्ञोपायलक्षणौ समतास्वभावौ भवत एतौ द्वौ अभिन्नरूपौ भवतस्तदा भुक्तिमुक्ति भवतीति ।

तथाचोक्तम् ।
उपनयत्यभिमता यस्मान्नौकेवानुकूलं यतः ।
तदानुकूलयोगेन सेवोपाय. प्रकीर्त्तित. ॥
उभयोर्म्मिलन यच्च सलिलक्षीरयोरिव ।
अद्वयाकारयोगेन प्रज्ञोपायन्तदुच्यते ॥
प्रज्ञेषु चोपनेतु च शक्यते यत्र नैव हि ।
प्रज्ञोपाय + + + + धर्म्मतत्त्वं तदुच्यते ॥
चिन्तामणिरिवाशेष जगत सर्व्वदा स्थितम् ।
भुक्तिमुक्तिप्रदं सम्यक् प्रज्ञोपायस्वरूपत ॥

74.

8051 **साधनमाला ।** *Sādhana-Mālā*

Substance, modern Nepalese paper white on one side and yellow on the other 12½ × 5 inches Folia, 312 Lines, 7 on a page Character, modern Newari Appearance, fresh Complete

The same work as described in my Nep Cat for 1915, p 83 The titles of Sādhanas are to be found in Appendix B of that volume

75.

10745 **हेवज्रपञ्जिका ।** *Hevajra-Pañjikā*

By KRSNA or KĀHNA

Substance, seasoned palm leaf 12 × 2 inches Folia, 29 Lines, 6 on a page Extent in slokas, 580 Character, Newari of the early 13th century Leaves are marked on the right by figures, and on the left by letter numerals Leaves marked 15 and 19-25 are missing Appearance, soiled Incomplete and defective

Beginning —

नम· श्रीहेवज्राय ।

श्रीहेवज्रं नमस्कृत्य परमानन्दरूपिणम् ।

पूर्व्वचार्य्यक्रमाम्नाय हेवज्रे लिख्यते मया ॥

एव मयेत्यादि ।

निदानवाक्यमेवेदं सूत्र तन्त्रे प्रकाशितम् ।

इह तन्त्रस्य सारार्थं मन्यत्वा(?) वक्ष्यते मया ॥

तथाचोक्त भगवता एवं मयेति भिक्षवो मम धर्म्मे संगातव्य इत्यत आह एव मया श्रुतमिति संगीतिकारः । तदत्र केचित् श्रुतमित्यनेन संगति सूचयति । अन्यथा श्रुते परम्परश्रुते सगीतिरप्रमाणिका स्यादित्यनयोर्युदा(द्वो) सार्थम् । एवं मयेति । मयेति मयैव श्रुतं न परम्परया श्रुतम् । etc, etc

11B इति योगरत्नमालाया हेवज्रपञ्जिकाया प्रथम पटल ; 13B. •पटलो द्वितीय , 17A, •तृतीय• पटल ; •चतुर्थ पटलः, (The Colophons V and VI are lost in the missing leaves) 27B, •क्षेत्रापीठ निर्णयपटल सप्तम ।

But it does not agree with Hevajra pañjikā or Yogaratnamāla, as described in my Nep Cat for 1915, p 44, as the leaves of that MS are hopelessly confused.

The three Kāyas (*Dharmakāya*, *Sambhogakāya* and *Nirmānakāya*) are thus explained

3B सत्त्व(व)तिभवस्यैकतेति । सतो भाव सत्त्व अर्थक्रियाकारित्वमिद-मत्ययतालक्षणम् पञ्चस्कन्धात्मकम् । तथाचोक्तं भगवता ।

सर्व्वं सर्व्वमिति ब्राह्मण यदुत पञ्चस्कन्धा ते च त्रयो भवाः कायवाक्चित्तानि तेषामेकता अद्वयीभाव । प्रभास्वरनिष्ठागमनात् । अनया प्रज्ञया प्रज्ञेति । अनेन प्रज्ञापारमितामध्यमकविचारेण वज्र इत्येव कथितो धर्म्मकाय ।

महाज्ञानरसैरित्यादि । महाज्ञानानि महायानप्रणीता धर्म्मास्तेषा रस आस्वादः तै प्रपूर्णः ।

एतदुक्तं भवति परमोज्ज्वलविचित्ररत्नविरचि[त] (विरचि) कूटागारोदरे सुविशुद्धलक्षणानुव्यञ्जनविराजितेन देहेन अनङ्गयोगयोगिणीगणै सह सहरणस्फुरणरूपतया महासुखसम्भोगरसैस्तृप्त' यावदासंसारमखण्डनित्यतया नित्य इत्यर्थं । स एव महासत्त्वो बुद्धाना सम्भोगकाय ।

नित्यमित्यादि । स्फुरणयोगेन समन्ताद् गमन समय । यथास्वं विश्वाविश्वविनयनोपायैर्नानाकायैस्त्रैधातुकागमनसमयः । तत्र सततप्रवृत्तत्वात् सत्त्वः बुद्धानामनन्तप्रभेदो निर्म्माणकाय ।

समयसत्त्व समयसत्त्वशब्देनाभिधीयते ।

The meaning of Hevajra —

4A वज्रगर्भ उवाचेति । किमर्थमुवाच । हेवज्रस्य वज्रधरस्ते कारणं नाम्ना यत् सूचित तदर्थमुवाच । हेवज्रन्त्विति हेवज्र इतीदृश नाम केन कारणेन सङ्गीतम् ॥ प्रज्ञोपायात्मकेत्यादि ॥ तन्त्रमिति प्रबन्धः तन्त्र त्रिविध हेतुतन्त्र

फलतत्त्वमुपायतत्त्वम् । तदत्र हेतुः वज्रकुलीनाः सत्त्वाः । परिनिष्पन्ना हेवज्रमूर्त्तिः फलं । उपायो वक्ष्यमाणलक्षण सपरिकरो मार्ग' । तस्य (तस्म) वज्रधरस्य निगदितमेवमस्येत्यादिवाक्येन ।

4B. इह हि मन्त्रमहायाने आदिकर्म्मिकाणा सत्त्वाना प्रथममवताराय (भाराय) देवतामूर्त्तिभावनैव कथ्यते ।

यदाह ।

आदिकर्म्मिकसत्त्वाना देवतामूर्त्तिभावना ।
निर्द्दिष्टा प्रथमं तन्त्रे सर्व्वकर्म्मप्रसिद्धये ॥

द्वितीये परिनिष्पन्नक्रमे वक्ष्यमाणसूचनापेक्षयैककारणं महोपायः ॥

For a description of the contents of the text see Bendall's Cam. Cat, p 58 It consists of two parts, as mentioned in my Nep Cat for 1915, referred to above. The full name of the text is Hevajra-Ḍākinī-jāla-sambara-Tantra.

The Pañjikā also is described in Cam Cat, p 189

For a Tibetan translation of the text see Beckh, p. 74, para. 9, and for that of Kṛsnācārya's Pañjikā, see Cord, p. 67

76.

3853. **पञ्चरक्षासूत्राणि ।** *Pañcarakṣā-Suttrāni*

Substance, palm leaf $14\frac{3}{4} \times 2\frac{1}{4}$ inches Folia, 135, of which the first 34th to 36th, the 127th and the 130th are missing Lines, 6 on a page Extent in slokas, 2700 Character, Newari of the 14th century Appearance, old, soiled, faded and worn-out

The leaves are marked by letter numerals on the left hand and by figures on the right-hand side

The five Raksāsūttras or protective treatises are —

33B यानीमानि भदन्त भगवता पञ्चमहारक्षासूत्राणि भणितानि । तद्यथा । महासाहस्रप्रमर्द्दिनीसूत्रं महामायूरी महाशीतवती महाप्रतिसरा महामन्त्रानुसारणीसूत्रानि भदन्त भगवता पञ्चाभिसंवर्ज्जितेन अनुज्ञातानि ।

The colophon of the Mahāsāhasrasūttra is not to be found, perhaps being lost in one of the missing or faded leaves

88B. आर्य्यमहामायुरीविद्या राज्ञी सर्व्वार्थसाधनी समाप्तेति ।

117A महाविद्या राज्ञी महाप्रतिसराया कल्प समाप्त ।

125B आर्य्यमहाप्रतिसराया महाविद्याराज्ञी रक्षाविधानकल्पो विद्याधरस्थाय समाप्त ।

129B आर्य्यमहाशीतवतीनाममहाविद्याराज्ञी मनुष्यसारक्षासूत्र समाप्तम् ।

135B. आर्य्य महारक्षामहामन्त्रानुसारिणी नाम महायानसूत्र समाप्तम् ।

Post-Colophon —

ये धर्म्मा हेतुप्रभवा etc , etc

77.

1078 **पञ्चरक्षा ।** *Pañcaraksā*

Substance, palm-leaf 13×2 inches Folia, 125 Lines, 5 on a page Extent in slokas, 3100 Character, Bengali of the Kutila type Dated saka 1211 = 1289 A D In good preservation with illustration Complete

There are two sets of leaf-marks on the right side, the original marks being parallel to the third line and the later marks below them The later marks are not reliable

Last Colophon —

महारक्षा महामन्त्रानुसारिणीमहाविद्या समाप्ता ।
येधर्म्मा हेतुप्रभवा etc , etc देयधर्म्मोऽय प्रवरमहायानयायिनः
परमोपासकसाधुरीयोकस्य यदत्र पुण्य तद्भवतु आचार्य्योपाध्याय
मातापितृपूर्व्वङ्गम कृत्वा सकलसत्त्वराशेरनुत्तरज्ञानफलावाप्तये
इति ॥ परमेश्वरपरमसौगत परममहाराजाधिराज श्रीमान्
गौडेश्वरमधुसेनदेवकानां प्रवर्द्धमानविजयराज्ये यत्राङ्केनापि
शकनरपतेःशकाब्दा १२११ भाद्रदि २ ।

The five raksas are :—

37B आर्य्यमहासाहस्रप्रमर्द्दिनी नाम महायानसूत्रं समाप्तम् ।

84B आर्य्यमहामायूरीविद्याराज्ञी, अविनष्टा, पञ्चमुखाद्, प्रतिलब्धा समाप्ता ।

88A आर्य्यमहाशीतवती नाम महाविद्याराज्ञी समाप्ता ।

113B आर्य्यमहाप्रतिसराया महाविद्या राज्ञी प्रथमकल्पः समाप्तः ।

125A. महारक्षा महामन्त्रानुसारिणी महाविद्या समाप्ता ।

78.

9970 पञ्चरक्षा । *Pañcaraksā*

Substance, palm-leaf. 15 × 2 inches. Folia, 102, marked on the left with letter numerals and on the right with Newari figures. Lines 5 per page. Character, ornamental Newari of the 14th century. Appearance, well preserved. Complete.

Last Colophon —

आर्य्यमहासाहस्रप्रमर्द्दिनी आर्य्यमहामायूरी आर्य्यमहाशीतवती
आर्य्यमहाप्रतिसरा आर्य्यमहामन्त्रानुसारिणि । एतानि महारक्षा
समाप्त ।

Post-Colophon Statement —

ये धर्म्मा etc, देयधर्म्मोयं प्रवरमहायानयायिन परमोपासीका-
महाराजाधिराजपरमेश्वरपरमभट्टारिका कमलनारायणाऽवतार-
श्रीश्रीजयरत्नमल्लदेवस्य विजयराज्ये आर्य्यावर्त्तभूमे नेपालदेशे
श्रीमन्तश्रीललितापुरीमहानगरे श्रीमानिगल्के नागस्थाने सर्व्व-
तथागतारश्रीरत्नकुम्भकुलाहारावस्थितशाक्यभिक्षुश्रीराकुरु स-
भार्य्या केवकिलक्ष्मीस्य पुत्र भिक्षुश्रीनिवहन्दच सभार्य्या पुरानपि-
कस्य पुत्र नाथभारा । मध्यमपुत्र भिक्षुश्रीहर्षचन्द्र सभार्य्या
कितिमयिकस्य पुत्र श्रीविन्वरराजमु सश्रीनमकिनमु स । कनेष्ठ
पुत्र भिक्षुश्रीकुसुमचु सभार्य्याकुमुनयिकस्य यदत्र पुण्यं तद्भवत्वा-
चार्य्योपाध्यायमातापितृपूर्व्वंगमं कृत्वा सकलसत्त्वराशेरनुत्तरज्ञान-
फलवाप्तयेति । लिखितेय श्रीकाष्ठमन्दपमहानगरस्थाने चैत्रमा-
मकुल्याया तक्षक श्रीविर्षचन्द्रबाहारावस्थित वज्राचार्य्यभिक्षु

श्रीजयसिंहराजेन रचितं। जथादृष्ट तथा लिखित लेखिका नास्ति दोष । न मे दोष न भाव्यते ।
यस्तमूर्द्धपुकयाऽपि तस्य दोषं न मुच्यति ।
उदकानलचोरेभ्यो मूषिकेभ्यस्तथैव च ।
नच्छितव्य प्रयत्नेन मया कष्टेन लिखितम् ॥

श्रेयोऽस्तु सम्वत् ६४० श्रावणमासे कृष्णपक्ष पञ्चम्यायां तिथ्या रेवतिनक्षत्र शूलयोग (?) बुधवासरे ॥ चेयं भगवान् । पञ्चमहारक्षा लिखित सम्पूर्णमिति । ६४० (In a later and blurred hand)

जत्पुण्यावरपक्षरक्षरचितम् गम्भीरधर्म्मोदकं ।
समवर्त्तेस्वास्वभावगुणनिका सपुरुषधर्म्म वच ॥
शुभमस्तु सर्व्वदा ॥

This is the *only* MS *dated in the reign of Jayaratna*-malla, who was the first separate king of the kingdom of Kāṣṭha mandapa

For a description of the work see Cam Cat of Bendall, pp. 33, 48, 99, 105, 152, 153, 157, 162, 175 and 190

Rājendralāla splits up the work into 5 and treats of them separately—(1) Mahāsitabatī (Nep Bud. Lit, p 164), Mahāmantrānusāriṇī (p 165), Mahāsāhasrapramardinī (p 166), Mahāpratisarā (p 168), Mahāmāyūrī (p 173)

The Tibetan translation also splits up the work See Beckh, 102B and 103A

79.

3854 **क्रियासंग्रहपञ्जिका कुलदत्तपञ्जिका ।** *Kriyā-saṃgraha-Pañjikā or Kuladatta Pañjikā*

By KULADATTA

Substance, palm-leaf 12×2 inches Folia, 176, of which 7, 38, 54, 56, 70, 75, 89, 92, 104-107 140, 142, 151 168, 172 are missing, marked with letter

numerals on the left and with figures on the right Lines, 8 on a page Extent in slokas, 5200 Character, Newari of the 16th century Appearance, old and soiled Incomplete at the end

See Dr Rajendralal's Nepal Catalogue, p 105

8A, इति कुलदत्तपण्डितविरचितायां पञ्जिकायां प्रथमं प्रकरणम् ।

20B, इति महापण्डित कुलदत्तविरचितायां पञ्जि + + + + + ।

41B, श्रीमहापण्डित कुलदत्तविरचितायां पञ्जिकायां तृतीयप्रकरणम् ।

47B, श्रीमहापण्डित कुलदत्तविरचितायां पञ्जिकायां चतुर्थं प्रकरणमिति ॥

58A, श्रीमहापण्डित कुलदत्तविरचितायां पञ्जिकायां पञ्चमप्रकरणमिति ।

154B, श्रीमहापण्डित कुलदत्तविरचितायां षष्ठमप्रकरणम् ।

The opening lines are given in the Nep Budh Lit. of Rajendralala.

यस्य श्रद्धाप्रज्ञाकृपावान् व्याकरणकाव्यच्छन्दोविचीतिज्योतिषशास्त्रप्रत्याय्यवदिति कथा पाठे । नानालिपिनानादेशभाषामणिकनकपुंस्त्रीगजाश्वादिलक्षणसम्वेत्ता गान्धर्व्वगीतवाद्यनानायुधवैद्यकेन्द्रजालधातुवादतुलाशास्त्रज्ञा गीतादिकौशलनखच्छेदादिशिल्पवान् विदितकामशास्त्रः प्राज्ञ' सहिष्णु दक्षो वाग्मी प्रणतः प्रतिपत्तिवान् सदोत्साहि लोमग्रह (?) गुणधीशालि समयरत्नत्रयादिदभक्तिमान् दशपारमिताशक्तो विगतभयहृणलज्जा. प्रतिष्ठामण्डललिखननानाकर्म्मप्रसरनिपुणः गुरोराज्ञापरिपालनतत्पर गुरोराज्ञास्खलनकोपाद्भ्याढदोषप्रकाशन सत्त्वेषु मैतिव्यागः बोधिचित्तत्यागः सधर्म्मनिन्दा गुह्यज्ञानपरःस्कन्धाव (?) महायानविचिकित्साद्दुःखसुखयोर्धर्म्मकल्पना शार्द्धचित्तप्रतिद्वेषो भङ्गसमयासेवास्त्रीजुगुप्सामलापत्तिरहित. + + + खाराम्यो (?) भवति । एवविधै· सर्व्वगुणैरलङ्कृतस्य सर्व्वदोषरहितस्य मण्डलवर्त्तनादौ योग्यस्य शुभे दिवसे नक्षत्रादौ गृह गत्वा परवामन्नभक्त कृत्वा यथाशक्ति दक्षिणा दत्वा सम्पूज्याञ्जलि कृत्वा अध्येषणा कुर्य्यात् समन्वाहराचार्य्य अहं अमुकनामा उपासको विहारादिकं कर्त्तुमिच्छामि तदर्थं विज्ञापयाम्यहं अधिगतसकलसुगतवचनत्वात् ॥ इत्यनेनाचार्य्यशिष्याध्येषणा कुर्य्यात् यजमान ॥

13A, वास्तुपूजामाह , 37B, इदानीं वास्तुनाग+ + , 41A, इष्टकारोपण कृत्वा होमं कुर्य्यात् प्रमोहने , 43B, इदानीं प्रासादलक्षणमभिधीयते ,

44A, इदानी विशेषलक्षणमभिधीयते, 45A, देवालयस्तु विशेष ; 47A, तस्मिन् काले सधर्म्मपाठ , 51A, इदानी दार्व्वादीना प्रमाणमभिधीयते, 52A, देवालयस्य + + + कोष्ठद्वयेन द्वारस्य व्यायाम , 55B, ततो द्वारस्थापनानन्तरमग्निपूजामाह , 58A, इतिमन्त्रेण अष्टोत्तरशतवार परिजपति ग्रन्थविस्तारभयात्यक्तान्यन्यदारुकर्म्माणि , 61A, तदनन्तर वज्रहेतुकर्म्ममुद्राया पुरतो वज्रधातुमाह , 64A, इति पापदेशनादि, ततो विंशतिपूजा कुर्य्यात् मन्त्रमुद्रायुक्तेन, 65A, एव विंशतिप्रकाराभि सर्व्वतथागतान् सम्पूज्य आत्मानं निपातयेत्, 66A, इत्यनादिससिद्धियोग , 68B, इति घनोऽभिषेक , इति नामाभिषेक इति वज्रव्रतम्, 69B, इति वीजचिह्नदेवताहङ्कार , 72A, समयमुद्रालक्षणम्, 72B, इति धर्म्ममुद्रा तत कर्म्ममुद्राबन्धमाह, 74A, इति कर्म्ममुद्रा, 76B, इत्याचार्य्याभिषेक , 79B, इत्यादियोगो नाम समाधि , 85A, इति मण्डलराजाग्रीनाम समाधि, 87B, इति कर्म्मराजश्रीनाम समाधि, 101A, मुद्राविशुद्धि , 101B, चेतमुद्राविशुद्धि , 102B, ईशानस्य कर्म्ममुद्रा, 108A, इति घण्टाधिवासना, इति संखाधिवासना, इति रङ्गाधिवासना, 109B, इति देवताधिवासना, 111B, इति वाह्यमण्डललेखनविधि , 112A, इदानी तन्त्रोक्त, सूत्रणमुच्यते, 114A, इति दे[व]ताचिह्नपातनम् ; इति मण्डलाधिवासना, 116B, इति शिष्याधिवासना, 118B, इति शिष्यप्रवेशविधि , 121A, इति वज्रव्रतदानम् । इति मण्डलतत्त्वम्, 122A, इति व्याकरणम्, इत्याश्वासदानम्, 123B, इति प्रज्ञाज्ञानाभिषेकविधि , 124B, इति सद्वजसबोधिरुच्यते, अयमेवार्थ श्रीसमाजेऽप्युक्त , 125B, इति चतुर्थाभिषेकविधि, 129A, इति शुभनिमित्तम्, 129B, इत्यशुभनिमित्तम्, 132A, इदानी लक्षाङ्गतौ हस्तप्रमाणमभिधीयते, इदानी विधानमाह, 132B, तत्र श्मशानपूजामाह, 135A, इति विधानम् ॥ इदानी पिण्डिकास्थापनाय नव कोष्ठकविभागोऽभिधीयते, 136A, इदानी मूलपञ्चाशतचतु षष्टिरेकाशीतिकोष्ठकाना प्रत्येक विशुद्धिरभिधीयते, 138A, इति रत्नन्यासविधि ॥ इदानी पिण्डिकालक्षणमभिधीयते । स्थाप्यमान देवस्य सार्द्धसप्ततालप्रमाणो दैर्घ्येण पिण्डिकायाम व्यायामत पादोनपञ्चतालप्रमाणा etc, etc

138B, इदानीम्विहारप्रतिष्ठा[भिधी]यते, 139A, इदानी प्रतिमास्थाप-

गीयतल्लक्षणमुच्यते, 139B, इदानीं देहाना + + + + + +; 141A, प्रतिमाया रूपगुणमुच्यते; 141B, इदानीं दोषोऽभिधीयते; 142B, ... इदानीं पटपुस्तप्रतिमादीनां दग्धक्रिया अभिधनीया रजस्वलारजोरञ्जितकर्पटे समशानकर्पटे नरचर्म्मणि कपालके श्मशानभस्मनद्यकलशोदकप्रक्षालिते शून्यताकरुणाभिन्नबोधिचित्तात्मके सर्व्वतथागतानुप्रवेश्य अर्घ्यं दत्वा, etc., etc.

144B, इति योगिचंसोधनम्; 146A, नीराजनक्रम; 147B, सीमन्तोपनयन; 149B, इति फलप्राशनविधि: 153A, इति नामाभिषेकः; 153B, इति गुह्याभिषेक

155A, चित्रकर्म्मवल· पिण्डिगण्डिकालक्षणं तत ।

एतेषाञ्च प्रतिष्ठानं प्रवक्ष्ये गुहक तथा ॥

ततो निष्पन्ने विहारादौ वहिरभ्यन्तरे च यथास्थाने तथागता बोधिसत्त्वा विद्यादेव्य क्रोधगणा विद्याधरा . .. . लिखनीया, 156B, इति वैश्रवणस्थापनम्; इति बलिमन्त्र; 157A, इति महाकालस्थापनम्; 158A, इति राजास्थापनम्; 158B, बलिपिण्डिकास्थापनमिति, गण्डिकालक्षणमित्युच्यते; 159A, आकोटनमुद्गरस्य प्रमाणमभिधीयते; 160A, इति गण्डाकोटनम्। इदानीं प्रव्रज्याग्रहणमुच्यते; 163B, इति प्रव्रज्याविधि;

164A, लक्षणं धर्म्मधातूना पूजानामवरोहनम् ।

जीर्णोद्धारोपसंहारा (?) पूजयेद् गणमण्डलम् ॥

धर्म्मधातूना लक्षणमभिधीयते, 176B, इति उच्छिष्टपिण्डमन्त्र ।

The Manuscript comes abruptly to an end

23B, तत शुभे . सुश्रीद्यय विश्वाजचन्द्रचिह्नानि लिखेत्। महावैरोचनस्य भाले पञ्चसूचिकावज्रं सत्त्वत्रस्य नीलवज्रं रत्नवज्राङ्कितरत्नं धर्म्मरस्य वज्राङ्कितपद्म कर्म्मवज्रादिस्थ वज्रम्। अक्षोभ्यस्य नीलपञ्चसूचिकावज्रं वज्रसत्त्वस्य शुभ पञ्चसूचिकावज्रं वज्रराजस्य वज्राङ्किताङ्कुशम्। वज्ररागस्य शरचापं वज्रसाधो वज्रमुद्गरयेन साधुकारप्रदान। रत्नसम्भवस्य वज्राङ्कितरत्नम्। वज्ररत्नस्य वज्राङ्कितरत्नमाला। वज्रतेजस्य हृदये वज्र[क्रो]तोश्चिन्तामणिवज्रम्। वज्रभानस्य वज्राङ्कितदन्तपङ्क्ति। अमिताभस्य वज्राङ्कितपद्म वज्रधर्म्मस्य सनालपद्मम्।

अमोघसिद्धिना विश्ववज्रं। वज्रकर्म्मण स एव। वज्रप्रभिन्नस्य वज्रदंष्ट्र

वज्रघटिकश्चनाहं। वज्रपद्मस्य वज्राङ्कितदण्डयुगम्। वज्रसम्बेवं वज्रमुष्टिभ्यां गृहीत-पद्मसूचिकवज्रम्। वज्रलास्याया वज्रद्वयम्। वज्रमालाया रत्नमाला। वज्रगीताया वीणा। वज्रनृत्याया त्रिसूचिकवज्राङ्कितकरद्वयम्। वज्रधूपाया धूपकटच्छुक। पुष्पायाः पुष्पकरण्डकम्। दीपाया दीपयष्टि। गन्धाया पीत गन्धसत्व मैत्रेयस्य सपल्लवनागपुष्पम्। अमोघदर्शिन सनेत्राम्भोज। सर्व्वापायजह-स्याङ्कुशम्। सर्व्वशोकतमोनिर्घातनमिति दण्डम्॥ गन्धहस्तिन शङ्ख। सूरङ्गमस्य खड्गम्। गगनगञ्जस्य पद्मस्थधर्म्मगञ्ज॥ ज्ञानकेतोश्चिन्तामणिध्वज। अमितप्रभस्य कलसम्। चन्द्रप्रभस्य चन्द्रम्। भद्रपालस्य सज्वालरत्नम्। जालिनीप्रभस्य वज्र-पञ्जरम्। वज्रगर्भस्य सवज्रनीलोत्पलम्। अक्षयमते कलशम्। प्रतिभानकूटस्य पद्मस्थरत्नकूट समन्तभद्रस्य रत्नमञ्जरी। वज्राङ्कुशस्य अङ्कुश। वज्रपाशस्य पाश। वज्रस्फोटस्य शृङ्खला।

160A. इदानीं प्रव्रज्याग्रहणमुच्यते।

तदुक्त विनय।

आचार्य्योपाध्यायैः प्रव्राजयितव्य उपसम्पादयितव्य इति। भिक्षवो न जानन्ति कथं प्रव्राजयितव्य कथमुपसम्पादयितव्यमिति। भगवानाह। यस्य कस्यचित् प्रव्रज्यापेक्ष उपसङ्क्रामति। स तेनासौ अन्तरायिकान् धर्म्मान् पृष्ट्वा। आदौ त्रिशरणगमनानि पञ्चशिक्षापदानि उपासकसम्वरस्य दातव्य। चैत्यवन्दना कार-यित्वा आचार्य्यस्य पुरतो मण्डले कारयित्वा उत्कुटकासनेनाञ्जलिं प्रगृह्य च वक्तव्य। ब्रूहि अहमित्थनामा यावज्जीव बुद्धशरणं गच्छामि द्विपदानामग्रम्॥ धर्म्मं शरणं गच्छामि विरागाणामग्रम्॥ सङ्घं शरणं गच्छामि गणानामग्रम्॥ द्विरपि तत पञ्चशिक्षापद देयम्। अहमित्थनामा यावज्जीव प्राणातिपातात् प्रतिविरमामि। अहमित्थनामा यावज्जीवमदत्तादानात् प्रतिविरमामि। अह-मित्थनामा यावज्जीव काममिथ्याचारात् प्रतिविरमामि। अहमित्थनामा याव-ज्जीवं मृषावादात् प्रतिविरमामि। अहमित्थनामा यावज्जीव सुरामैरेयमद्य-प्रमादस्थानात् प्रतिविरमामि। त्रिरपि॥ एव त्रिशर(अ)णगमनता पञ्चशिक्षापदा-दिकामुपासकशिक्षामाधारयितुम्। तत आचार्य्यो याचितव्यः। समन्वाहर अह-मित्थनामा आचार्य्यं याचे॥ आचार्य्यमाह प्रव्रजिष्ये॥ द्विरपि॥ तत उपाध्यायो जाचितव्य समन्वाहर उपाध्याय भवान् उपाध्यायो भूत्वा अह इत्थनामा उपा-

ध्यायेन प्रव्रजिष्ये ॥ त्रिरपि ततः केशानवतार्य्य चूडा स्थापयितव्या। ततः प्रष्टव्य'। अद्यापि त्वं गृहिणामसमान एव। किं प्रव्रज्याया निश्चय इति। यदि ब्रवीति निश्चय इति तदा अवतार्य्य चतु'समुद्रजलै· स्नापयित्वा काषायवस्त्रैराच्छाद्य वक्तव्य' ॥ ब्रूहि ॥ अहमित्थंनामा यावज्जीवं गृहलिङ्गं परित्यजामि प्रव्रज्यालिङ्गं समाददे ॥ त्रिरपि ॥ तत· प्रव्रज्याचित्तमाभिमुखीभावं कृत्वा प्रव्राजयेत् ॥ प्रव्रजान् गृहस्थनामपरित्यागेन निकायानुरूपेण भिक्षुनामोच्चारणपूर्व्वं त्रिशरणगमनं कारयेत्। ब्रूहि ॥ अहमित्थंनामा यावज्जीवं बुद्धं शरणं गच्छामि, द्विपदानामग्रम् ॥ अहमित्थंनामा यावज्जीव धर्म्मं शरणं गच्छामि विरागाणामग्रम्। अहमित्थनामा यावज्जीवं सङ्घं शरणं गच्छामि गणानामग्रम् ॥ त्रिरपि ॥ ततो दशशिक्षापदानि दातव्यानि। समन्वाहर आचार्य्य। यथा ते आर्य्यार्हन्तो यावज्जीवं प्राणातिपात प्रतिविरताः ॥ एवमहमित्थंनामा यावज्जीव प्राणातिपातवैरमणं श्रामणेरशिक्षा समाददे। एवमेवाहं प्रथमेनाङ्गेन तेषामार्य्याणामर्हतां शिक्षायामनुशिक्षे अनुविधीये अनुकरोमि यथा ते आर्य्या अर्हन्तो यावज्जीवं अदत्तादानमब्रह्मचर्य्यम्मृषावादसुरामैरेयमद्यप्रमादस्थाना नृत्यगीतवादित्र माल्यगन्धविलेपनवर्णकधारणमुच्चशयनमहाशयनाकालभोजनजातरूपरजतप्रतिग्रहात् प्रतिविरता ॥ एवमेवाहमित्थंनामा यावज्जीव अदत्तादानवैरमणश्रामणेरशिक्षापदं समापादयामि। अहमित्थनामा यावज्जीव अब्रह्मचर्य्यवैरमणशिक्षापदं समाददे। अहमित्थंनामा यावज्जीवं मृषावादवैरमणशिक्षापदं समाददामि। अहमित्थनामा यावज्जीवं सुरामैरेयमद्यप्रमादस्थानवैरमणशिक्षापदं समाददामि। अहमित्थनामा यावज्जीव उच्चशयनमहाशयनशिक्षापदं समाददामि ॥ अहमित्थनामा यावज्जीवं नृत्यगीतवाद्यवैरमणंशिक्षापद समाददामि ॥ अहमित्थंनामा यावज्जीव मालागन्धविलेपनवैरमण शिक्षापदं समाददामि ॥ अहमित्थंनामा यावज्जीवं जातरूपरजतप्रतिग्रहणवैरमण शिक्षापदं समाददामि ॥ त्रिरपि ॥ अनेनाहं दशमेनाङ्गेन तेषामार्य्याणामर्हतां शिक्षामनुशिक्षे अनुविधीये अनुकरोमि ॥ ॥ तत· पात्रचीवरं पर्य्येषितव्य आचार्य्योपाध्यायावध्येषितव्यौ। सन्निपतिते संघमण्डलकं कृत्वा दक्षिणं जानुमण्डल पृथिव्यां प्रतिष्ठाप्य कृताञ्जलिमाधाय ॥ समन्वाहर आचार्य्य अहमित्थंनामा आचार्य्य अध्येषयामि इद चीवर सङ्घस्य विश्वासे सङ्घपरिभोगायाधितिष्ठन्तु ॥ तथा ॥ समन्वाहर आचार्य्य अहमित्थनामा आचार्य्य अध्येषयामि इद चीवर राजकुलगमनायाधि-

तिष्ठतु । तथं । समन्वाहर आचार्य्य अहमित्यनामा आचार्य्य अध्येषयामि इद चीवर ग्रामनगरनिगमाराममपल्लीपत्तनगमनायाधितिष्ठेत् । समन्वाहर आचार्य्य अहमित्यनामा आचार्य्य अध्येषयामि । इदं पात्र ऋषिभाजनभिक्षाभाजनभोजन-परिभोगिकमधितिष्ठतु । तथा समन्वाहर आचार्य्य अहमित्यनामा आचार्य्य मध्येषयामि इमा भिक्षाभाजनकुण्डिकामधितिष्ठतु ॥ तथा समन्वाहर आचार्य्य अहमित्यनामा आचार्य्य अध्येषयामि इमा खिच्चिरिकामधितिष्ठतु ॥ त्रिरपि ॥ समन्वाहर उपाध्याय अहमित्यनामा उपाध्याय अध्येषयामि इद चीव[रं] सघस्य विश्वासनपरिभोगायाधितिष्ठतु ॥ तथा समन्वाहार उपाध्याय अहमित्य-नामा उपाध्याय अध्येषयामि । इद चीवर राजकुलगमनायाधितिष्ठतु ॥ तथा समन्वाहर उपाध्याय अहमित्यनामा उपाध्याय अध्येषयामि । इद चीव[र] ग्रामनगरनिगमाराममपल्लीपत्तनगमनायाधितिष्ठतु ॥ समन्वाहर उपाध्याय अह-मित्यनामा उपाध्याय अध्येषयामि इद पात्र ऋषिभाजन भिक्षाभाजनं पारिभोगिकमधितिष्ठतु । तथा समन्वाहर उपाध्याय अहमित्यनामा उपाध्याय अध्येषयामि । इमा भिक्षाभाजनकुण्डिकामधितिष्ठतु । तथा समन्वाहर उपाध्याय अहमित्यनामा उपाध्याय अध्येषयामि इमा खिच्चिरिकामधितिष्ठतु ॥ त्रिरपि ॥ समन्वाहरन्तु आचार्य्यसङ्घा अहमित्य नामाचार्य्यसङ्घा अध्येषयामि ॥ इदचीवर सङ्घस्य विश्वासे सङ्घपरिभोगायाधितिष्ठन्तु ॥ समन्वाहरन्तु आचार्य्य-सङ्घा अहमित्यनामा आर्य्यसङ्घानामध्येषयामि । इदचीवरं राजकुलगमनाया-धितिष्ठन्तु ॥ समन्वाहरन्तु आर्य्यसङ्घा अहमित्यनामा आर्य्यसङ्घामध्येषयामि ॥ इद चीवर ग्रामनगरनिगमपल्लीपत्तनगमनाय अधितिष्ठन्तु ॥ तथा समन्वा-हरन्त्वार्य्यसघा अहमित्यनामा आर्य्यसघा अध्येषयामि ॥ इद पात्र ऋषिभाजन भिक्षाभाजन भोजनपारिभोगिकमधितिष्ठन्तु ॥ तथा समन्वाहरन्त्वार्य्यसङ्घाः अहमित्यनामा आर्य्यसङ्घानध्येषयामि ॥ इमा भिक्षाभाजनकुण्डिका+ + + + + + + + + + + + + आर्य्यसङ्घा अहमित्यनामा आर्य्यसङ्घानध्येषयामि ॥ इमा खिच्चि[रि]कामधितिष्ठन्तु ॥ त्रिरपि ॥ तत आचार्य्येण प्रदातव्यम् । चीवरमयामन्त्रेण ॐ नम समस्तबुद्धाना सर्व्वतथागताधिष्ठितात्मचीवर स्वाहा । तत समन्वाहरन्तु भदन्त अहमित्यंनामा इद चीवर सङ्घस्य विश्वासपरिभोगाय धारयामि ॥ तथा समन्वाहरन्तु भदन्ता॰ अहमित्यनामा इद चीवर राजकुल-

गमनाय धारयामि । समन्वाहरन्तु भदन्ता अहमित्थंनामा इदं चीवरं ग्रामनगरनिगमपल्लिपत्तनगमनाय धारयामि । समन्वाहरन्तु भदन्ता अहमित्थंनामा इदं पात्रं ऋषिभाजनं भिक्षाभाजनं भोजनोपभोगाय धारयामि । समन्वाहरन्तु भदन्ता अहमित्थंनामा भिक्षाभाजनकुण्डिका धारयामि । समन्वाहर भदन्ता अहमित्थंनामा खिक्खिरिका धारयामि ॥ तथा समन्वाहरन्तु भदन्ताः अहमित्थं नामा आर्य्याख्यासम्वरमासपत्स्ये ॥ साधुसम्वर सुष्ठ सम्वरिष्ये । समन्वाहरन्तु भदन्ता अहमित्यनामा यदा सङ्घस्य सामग्री लप्स्ये तदा अनेन सङ्घेन सार्द्धं पोषधं करिष्ये । शीलस्कन्धस्य परिपूरये । समाधिस्कन्धस्य प्रज्ञास्कन्धविमुक्तिज्ञानदर्शनस्कन्धस्य परिपूरये । त्रिरपि । ग्रन्थवि + + + + इति प्रव्रज्याविधि ॥—महापण्डितकुलदत्तविरचितायां कुलपञ्जिकायां सप्तम प्रकरणम् ॥

No work on the rituals of the Maháyána School of Buddhism has yet been obtained So an attempt has been made here to give that ritual in as complete a form as possible in a catalogue The chapter on initiation has been copied *in extenso,* so that it may be compared with the Hínayána rituals as given in the Golden Book

80

4728 **क्रियासंग्रहपञ्जिका ।** *Kriyāsamgraha-Pañjikā*

By KALADATTA

Substance Nepalese paper $13\frac{1}{2}\times 4$ inches Folia 104 Lines 7 on a page Extent in slokas 3100 Character Newari Appearance, discoloured Complete

Colophon —इति श्रीमहापण्डितनिसङ्गाचार्य्य श्रीकुलदत्त विरचितायां क्रियासंग्रहोनामपञ्जिकायां अष्टमा प्रकरण समाप्त ।

Post-Col —सम्वत् ८३६ माघ कृष्णसप्तमी अ सम्वत्सर सचोडङ्गेया । आवया सम्वत्सर ७६२ मार्गशिर कृष्णसप्त ॥ सम्वत् ८४० फाल्गुन कृष्ण षष्ठ्यां कुङ्कु आदित्यवार सम्पूर्णमिति । लिखित श्रीभगतापुलिमहानगरो दक्षिणदिग्पश्चप्रतिविहारे श्रीरद्देवतालोकि स्वस्थचरसेवित नित्य नित्य धर्म्मकर्म्मसेवक धर्म्मदेव स्थविरताधकार

याभीवन् मल्लाडाद्दो ... ...श्रीवज्राचार्य्य जयंद्रयवताधिकाव दयका कुरो। राजाधिराज श्रीरत्नजितमल्लदेवस्य विजयेराज्ये मिति। शुभ।

It ends —ततो वज्री यदा सौमामिनिर्व्वाणमुपगच्छति तदा रजःप्रवाहोक्त विधिनैव भस्मप्रवाहं कुर्य्यादिति।

निरीक्ष्यतन्त्रनिखिल मथाय +सद्व्रतेचावतरा विशुद्धा।
नापूर्व्वशब्देन सुशोभनेन तथापि सत सुधिय क्षमध्व॥
सारं सरल मनघ श्रीकुलदत्तेन योजितं ग्रंथं।
यजमानमनोधरणं निखिलाचार्य्यस्य परमाभरणं।
पर्शो विधाय विधिना यदवापि शुभ मया।
बध्यसत्त्वोस्तु लोकोय तेनावधमयो वर॥

The preceding MS of this work comes to an end with the 7th Prakarana The topics of the 8th are —179B इदानी चतुर्नामपि आकृतीना सामान्येन विशुद्धिरुच्यते। 181A, ध्वजाना लक्षण, 186B छत्रप्रतिष्ठा, 187A चामर प्रतिष्ठा ध्वजप्रतिष्ठा, पताकाप्रतिष्ठा, 188A श्रीशोद्धरणविधि। इदानी मण्डलोपम विधिरुच्यते।

81.

1758 Two Works.

I —तथागतप्रतिविम्बप्रतिष्ठानुशंसवर्णनधर्म्मपर्य्यायः।

Tathāgatapratibimbapratisthānuśamsavarnana Dharma-paryāya

II —दिव्यभोजनावदान *Divyabhojanāvadāna*

Substance, palm leaf. 12×2 inches Folia, 8, numbered 1 and 6 to 12 Lines, 5 on a page Character, Newari Appearance, old and discoloured Dated, N S 385

I —Comes to an end in 7B, line 1, then begins II.

I

Beginning.— ॐ नमोऽस्तु बुद्धाय।

एवम्मया श्रुतमेकस्मिन् समये भगवान् श्रावस्त्यां विहरति स्म जेतवनेऽनाथपिण्डदस्यारामे। अथायुष्मानानन्दो येन भगवांस्तेनो-पसङ्क्रामदुपसंक्रम्य भगवतः पादौ शिरसाभिवन्द्य एकान्तेऽस्था-देकान्ते स्थित आयुष्मानानन्दो भगवन्तमेतदवोचत्। किं भगवन् कुशलमूलं धर्म्मार्जनप्रदानस्य किं नखकेशप्रदानस्य। किं स्तूप-गमनशिक्षापदाना। किं तथागतप्रणामाञ्जलिकर्म्मणः। किं भदन्त कुशलमूलं संसारे न क्षीयते न हीयते यावच्च निर्वाण-मुपनयति किं तथागतबिम्बकारणे। भगवानाह। इत्यादि।

Colophon.—तथागतप्रतिबिम्बप्रतिष्ठानुशंसवर्णनो नाम धर्म्मपर्य्याय। समाप्त। सम्वत् ३८५ फाल्गुनि शुक्ल १० बृहस्पतिदिने

II.

Beginning.— ॐ नमो बुद्धाय।

दिव्यभोजनमिति बुद्धो भगवान् सत्कृतो गुरुकृतो मानित पूजितो राजभी राजमात्रैर्धनिभिः (?) पौरैः श्रेष्ठिभिः सार्थवाहैः देवैर्ना-गैर्यक्षैरसुरैः गरुडैः किन्नरैर्महोरगैरिति देवनागयक्षासुरगरुड-किन्नरमहोरगाभ्यर्चितो बुद्धो भगवान् ज्ञातो महापुण्यलाभी चीवरपिण्डपातशयनासनग्लानप्रत्ययभैषज्यपरिष्काराणां श्रावकसङ्घै राजगृहे विहरति। इत्यादि।

Colophon.—दिव्यभोजन अवदान समाप्त। सम्वत् ३८५ फाल्गुनि शुदि १२ बुधवासरे। नमो बुद्धाय नमो धर्म्माय नम संघाय।

82.

1840. **वसुन्धरोद्देश।** *Vasundharoddeśa.*

Substance, palm-leaf 9½ x 2 inches. Folia, 6. Lines 6 on a page. Extent in ślokas, 75. Character, Newari of the 15th century. Appearance old and discoloured.

A ritual of Vasudhārā or the Goddess of Wealth

Beginning —ॐ नमो भगवति वसुधाराये ।

समन्वाधरतु मा बुद्धा यथे[य] दिच्चु सस्थिता ॥

भगवति वसुधारे ज्ञानभूर्त्ति नमामि

ध नगनगुणमनोरथातोरणामन्त्रगयोवती ।

ग्रवमिगुणनिधान काञ्चन रत्नवर्षा

धञ्जनधनवृष्टि शासरा रत्नकूटा ॥

मैत्री करुणा मुदिता उपेक्षा । ॐ स्वभावशुद्धा सर्व्वधर्म्मास्व

भावात्मकोऽहं शून्य विभाव्य शून्यतानन्तर ॥ फट्कारेण विश्वदलपद्म

पद्मकर्णिकोपरिचन्द्रमण्डलम् ॥ तदुपरि हुङ्कार । तदुपरि यामेन

भद्रघट भद्रघट परिणामेन वसुधारा भगवती भावयेत् ॥ इत्यादि ।

Colophon —इति वसुन्धरादेश दोपयेत् समाप्त ।

यदि शुद्धमशुद्ध वा लेखको नास्ति – – – – ॥

83.

9971 **दमनकमहारक्षा (महातन्त्रराज)।** *Damanaka Mahāraksa (Mahā-Tantrarāja)*

Substance, palm-leaf 11×2 inches Folia, 5, marked 2 to 7 Lines, 5/6 on a page Extent in Slokas, 125 Character Newari *Date, N S 371=A D 1251* Appearance, old and dilapidated

Last Colophon —इति श्रीदमनके महारक्षातन्त्रराजसर्व्वनयापिश्री-

मन्त्रसमुच्चयध्यान समाप्तम् ॥

Post-Colophon Statement —शुभम् ॥

सवत् ३७१ मार्गवदि ४ ॥ शुभात् ।

The first leaf of the MS seems not to belong to this work It has been substituted for the first leaf

The second leaf begins —

निर्व्वाण ॥ ॐ हूं श्रीं क्ष्मं क्ष्मौं ॐ क्ष्मौं पायु ॥ ॐ धू सर्व्वाङ्गमध्योत्त

भैरवाय —(Then a Kūtāksara Mantra—or a combination of a

number of consonants with a single vowel and with the sign of nasal) ज्ञ ज्ञ' ज्ञ पाय् ५ ऍ क्ष्रौँ श्रीँ

ऍ श्रीँ महानिर्व्वाणेश्वरानन्दनाथ ईश्वरीशक्तिसहिताय सिद्धान्ताधिकारोभव ।

CONTENTS

2A 1. 5 महानिर्व्वाण — In the same line गायत्री — 2B 1 2 इति निर्व्वाणमन्त्र, अथ पञ्चमीपूजनम् — 2B 1. 5 इति पञ्चमीपूजा ततो हनुभैरवपूजनम् — 2B 1 6 ॐ ५ नमो भगवते वानरराजाय महाबलपराक्रमाय गगणागमन—सागरोत्तरण-लङ्काप्रमथन एहि एहि — 3A. 3 इति हनुभैरवपूजा इति द्वादशाङ्गन्यास 3B 1 त्रिविद्यान्यासः — 3B. 2 षोरिकाष्टकन्यास' — 3B 5 ग्रथिन्यासः — 4A. 1 एकाक्षरी षोढान्यास — In the same line प्रणवपञ्चकन्यासः — 4A. 2 निरात्मान्यासः — 4B. 4. इति पूजा — 5A. 1. अथ परस्य सेनालंघनविधि माह — 5B. 4. पञ्चोपाचरपूजा — 7A. 1 इति न्यासश्लोकः ।

The first leaf seems to be about the ritual of Caityapūjana by the Buddhists

It begins — ॐ नमो बुद्धाय ।

रत्नप्रस्थानसूत्रान्ते प्रोक्त['] यच्चैत्यपूजनम् ।
तदहं संप्रवक्ष्यामि सत्ताना शुभवृद्धये ॥

तत्रादौ कृतमुखशौचादि परिहितस्शुचिवस्त्र सर्व्वीकृतपूजोपकरण क्वचिद्विजनमनोऽनुकूले प्रदेशे सुखासने पूर्व्वाभिमुखमुपविष्टो मौनीभूय सलक्षणं सधातुक अधातुक वा चैत्यमेक पञ्च नव वा मञ्चकादौ निवेशित पुरतो गुरुमण्डलवत् कृतमण्डलेऽवस्थाप्य प्रतीत्यसमुत्पन्नमायादिसमजगदधिमुच्य झटिति विरोचनरूपं चन्द्रस्थशुक्लोङ्काराधिष्ठितहृदयमात्मानं विभाव्य वोध्य श्रीमुद्रा बद्धा शिर'-कण्ठहृत्सु चक्रपद्मवज्रमुष्टिसु चन्द्रसूर्य्यसूर्य्यस्थान् शुक्लारक्तकृष्णान् ॐ आँ ह्रीँ कारान् दृष्ट्वा पूजादिक च अचरेणाधिष्ठाय पुरस्थभट्टारक सूणीकृत्य झटिति चतुर्भूतमण्डलस्थसुमेरूपरि पद्मे अष्टदले ॐ ह्रूँ श्रीँ ह्रीँ खँ लाँ माँ याँ ताँ कारज चन्द्रसूर्य्यचतुष्टयचन्द्रचतुष्टयस्थस्ववीजाधिष्ठितचक्रादिचिह्नपरिणतान् वैरोचना-

दीन् ध्यात्वा हृद्बीजकराग्रस्थान् कनिष्ठात् समयसत्त्वसमान् निवेश्य निर्भास । ॐ आ प्रवर सत्कार ह्री॰ अर्घ्य प्रतीच्छ हूँ स्वाहेत्यर्घ्यादिपुरःसर सपूज्य तत हूँ वँ होरिति समयसत्त्वैकीकृत्य चैत्यरूपेण परिणामयेत् ।

This appears to be in a Bengali hand of the twelfth century.

At another leaf in Bengali, much effaced We get the following verse —

चम्पू चम्पकमालेव विष्णुसिंहमहीपते॰ ।
गुम्फिता हरिनाथेन सदात्मा कविवल्लभा ॥

This appears to be the last leaf of the Campūkāvya and names a king named Visnusimha, who is found nowhere else

84.

9089 एकल्लवीर-चण्ड महारोषण तन्त्र । *Ekallavira-Canda-Mahārosana Tantra*

Substance, Nepalese paper 14¾×4 inches Folia, 41 Lines, 7 8 on a page Extent in ślokās, 1100 Character, Newari of the early nineteenth century Appearance, discoloured Complete

It begins —ॐ नमः श्रीचण्डमहारोषणाय ।

एव मया श्रुतमेकस्मिन् समये भगवान् वज्रसत्त्वः सर्व्वतथागतकायवाक्चित्तहृदयेवज्रयो[गि]नीभगेषु विजहार । अनेकैस्च योगिनीगणै । तद्यथा —

श्वेताचलेन च वज्रयोगिन्या । पीताचलेन च वज्रयोगिन्या । रक्ताचलेन च वज्रयोगिन्या [ना] । श्यामाचलेन च वज्रयोगिन्या । मोहवज्र्या च वज्रयोगिन्या । पैशुनवज्र्या च वज्रयोगिन्या । रागवज्र्या च वज्रयोगिन्या । ईर्षावज्र्या च वज्रयोगिन्या । एव प्रमुखै योगियोगिनीकोटिनियुतशतसहस्रै । अथ भगवान् वज्रसत्त्व कृष्णाचल नाम समाधि समापद्येदमुदाजहार ।

भावाभावविनिर्म्मुक्तस्चतुरानन्दैकतत्पर ।
निष्प्रपञ्चस्वरूपोऽहं सर्व्वसकल्पवर्ज्जित ॥

मान्नजानाति ये मूढाः सर्व्वपुम्वपुषि स्थितम् ।
तेषा(ना)मह हितार्थाय पञ्चकारणसस्थित· ॥

अथ भगवती देवबज्री समाधिमापद्येदम्मुदाजहार ।

शून्यता करुणाभिन्ना दिव्यकामसुखस्थिता ।
सर्व्वकल्पविहीनाहं निष्प्रपञ्चा निराकुला· ॥
मा न जानन्ति ये नार्य्य· सर्व्वस्त्रीदेहसस्थिता ।
तासामह हितार्थाय पञ्चाकारेण सस्थिताः ॥

अथ भगवान् क्षण्णाचलो गाढेन भगवतीदेवबज्री चुम्बयित्वा समालिङ्ग्य चामन्त्रयते स्म ।

देवि देवि महारम्यं रहस्य चातिदुर्ल्लभम् ।
सारात्सारतरं श्रेष्ठं सर्व्वबुद्धै सुभाषितम् ॥
शृणु वक्ष्ये महातन्त्रं तन्त्रराजेश्वर परम् ।
नाम्ना चैकल्लवीरन्तु सत्त्वानामासु(सु)सिद्धये ॥
अप्रकाश्यमिद तन्त्र अदृष्टमण्डलस्य हि ।
नान्यमण्डलप्रविष्टस्य तन्त्रराजन्तु दर्शयेत् ॥
मण्डले चण्डरोषस्य प्रविष्टो य[ ] समाहित ।
श्रद्धायत (यन्म) परश्चण्डे तस्य तन्त्र तु देशयेत् ॥
गुरौ भक्त कृपालुर्वै मन्त्रयानपरायण ।
भक्तश्चण्डेश्वरे नित्यं तस्य तन्त्रं प्रदर्शयेत् ॥
एव बुद्धा तु य· कश्चित् योगी(गि) लोभविलम्बित ।
चण्डस्य मण्डले दृष्टे देशयेत्तन्त्रमुत्तमम् ॥
स महाव्याधिभि[·] स्पष्टं विष्ठामूत्रामलीकृता· ।
षण्मासाभ्यन्तरे तस्य मृत्युदुःख भविष्यति ॥
यमदूतैस्ततो ग्रस्ता कालपाशैर्वशीकृत· ।
नरक नीयते पाप यदि बुद्धैरपि रक्षित ॥
यदि कर्मक्षयं दु ख भुक्ता च लक्षवत्सरम् ।
मानुष्यं प्राप्नुते जन्म तत्र वज्रेण भिद्यते ॥
तस्मात् मण्डल चारु वर्त्तयेन्मंत्रविद्व्रती ।
प्रवेश्य तत्र वै शिष्यान् पूर्व्वमेव परीक्षितान् ॥

ततो हि देशयेत्तन्त्रं चिरम् लोकेषु दुर्लभम् ।
अश्रुत देशयेद्योपि सोऽपि गच्छत्यधोगतिम् ॥
मुखपाको भवेत्तस्य यदि बुद्धसमोऽपि हि ।
श्रद्धाहीनोऽथवा शिष्य शृणुते जिज्ञासनाय ॥
भिद्यते मूर्द्धि वज्रेण दृष्टिकाले न संशय ।
तथामेतन्मया देवि भाषित च वरानने ॥
तन्त्रं चैकल्लवीरोऽस्मिम् सगुप्ते चण्डरोषणे ।—

इत्येकल्ल[वी]राख्ये(षे) चण्डमहारोषणतन्त्रे तन्त्रावतारपटल. प्रथम. ।—

3B ॰ मण्डलपटलोद्वितीयः, 5B, ॰ श्रीचण्डरोषणतन्त्रे अभिषेकपटलस्तृतीय ।

4B. अथ गुह्याभिषेको भवति । शिष्यो गुरुं वस्त्रादिभि· सम्पूज्य तस्मै स्वमनोवाञ्छिता रूपयौवनमण्डिता निर्यातयेत् ।

इय निर्य्यातिता तुभ्य सर्व्वकामसुखप्रदा ।
मया कामसुखार्थं ते गृह्ण नाथ कृपा कुरु ॥

ततो गुरुं नमस्कृत्य शिष्यो बहिर्निर्गच्छेत् ।

ॐ चण्डमहारोषण हूँ झडिति मन्त्र जपन् तिष्ठेत् ।

गुरु· पुनर्मद्यमासादि[भि] आत्मा[नं] पूजयित्वा सम्पुटीभूय तद्भूतं शुक्रशोणित पर्णपुटादाव[व]स्थाप्य शिष्यमाहूय तस्य जिह्वाया अनामिकाङ्गुष्ठाभ्या दद्यं गृहीत्वा हूँ फट्कारं लिखेत् ।

ततो अहोसुखमिति पठेच्च ।

तत एव वदेत् ।

अद्याह तेन वज्रज्ञानमुत्पादयामि येनातीतानागतप्रत्युत्पन्ना बुद्धा भगवन्त अप्रतिष्ठितनिर्व्वाण प्राप्ता । किन्तु न तत्पद अदृष्टमण्डलस्य पुरतो वक्तव्यम् ।

5A, ततो बहिर्निर्गच्छेद् गुरुः ।

प्रज्ञा तु नाग्निभूय उत्कटकेन गुह्य तर्ज्जन्या दर्शयन्ती

कित्वमुत्सहसे वत्स मदीयाशु(शु)चिभक्षणम् ।

विण्मूत्रञ्च रक्तञ्च भगस्यान्त· प्रचूषणम् ॥

7B, इत्येकल्लवीराख्ये चण्डमहारोषणतन्त्रे देवतापटलश्चतुर्थं

6A, तञ्जमच्चोभकं ध्यायेत् मामक्या सह सम्पुटम् ।
संक्रमेत्तत्र योगीन्द्रः तस्य मूर्ध्नि विरेचयेत् ॥
तारासंक्रान्तयोगेन मामकीभगचेतसा ।
तत्र शुक्ररसीभूतः पतेत्तस्य भगोदरे ॥
निष्पन्नश्च[ण्ड]रूपन्तु· निःसरेच्च भगात्ततः ।
हन्यात् खड्गेन चाचोभ्य पितरं पश्चात् प्रभक्षयेत् ॥
मामक्यापि तत· पश्चाद्भक्षित वै प्रकल्पयेत् ।

8A, ० मन्त्रपटलः पञ्चम ; 12A, निष्पन्नयोगपटल षष्ठम ।

9A अहो सुखावतीक्षेत्र रक्तबुद्धोपशोभितम् ।
रागिणा सुखद शान्त सर्व्वकल्पविवर्ज्जितम् ॥
आमन्त्रणेन सम्पाद्य रागविह्वलमानसा ।
स्कन्धे पादयुग दत्त्वा ममाधोऽर्द्धं निरीक्षय ॥
स्फुरद्वच[ं] ततः पद्ममध्ये रन्ध्रे प्रवेशय ।
देहि धारसहस्र[ं]त्व सच्चकोटिमथार्व्वुदम् ॥
मदीयत्रिदले पद्मे मासवर्त्तीसमन्विते ।
स्वच्च वज्र प्रक्षिप्य सुखैश्चित्त प्रपूजय ॥

12B, ० देहप्रीणनपटलः

14B, ० स्वरूपपटल अष्टमः , 15B, ध्यानपटलो नवमः ।

14A, एकएव भवेच्चण्डः पञ्चरूपेण सस्थित ।
एष चण्डः समाख्यातो अस्य सिद्धिदृढव्रत ॥

17A, ० स्त्रीप्रशंसापटलो दशमः , 17B, विम्बपटल एकादशः ।

17A. सर्व्वोहं सर्व्वव्यापी च सर्व्वकृत् सर्व्वनाशक ।
सर्व्वरूपधरो बुद्ध· हर्त्ता कर्त्ता प्रभु सुखी ॥
येन येनैव रूपेण सत्त्वा यान्ति विनेयता ।
तेन तेनैव रूपेण स्थितोऽहं लोकहेतवे ॥
क्वचित् बुद्ध· क्वचित् सिद्ध क्वचिद्धर्म्मोऽथ संघक ।
क्वचित् प्रेत क्वचित्तिर्य्यक् क्वचिन्नारकरूपक· ॥

22A, सर्व्वमन्त्रकपटलो द्वादशम , 23B, ० चर्य्यापटलस्त्रयोदशम ।

23A प्रज्ञोपाय समायोगेन नख दद्यात्तु व्यन्तरम् ।
चुम्बनालिङ्गनञ्चैव सर्व्वंसंश्रुक्रमेव च ॥
दानपारमिता पूर्णा भवत्येव न संशय ।
तत्परं कायवाक्चित्त सम्भृतं गाढसौख्यत ॥
शीलपारमिताज्ञेया ज्ञेया संङ्गनाच्च नखक्षतम् ।
व्यन्तरं पीडनञ्चैव क्षान्तिपारमितान्विता ॥
सादरं दीर्घकालञ्च रतं कुर्य्यात् समाहित ।
वीर्य्यपारमिता ज्ञेया तत्सुखे चित्तयोजना ॥
सर्व्वंतोभद्ररूपेण ध्यानपारमिता मता ।
स्त्रीरूपभावना प्रज्ञापारमिता प्रकीर्त्तिता ॥
सुरतैकयोगमात्रेण पूर्णा षटपारमिता भवेत् ।
पञ्चपारमिता पुण्यज्ञानप्रज्ञेति कथ्यते ॥
सुरतयोगसमायुक्तो योगसम्भारसम्भृत ।
सिद्ध्यते क्षणमात्रेण पुण्यज्ञानसमन्वितः ॥
यथा लतासमुद्भूत फलपुष्प समन्वितम् ।
एकक्षणाच्च सम्बोधि सम्भारद्वयसम्भृता ॥
स त्रयोदशभूमीशो भवत्येव न संशय ।
भूमिस्तु मुदिता ज्ञेया विमलार्च्चिष्मतिस्तथा ॥
प्रभाकरी सुदुर्ज्जयाभिमुखी दूरंगमाचला ।
[सा]धुमती धर्म्ममेघा समन्त[ा]ख्यप्रभा तथा ॥
निरुपमा ज्ञातवतीत्येवं त्रयोदश च ॥

24A, ० अचलार्थपटलश्चतुर्द्दश (gives reasons why Canda Mahārosana is called Acala, Ekallavīra and Candamahārosana), 25B ० विशुद्धिपटल पञ्चदश,

25A पुरुषरूप भाव स्त्रीरूपमभाव । नीलो विज्ञान श्वेतो रूपं पीतो वेदना रक्त संज्ञा श्याम संस्कार — अथवा नीलमाकाश श्वेता-जलं पीता पृथ्वी रक्ता वह्नि श्यामो वात — यथा भगवता तथा भगवतीना — अथवा नील सुविशुद्धधर्म्मधातुज्ञान, श्वेत आदर्शज्ञान, पीत समताज्ञान, रक्त प्रत्यवेक्षणाज्ञान श्याम कृत्यानुष्ठानज्ञानम् ,

एक एव जिन-शास्ता पञ्चरूपेण संस्थिता ।
प्रज्ञापारमिता चैका पञ्चरूपेण संस्थिता ॥

27B, ० समुत्पादपटलः षोड़शम ; 29B, ० शुक्रादिवृद्धिपटल सप्तदशम , 31B, ० व्याधिवृद्धलक्षहानिपटलोऽष्टादशम' ; 33B, ० शुक्रस्तम्भादिपटल ऊनविंशतिम ; 36A. ० नानाभिमेदिवयन्त्रपटलो विंशतितम , 38A ० कुतूहलपटल एकविंशतम ; 39A ० वायुयोगपटलो द्वाविंशतितम' ; 39B, ० मृत्युवञ्चणपटल त्रयोविंशतितम, देहस्वरूपपटल' चतुर्विंशति तम ० (Last Colophon) देवीसाधनपटल' पञ्चविंशतितम' ।

Ch X 15B

The position of Śakya Sinha is thus defined in this cult

अथ भगवती आह । किं भगवन् स्त्रीव्यतिरेकेणापि शक्यते साधयितु चण्डमहारोषणपद उताहो न शक्यते ।

भगवानाह न शक्यते देवि ।

भगवती आह कि भगवन् सुखानुदयात् न शक्यते ?

भगवानाह ।

न सुखोदयमात्रेण लभ्यते बोधिरुत्तमा ।
सुखविशेषोदयादेव प्राप्यते सा च नान्यथा ॥

. . .

16B लोककौतुक्यनाशार्थं मायादेवीसुत सुधी ।
चतुरशीति सहस्राणि त्यक्त्वा चान्त'पुरं पुन ॥
गत्वा निरञ्जनातीरं बुद्धसिद्धिप्रकाशक' ।
यातो मारान्निराकृत्य न चैवं परमार्थतः ॥
यस्मादन्त पुरे बुद्ध सिद्धो गोपान्वित सुखी ।
वज्रपद्मसमायोगात् स सुखं लभते यत ॥
सुखेन प्राप्यते बोधि सुखं न स्त्रीवियोगत ।
वियोग[ ] क्रियते यत्तु लोककौतुक्यहानये ॥
येन येनैव ते लोका यान्ति बुद्ध विनेयताम् ।
तेन तेनैव रूपेण मायादेवीसुतो जिन ॥

सर्व्वसूत्राभिधर्म्मेण कृत्वा निन्दास्तु योषिताम् ।
नाना शिक्षापदं भावैतस्तु स्वगोपनभाषया ॥
निर्व्वाणं दर्शयेच्चापि पञ्चस्कन्धविनाशत ॥

अथ भगवती प्रज्ञापारमिता आह ।
का भगवन् मायादेवीसुतः का च गोपा?

भगवानाह ।
मायादेवीसुतस्त्वाह चक्रुरोषणता गत ।
त्वमेव भगवती गोपा प्रज्ञापारमितात्मिका ॥
यावन्तस्तु स्त्रिय सर्व्वास्तद्रूपेणैव ता मता ।
मद्रूपेण पुमांसस्तु सर्व्व एव प्रकीर्त्तिता ॥
द्वयोर्भावगत चैतत् प्रज्ञोपायात्मक जगत् ।

अथ भगवती आह,— कथं भगवन् श्रावकादयो हि स्त्रियो दूषयन्ति

भगवानाह । कामधातुस्थिता सर्व्वे ख्याता ये श्रावकादय ।
मोक्षमार्गं न जानन्ति स्त्रिय पश्यन्ति सर्व्वदा ॥
सन्निधानं भवेद्यत्र दुर्लभं सुङ्कमादिकम् (?) ।
न तत्रार्थं समाप्नोति दुरस्थस्य महार्थता ॥
अनाद्यज्ञानयोगेन श्रद्धाहीनास्त्वमी जना ।
चित्तं न कुर्व्वते तत्त्वे मयाप्येतत् प्रगोपितम् ॥

The last chapter is of some iconographic interest

40A. अथ भगवती आह ।
अपरं श्रोतुमिच्छामि प्रज्ञापारमितोदयम् ।
प्रसाद कुरु मे नाथ संक्षिप्त नातिविस्तरम् ॥

अथ भगवानाह ।
अथात संप्रवक्ष्यामि प्रज्ञापारमितोदयम् ।
सत्त्वपर्य्यङ्किनी देवी षोडशाब्दवपुष्मती ॥
नीलवर्णा महाभागा षड्भोग्येन च मुद्रिता ।
रक्तपद्मोद्यता सव्ये नीलायावा (?) सहस्रके ॥

स्थितं वै कामशास्त्रं तु पद्मचन्द्रोपरिस्थितम् ।
पीनोन्नतकुचा दृष्टा विशालाक्षि प्रियंवदा ॥
सहजाचलसमाविस्था देवीमेतान्तु भावयेत् ।
ऊंकारज्ञानसंभूता विश्ववज्रीन्तु योगिनीम् ॥
भावयेत् हर्षितो योगी ध्रुवं सिद्धिमवाप्नुयात् ।
अथवा भावयेच्चेता वाणाक्षीकारसंभवाम् ॥
मुद्रिता म्म + + तनैव पीताम्बचधात्वेश्वरीम् ।
रक्तेन मुद्रिता वज्रा रक्ताम्बा [कुरु]कुल्लिका ॥
अमिताभमुद्रिता देवी ह्रींकारज्ञानसभवाम् ।
ताराम्बा श्यामवर्णाञ्च त्वाकार ज्ञानसंभवाम् ॥
अमोघमुद्रिता ध्यायेत् पूर्व्वरूपेण मानव ।
सत्त्वपर्य्यङ्कसंस्थस्तु सौम्यरूपेण संस्थित ॥
खड्गपाशधर श्रीमान् आलीढाभिनय कृती ।
स्वकुलीम्वाथ कान्या गृह्य प्रभावयेत् ॥ (?)
अनेन सिध्यते योगी मुद्राया नैव संशय ।
अथवा प्रतिमा कृत्वा साधयेत्सुत्रादिसंस्कृता ॥
सहजखण्डसमाविस्थो जपेदेकाग्रमानस ।
40B अथात सप्रवक्ष्यामि एकवीरन्तु मण्डलम् ।
चतुरस्र चतुर्द्वार चतुस्तोरणमण्डितम् ॥
पीतवर्ण तु कर्त्तव्य मध्यपद्मं चतुर्द्दलम् ॥
तस्य चाग्नौ दलं श्वेत नैरृत्ये रक्तसन्निभम् ।
वायव्ये पीतवर्णन्तु श्याममैशानकोणके ॥
मध्ये वै कृष्णवर्णन्तु तत्राचलं प्रकल्पयेत् ।
सूर्य्यस्थमथवा श्वेतं पीतम्वा रक्तमेव वा ॥
श्यामं वा पञ्चभिर्बुद्धै एकरूप विचिन्तयेत ।
रोचनामग्निकोणे च चण्डाशोकविधायिणी ॥

वामदक्षिणकराभ्यां च शरचन्द्रकरप्रभाम् ।
नैऋत्ये पद्मरा देवी धनुर्वाणधरा परा ॥
रक्ता वायव्यकोणे तु मामकी पीतसन्निभा ।
+ + + + शिखाहस्ता श्याममैशानकोणके ।
तारिणी वरदा सव्य वामे नीलोत्पलधारिणी ॥
एता चण्डाशना सर्वा चन्द्रपद्मकसंस्थिता ।
रागवज्रा न्यसेत् पूर्वे द्वारे शत्रुहता समा ॥
खड्गपर्परधरा रक्ता देयवज्रन्तु दक्षिणे ।
कत्तिकपालकरा नीला यमेन कृतवेष्टिता ॥
पश्चिमे मारवज्रान्तु वर्णवज्रकराचला ।
मयूरपिच्छवस्त्रातु वन्यस्था श्यामसन्निभाम् ॥
उत्तरे मोहवज्रान्तु तन्यशोकधारिणी ।
पीतवर्णा कुबेरस्थाऽन्यसेत् सूर्य्यासना + + ॥
प्रत्यालीढपदा सर्वा + + + + + मूर्द्धज ।
चत्वारो हि घण्टा कोणे कर्त्तव्या पीतसन्निभा ॥
अस्य भावनमात्रेण योगिन्यष्टसमिन्वतम् ।
त्रैलोक्येषु स्थितस्त्रीणा स भर्त्ता परमेश्वर ॥
अथान्यत्सम्प्रवक्ष्यामि चण्डरोषणभावना ।
विश्वपद्मदले देव कल्पयेच्चण्डरोषणम् ॥
वामदेवमग्नेदग्नौ रक्तवर्णन्तु नैऋत्ये ।
पीतम्वै कामदेव तु श्यामा माध्विक्षरामक ॥
वायव्ये कृष्णवर्णं तु कोङ्गासुरसञ्ज्ञकम् ।
कत्तिकर्पककरा चैते संस्थितालीढपादतः ॥
भवत पश्चिमे देवी स्थिता वै पर्णशावरी ।
अस्यैव ध्यानयोगेन दग्धमत्स्यादिपूजया ॥

. . . .

पीतया प्रज्ञया युक्त वामे च श्वेतपद्मया ।
नील वैचण्डरोष तु रक्तया रक्तयाथवा ॥

. . ... .

तावद्विभावयेद्गाढं यावत् प्रस्फुटता व्रजेत् ।

गतन्तु प्रस्फुटो योगी महामन्त्रेण सिध्यति ॥

In my Nep. Cat of the year 1915, pp 92-94, mention is made of a commentary on the Candamaharosana Tantra by Mahāsukhavajra. The MS is dated N.S. 417 = A.D 1297 The commentary is entitled Padmāvatī Mahāsukhavajra is mentioned in the Tengur.

For a Tibetan translation of the Text see Beckh, p 83, para. 42

85.

9965 **एकल्लवीरचण्डमहारोषणतन्त्र** *Ekallavīra-Canda-mahārosana-Tantra.*

Substance, Nepalese paper 11½×2½ inches Folia, 83 Lines, 5 on a page Extent in ślokas, 1200 Character, Newari Date, N S 435 Appearance, fresh Complete

Last Colophon —इत्येकल्लवीराख्ये श्रीचण्डमहारोषणतन्त्रे देवतासाधनपटल पञ्चविंशतिम ।

Post-Colophon Statement —इत्येकल्लवीराख्ये श्रीचण्डमहारोषणतन्त्रे देवतासाधनपटल पञ्चविंशतितम ।

ये धर्म्मा हेतुप्रभवा, etc , etc

शुभमस्तु ॥ सवत् ४३५ मिति ।

See the preceding number

86

9981. **चण्डमहारोषणतन्त्र ।** *Candamahārosana Tantra*

The first and the last leaves of a MS of scorched palm-leaf—dated N S 531 = A D 1411

सवत् ५३१ मार्गशिरशुद्धि श्रीचण्डमहारोषणतन्त्र सम्पूर्णमिति ।

श्रीकाष्ठमण्डपनगरे श्रीकोत्तिपुण्यमहाविहारादिवासितश्रीरविचन्द्रेण लिखितम्

यथादृष्टं तथालिखितञ्च लेखिका नास्ति दोषाय नूनाधिकाक्षर वा तत्सर्व्वं साधनीयं महज्जनैः ।

एतत्तन्त्र प्रयत्नेन मया कष्टेन लेखितम् । शुभमस्तु सर्व्वसत्त्वानाम् ।

Then commences another treatise on Śāntika and Paustika

87.

10844. **एकल्लवीरचण्डमहारोषणतन्त्र ।** *Ekallavīra-Caṇḍa-Mahāroṣaṇa-Tantra.*

Substance, Nepalese paper 7×2¾ inches Folia, 26 Lines, 5 on a page Extent in Slokas, 200 Character, Newari Appearance, fresh

Last Colophon —इत्येकल्लवीर नाम चण्डमहारोषणतन्त्र समाप्तम् ।

ये धर्म्मा etc

88

10711. A **श्रीचण्डमहारोषणसाधनम् ।** *Srī Caṇḍa-Mahā-Roṣana Sādhanam*

Substance, Nepalese paper 10×3 inches Folia, 107 Lines, 5 on a page Extent in Slokas, 1000 Character, modern Newari Date, N S 963 Appearance, fresh Complete

Beginning —ॐ नम श्रीचण्डमहारोषणाय ।

अथात प्रवक्ष्ये तन्त्रराजस्तु राजेश्वर इतिसिद्धैकवीर (कारवीर) निर्गततन्त्र चण्डमहारोषण प्रथम तावत् मन्त्री ध्यानालय एकवृक्षे श्मशाने वा शून्यागारे सर्व्वदा चय गिरिकुहरे गह्वरेषु नदीतीरेषु स्रगमेषु एकलिङ्गेषु गुहाया वा साधयेत् मन्त्री महाधिप प्रथमं तावत् गुरुबुद्धबोधिसत्त्वान् त्रिरत्नशरणागमनादिक कृत्वा दृढचित्तमुद्धरेत् ।— प्रथमं भावयेत् मैत्री द्वितिय करुणाम्भिभावयेत् तृतिय मुदितासमायुक्त चतुर्थं उपेक्षा विशेषत चतुर्ब्रह्मविहारानिति ।

तत[ ]पथिव्कोरन मन्त्र (?)

ॐ वज्रवेतार किलये ॐ फट् ॥ पूर्व्वं ॥ ॐ वज्रकाकाणवन्धये ॐ फट् ॥ दक्षिण ॥ ॐ वज्रचण्डमहासेन मूर्द्धानास्फोटय स्फोटय ग्रस ग्रस ॐ फट् ।

8A श्रीएकल्लवीराख्य—(कल्लवीलाख) इति सिद्धैकल्लवीरोद्धृत्य श्रीचण्ड-महारोषणसाधनम् समाप्तम् ।

10A, इति कल्लवीरस्य प्रथम परिच्छेद । 11A, इत्येकल्लवीरस्य चकार परिसूचनार्थो दितिय परिच्छेदः , 13A, इत्येकल्लवीरस्य ललितक्रिडार्थग्रहण-परिच्छेदस्तृतीय , 14B, इत्येकल्लवीराख्यवाह्यविचारेण चतुर्थपरिच्छेदः ; 26A, इति श्रीसिद्धैकल्लवीलप्रतिभेदान्तरे सहजाभिरास नामाभिसमय समाप्तम् ।

अचलाभिसमय' प्रसिद्ध । शुभम् ।

Post-Colophon Statement —ये धर्म्माः etc., etc

सवत् वह्निऋतुग्रह माघे कृष्णे पञ्चमे तिथे रविवारे सिध्यता शुभम् ।

यथाशास्त्रोक्तं फलं प्राप्तम् ।

89

9992 **चतुष्पीठनिबन्धः ।** *Catuspīthanibandha*

Substance, seasoned palm-leaf 20″×2′ Leaves by counting, 8 The leaf marks have disappeared Character, Newari of the 12th century

Colophons —

3B इति प्रकरणं गुह्यपीठतन्त्रे प्रथम पटल. ॥ ० ॥ इति चतुष्पीठनिबन्धे गुह्यपीठे प्रथमः पटल ।

6A. इति प्रकरणं + + + + पीठ समाप्तम् ॥ ० ॥ इति चतुष्पीठनिबन्धे योगपीठं समाप्तम् ॥ इदानी गुह्यपीठमाह ।

The leaf marks given in one of the blanks left for the holes to the right and left of the centre, are not reliable They are generally given by venders without much thought

It begins —नमो रत्नत्रयाय ।

विद्युज्जिह्वा महाभीमा सर्व्वाशापरिपूरका[] ।

तान्नमस्कृत्य वक्ष्येऽहं साधनोपायिकाम्बरा ॥

भगवत्या खेदाम्बुजाया कल्पोक्तविधिना प्रविष्टमण्डलाभिषेकविद्यालब्धस्य मन्त्रिणा जपविधिमारभ्यते ॥ प्रथमन्तावत् मन्त्रिणो कल्प-

यप्रतिपालनान्मद्विप्रतिहार्य्यादि महोत्साहिना ॥ .
मनात्मवान् राजादिसम्पदान्यतने सिद्धिनिष्पादनाध्येषणानुक्तो सुनि-
श्चितचेतसा सर्व्वं दन्द्व सहिष्णुना ॥ अखिन्नमानसेन वाह्याध्यात्मिक-
शौचाचारे समन्वितेन प्रज्ञापारमितादिसद्धर्म्मवाचनोद्यतेन पर्व्व-
ताराम्नोद्यानश्मशानपद्मसरनदीपुलिनविहारालयगुहादिष्वथवा म-
नोऽनुकूले स्थाने मृद्गोमयादिरुपलेपनम् ॥ यभूमि कल्पयेत् ॥
तत्राय विधिक्रमो, निशा तृतीयावसानकालसमये शयनादुत्थाय
त्रैयध्विकाकाशधातुनिष्ठधर्म्मधातुपर्य्यवसानव्यवस्थितेभ्य सर्व्वबुद्ध-
बोधिसत्त्वेभ्य सर्व्वान्तिमभाव विनिर्यातयेत् । प्रणमेत् ततो द्वाद-
शाक्षरमन्त्रेणाङ्कुशमुद्रयात्मान पञ्चसु स्थानेषु रक्षा विदध्यात् । तेन
बहिर्भूम्यादिक गच्छेत् रात्रौ दक्षिणाभिमुखो दिवा चोत्तराभि-
मुखो भवेत् । तत कृतशौचस्तु स्नानपञ्चाङ्गप्रक्षालन वा कुर्य्यात्
ततो देव्या उदकाञ्जलित्रय निवेद्य देवगृह यायात्, सम्यक्लिप्त-
कुसुमाभिकीर्ण मण्डलके देव्या पटप्रतिमस्यान्यतमस्याग्रत स्वभा-
वेन भगवती ध्यात्वा रक्ताम्बरधरो सर्व्वोपकरणोपेत प्रतीच्यादि-
मुखोदङ्मुखो वा सर्व्वलोकधात्वास्थितसर्व्वबुद्धबोधिसत्त्वप्रत्येक-
बुद्धार्य्यश्रावकादीन् भावतो नमेत् ॥ ततो भगवती नत्वा त्र्यञ्जलि
शिरसि निधायैव वदेत् रत्नत्रयं मे शरण सर्व्वपाप प्रतिदेशयाह
अनुमोदे जगत्पुण्य बुद्धबोधौ दधे मन । तथैवाञ्जलि कृत्वा विशुद्धि-
मन्त्रमुदीरयेत् । सप्तवार नम समन्तबुद्धाना ॐ सर्व्वविशुद्धिधर्म्म ॥

Here the first leaf ends The second leaf however does not tally with it

The text of the Original Catuspitha Tantra has been described in Cam Cat p 197 The commentaries to the text have been described in my Nep Cat 1915, Catuspitha Sādhanasamksepa in p 7, Catuspīthaloka in p 12, and Catuspīthanibanda, i e the commentary under notice in p 7

For a Tibetan translation of the Text, see Beckh p 82, para 39.

90.

8063. **चर्य्याचर्य्यविनिश्चयः ।** *Caryācarya Viniścaya*

A collection of Buddhist songs in Bengali, with a Sanskrit commentary

Substance, modern Nepalese paper, white on one side and yellow on the other Pages, 96 Lines, 20 22 on a page Bound in book-form Character, Nāgara in a Newari hand Appearance, fresh Ends abruptly in the commentary of the 50th song

See my printed edition of the work in the volume entitled *Hājāra Bachare purāna Bāngālā Bauddha Gānao Dohā* This is a copy of the palm-leaf MS on which the printed edition is based It contains 50 songs written by twenty different poets between A D 950 and 1200 Most of these poets are known from the Tengur, Tantrika Section The accompanying Sanskrit commentary does not explain the words, but the inner meanings of the songs according to the Sahajia tenets of Buddhism

91.

9961 **कृष्णयमारितन्त्र ।** *Kṛsna-yamāri-Tantra*

Substance, Nepalese yellow paper 11½×2½ inches The last four leaves are of smaller size—11½×2 inches Folia, 26 Lines, 5-7 on a page Extent in ślokas 450 Character Newari Appearance, fresh Copied from an original dated N S 500 = A D 1380 Complete

Last Colophon —श्रीकृष्णयमारितन्त्रराजः समाप्तः ।

Post-Colophon Statement —

व्योमानन्दनगाङ्कमौलिरदने (?) नेपालसम्वत्सरे
चैत्रे पञ्चसिते फणीन्द्रदिवसे वारे महो(हि)नन्दने ।
श्रीमत् कृष्णयमारितन्त्रममलञ्चिन्तामणीव प्रद
सत्त्वार्थाहितचेतसा सुलिखित तत्त्व मया श्रद्धया ॥

लिखितमस्ति श्रीजिनरत्नमहास्थविरपरमगुरोश्चरणाम्बुजसेविकेन श्रीषडक्षरीमहाविहारीयभिक्षुश्रीधर्म्मरक्षितेन । इति शुभमस्तु ॥

Mahāsthavira Vanaratna is known from Tengur

There is no Tibetan translation of the Text in Beckh But Cord has translations of many commentaries in p. 159 (ff)

Beginning —

एव मया श्रुतमेकस्मिन् समये भगवान् सर्व्वतथागतकायवाक्चित्त-सर्व्ववज्रयोषितभगेषु विजहार । मोहवज्रयमारिणा च पिशुन-वज्रयमारिणा च ईर्ष्यावज्रयमारिणा च द्वेषवज्रयमारिणा च मुद्गरयमारिणा च दण्डयमारिणा च पद्मयमारिणा च खड्गयमा-रिणा च । वज्रचर्च्चिका च । वज्रवाराही च वज्रसरस्वती च वज्रगौरी चाकोला— एव प्रमुखै महायमारिसमै अथ खलु भगवान् वज्रपाणिं वज्रसत्त्व सर्व्वतथागताधिपतिमामन्त्रयामास । अथ खलु भगवान् खवज्रेत्यादेशङ्कर द्वितीयोऽथ शब्द । सर्व्व-मारनिकृन्तनवज्र नाम समाधि स्वकायवाक्चित्तवज्रयोनिश्चारया-मास ।

चन्द्रवज्रप्रयोगेन भावयेद्यमघातकम् ।
मारागा प्रशमनार्थाय द्विषोपद्रुते सर्व्वत ॥
रक्षार्थं भावयेद्वज्र पञ्चरश्मिसमाकुलम् ।
वज्रेण भूमिबातश्च प्राकार पञ्जर तथा ॥

अथ खलु भगवान् सर्व्वतथागतजनकसर्व्वमारविध्वसनवज्र नाम समाधि समापद्येद सर्व्वमाह ।

वज्रयमार्य्यादिबीज स्वकायवाक्चित्तवज्रयोनिश्चारयामास ।

यमध्ये ह्रे स मे द य च नि रा जा स ही व गा यो नि र ।
रेफस्यादियमश्च स्यात् ह्रेकारे मोह उच्यते ॥
मकारे पिशुनमेवाहुं सकारे रागमेव च ।
दकारेऽपि च ईर्ष्या स्याद्यमश्च पञ्च कीर्त्तिता ॥
यकार मुद्गर स्यात् चकारे दण्डनायक ।
निकारे पद्मपाणिश्च राकारे खड्गवानपि ॥
जाकारे चर्च्चिका प्रोक्ता वाराही च सकारके ।
सरस्वतीचह्रीकारे वकारे गौरिका स्मृता ॥

गयोनिरचतुःकोणे चत्वार कीरका मताः ।
खवज्रमध्ये गतं चिन्तेत् विश्ववज्र भयानकम् ॥
यमान्तकस्य मध्यस्थ भावयेत् कालदारुणम् ।
पूर्वारे मोहवज्रं तु दक्षिणे पिशुनमेव च ॥
पश्चिमे रागवज्र तु ईर्ष्याख्यमुत्तरे तथा ।
कोणवज्रचतुःशूले चर्च्चिकाद्या विभावयेत् ॥
द्वारवज्रचतुःशूले मुद्गराद्या विभावयेत् ।
विश्ववज्रचतु कोणे चत्वारो नृकमस्तकाः ॥

अथ खलु भगवान् सर्व्वतथागताधिपति यमारिवज्र नाम समाधिं समापद्येद महाद्वेषकुलमन्त्रमुदाजहार । ॐ ह्रीः स्त्रीः विकृतानन ऊ ऊ फट् फट् स्वाहा ।

अथ खलु भगवान् सर्व्वतथागताधिपतिर्मोहवज्रमन्त्रमुदाजहार । ॐ जिन जिक ॥

अथ खलु भगवान् सर्व्वतथागताधिपतिः पिशुनवज्रमन्त्रमुदाजहार ॐ रत्नधृक् ।

अथ खलु भगवान् सर्व्वतथागताधिपतिः रागवज्रमन्त्रमुदाजहार ॐ आरोलिक ॥

In this way it goes on giving the *mantras* of Īrsyāvajra, Mudgaravajra, Dandavajra, Padmavajra, Khadgavajra, and their Śakties Vajra-Carcikā, Vajra-Vārāhī, Vajra Sarasvatī, Vajra-Śaurī, and Kāyavākcittādhiṣthāna mantra, in short, the mantras of all the associates of Bhagavān, named in the beginning

Next come the Dhyānas of some of the deities, of much iconographic interest

I Yamāri

त्रिमुख षड्भुज क्रुद्धमिन्द्रनीलसमप्रभ ।
पाणौ वज्रं प्रभावित्वा यमारिं भावयेद्बुधः ॥

II Mohavajra

त्रिमुखं षड्भुज शान्त स्वच्छविम्बसमप्रभ ।
पाणौ चक्र विभावित्वा मोहवज्र विभावयेत् ॥

III Piśunavajra

त्रिमुख षड्भुज पुक्त तप्तचामीकरप्रभ ।
पाणौ रत्न विभावित्वा पिशुनवज्र विभावयेत् ॥

IV Rāgavajra

त्रिमुख षड्भुज वश्य पद्मरागसमप्रभ ।
पाणौ पद्म विभावित्वा रागवज्र विभावयेत् ॥

V Īrsyāvajra

त्रिमुख षड्भुज सर्व्व मरकतोत्पलसन्निभं ।
पाणौ कोष विभावित्वा ईर्ष्यावज्र विभावयेत् ॥

Here ends the first Patala

4A, सर्व्वतथागतकायवाक्चित्तकृष्णयमारिरहस्यातन्त्रेऽभिषेकपटल प्रथम ।
तथ खलु भगवन्त सर्व्वतथागता भगवन्त महावज्रसत्त्व स्तुवन्ति स्म ।

The second Chapter gives hymns to the deities

5B, ०महामण्डलपटलो द्वितीय ; 6A, कर्म्मयोगपटलस्तृतीय , 10A, ०चतुर्थ पटल (entirely devoted to mystic diagrams, a specimen of which is given below)

8A श्मशानकर्पटे चक्रद्वय लिखेद्व्रती ।

राजिकालवनेनापि विषेण निम्बकेन च ॥
त्रिकटुक कटुतैलश्च श्मशानाग्निमेव च ।
धत्तूरकपत्रनिर्य्यासैश्चण्डवीजैस्तथैव च ॥
तज्जैनीरक्तमादाय चित्रकस्य रसेन वा ।
ऊषरस्य मृत्तिका गृह्य चण्डालाङ्गिकाञ्जन ॥
बुभुक्षितमष्टलेखन्या चतुर्द्दश्या लिखेद्व्रती ।
मध्याह्ने क्रूरचित्तेन दुष्टाना बन्धहेतुना ।
नाम सत्त्वविघातस्य ऊकारेण विदर्भयेत् ॥
दक्षिणाभिमुखो योगी आत्मान यमघातक ।
क्रोधरूप महाचण्ड खण्डमुण्डविभूषितम् ॥

महिषस्थं ललज्जिह्वं वृहदुदरं भयानकं ।
कडारोर्द्ध्वजूटकेशं वक्रभ्रूश्रुभुवं तथा ॥
दक्षिणेन महावज्रं खड्गं चैव द्वितीयकम् ।
तृतीये कर्त्तिहस्त च इदानीं वामतो लिखेत् ॥
चक्रञ्चैव महापद्म कपालञ्चैव वामत. ।
मूलमुखे महाभृग दक्षिणे चन्द्रसुप्रभं ॥
वाम रक्तनिभं प्रोक्त वज्राभरणभूषितं ।
रोमकूपमहाविवरा स्फोरयेत् स्वकुलाधिप ॥
प्रत्यालीढपदसंस्थ सूर्य्यमण्डल उद्धतः ।
विकृतदंष्ट्राकरालास्यं कल्पज्वालाग्निसन्निभं ॥
एवमात्मान सन्नह्य साध्य' वै पुरतो न्यसेत् । etc , etc.

11A, ०चक्रानुपूर्व्वलिखन नाम पञ्चम पटलः ,

12A, चक्रावलोकनो नाम षष्ठः पटल. ,

11B अथ मन्त्रं प्रवक्ष्यामि सर्व्वभूता बलिक्रिया ।
उच्चारिते महामन्त्रे सर्व्वभूतप्रकम्पनम् ॥

इन्द्राय क्रीः यमाय ध्री वरुणाय वि कुवेराय क्ष ईशानाय त अग्नये ध नैऋत्ये न वायव्ये न चन्द्राय ऊं अर्काय ऊं ब्रह्मणे फट् वसुधारायै फट् वेमचित्रिणे स्वा सर्व्वभूतेभ्य. हा । हा हा ह्री ह्री ह्रुं ह्रुं हे हे स्वाहा ।

कृत्वा मण्डलिका व्यस्ता विषमुन्ततोयमिश्रिते ।
देवताः प्रीणयेद्योगी हाहाकार पुनः स्मरेत् ॥

13B, आकर्षणादिप्रयोगपटल सप्तम' ।

The Saktis of the different Yamāris

12B, त्रिमुखा षड्भुजा शुक्ला चक्रहस्ता शशिप्रभा ।
चर्चिका भावयेत् प्राज्ञो रक्षाकृष्टिप्रयोगतः ॥
त्रिमुखा षड्भुजा घोणा वज्रहस्ता सुनीलका ।
वाराही भावयेत् प्राज्ञो मद्याकृष्टिप्रयोगत' ॥
त्रिमुखा षड्भुजा रक्ता सरस्वती भावयेद्व्रती ।
पद्महस्तधरा सौम्या प्रज्ञावर्द्धनहेतवे ॥

त्रिमुखा षड्भुजा खर्व्वा मरकतोत्पलसन्निभा ।
शौरिं भावयेत् प्राज्ञो शुभाद्दष्टिप्रयोगत ॥

14B, ०होमविधिपटलोऽष्टम॰, 15B, ०यमारिभीमा नाम नवम-पटल॰ ।

15A ब्राह्मणस्य तु मासेन चितिभस्मेन तन्मृदा ।
यमारिप्रतिमा कुर्य्यात् द्विभुजमेकवक्त्रिणम् ॥
दक्षिणेन महावज्र-सव्ये न्तृशिरस्तथा ।
शुक्लवर्णं महाभीम तेन दुष्टान्निकृन्तयेत् ॥
प्रतिदिन वलि दद्यात् पञ्चमासान्तरेण तु ।
नित्य यत् प्रार्थयेद्योगी मम शत्रुं निकृन्तय ॥
इत्युक्त्वा सप्तरात्रेण प्रत्यूषे म्रियते रिपु ॥

16A, वेताड (वेताल?) साधनानुस्मृतिभावनापटलो दशम, 17B, चर्य्यासमयसाधनपटलएकादशम', 18B, सर्व्वौपायिकविशेषको नाम द्वादशः पटल, 19B, सिद्धिनिर्णयपटलस्त्रयोदशम', 22A, ०मञ्जुवज्रसाधनो नाम चतुर्द्दशपटल,

It begins —अत्रेदं सूत्रपाठेन परमसमय ।
अकारो मुख सर्व्वधर्म्माणामाद्यनुत्पन्नत्वात् ॥
शिष्य वैलोचन ध्यात्वा श्रीयमान्तकरूपवान् ।
ज्ञानसूत्रवराग्राय पातयेत् सुसमाहित॰ ॥

तत्रेदं महामण्डलप्रवेशसमय ।
मण्डलद्विगुणतो दीर्घंद्वारविंशतिक ।
पञ्चगव्यसमाक्षिप्त सूत्र बुद्धै प्रकल्पितम् ॥

तत्रेद महावज्रप्रार्थनासमय ।
अहो बुद्धमहाचार्य्यौ अहो धर्म्मंगणः प्रभुः ।
देहि मे समयं तत्त्व बोधिचित्तञ्च देहि मे ॥

तत्रेद महाभूपरिग्रहसमयः । वज्रपृथिव्यावाहनम् ।
त्व देवि साक्षिभूतासि सर्व्वबुद्धान तायिना ।
चर्य्यानयविशेषेषु भूमिपारमितासु च ॥

20B, प्राणातिपातिनो ये च मत्स्यमांसादिभक्षकाः ।
मदिराकामिनीसक्ता नास्तिकव्रतधारिणः ॥
अनभिषिक्ता नरा ये च उद्ध[त ?]व्यसनकारिणः ।
ग्रामजालरता ये च यमारितन्त्रपरायणा ॥
सिध्यन्ते नास्ति सन्देहः कृष्णस्य वचन यथा ॥
अथ ते मैत्रेयप्रमुखा सर्व्वबोधिसत्त्वा ।
वज्रनिरुक्तिपद श्रुत्वा तुष्णीं स्थिता अभूवन ॥

23A, ०वज्रानङ्गसाधनम् पञ्चदशमपटल ।

22B, अथातो रहस्य वक्ष्ये समासान्न तु विस्तरात् ।
येन विज्ञातमात्रेण अप्सराकर्षण भवेत् ॥
द्विभुजमेकवक्त्र तु इक्षुकार्म्मुकपाणिन ।
पीतदेह महारूप वज्रानङ्ग विभावयेत् ॥
पूर्व्वेण [च] रति ध्यायात् दक्षिणे मदनसुन्दरी ।
पश्चिमे कामदेवी तु उत्तरे मदनोत्सुका ॥
सर्व्वासा कामदेवीना कार्म्मुकं भावयेत् शरम् ।
पीता रक्ता तथा श्यामा शुक्लरक्ता च भावयेत् ॥
कोणे चैव न्यसेन्नित्यमनिरुद्धमुषापतिम् ।
वसंतं मकरकेतुञ्च द्वारि भागे प्रकथ्यते ॥
कन्दर्पदर्पक चोक्तं स्मरं वाणायुधं तथा ।
सर्व्वेषा देवताना तु यमन्न मूर्द्धि भावयेत् ॥
स्त्रीणा खगमुखान्तस्थ वज्रानङ्ग विभावयेत् ।
सीत्कारमन्त्रसम्भूत विस्फुरन्त समन्तत ॥
वाञ्छिता विह्वला ध्यात्वा वेधमाना मदोत्सुका ।
पादयोः पतिता चैव रक्तवस्त्रपरावृता ॥
मन्त्रञ्चैव जपेत्तत्र ॐकार स्वरभेदितम् ।
स्वाहा अन्त ततो दत्त्वा सीत्कारमन्त्रमुच्चरेत् ॥
अमुकी मे वशीभवतु भावयेत् सप्तवारकम् ।
वाञ्छिता[ं] लभते योगी कृष्णस्य वचन यथा ॥

23B, ०तैलकसाधनपटलः षोडशः ,

25B, ०बोधिचित्तनिगदनपटलः सप्तदशः ,

26B, ०कथापटलः सप्तदशमः ।

The work ends —

इदमवोचत् गुह्यकाधिपतिर्वज्रकुलप्रणेता नकाटकुरसन्य सम्पन्नो महातन्त्रराजश्चोड्डियानविनिर्गत सपादलक्षादुद्धृत समाप्त ।

Last Colophon —कथापटलोऽष्टादशम ।

92.

10744 सेकोद्देशटिप्पनी । *Sekoddeśa-Tippanī*

By SĀDHUPUTRA ŚRĪDHARĀNANDA

Substance, coloured palm leaf 12×2¼ inches Folia, 10 Lines on a page, 7/6 Extent in slokas 370 Character Newari of the early 13th century Appearance old and discoloured Complete Remarkably correct and accurate

Beginning —ॐ नम श्रीकालचक्राय ।

सर्वाकृतिर्विमलशून्यमयीव माता
अद्वैतशान्तरसपूर्णतनुर्विमुक्त ।
मूर्त्या यया जनयतेऽभिजन जिनाना
तस्यै नम. सहजयोगविशुद्ध मान्ये (?)
श्रीगुरोश्चरणाम्भोज प्रणम्य स्मरणाय मे ।
लिख्यते तत्प्रसादेन सेकोद्देशस्य टिप्पनी ॥

इह खलु श्रीधान्यमहाचैत्यनानातन्त्रश्रवणार्थिभिरध्येषित श्रीशा-
क्यसिंहो भगवान् मन्त्रमहायान देशयत स्म ।
तत्र दशभूमीश्वरमहाबोधिसत्त्वचर्याणिनिर्म्मितशरीर सुचन्द्रो
राजा परमादिबुद्धद्वादशसाहस्रमहातन्त्रे भगवन्तमध्येषयति स्म ।
तथाहि भगवद्व्याकरणम् ।

बोधौ स्थान महाबोधि प्रज्ञापारमितानये ।
नियत देशकस्थान गृध्रकूटो महागिरि ॥

मन्त्रामन्त्रनये प्रोक्तं स्थानं श्रीधर्म्मधातुकम् ।
लोकधात्वादि सम्बुद्धे बुद्धाना अध्ववर्त्तिनाम् ॥
यद्दैभाषिकसूत्रान्तधारणी कल्पदेशना ।
स्थान नैक जिनस्योक्त मध्यसत्त्वाशयेन तत् ॥
गृध्रकूटेऽपि मैत्रेय प्रज्ञापारमितानयम् ।
बुद्धो मन्त्रनय शुद्ध श्रीधान्ये देशयिष्यति ॥

इति वचनाद्भगवत श्रीधान्य एव मन्त्रनयदेशना । अन्यदेशे पुनर्यत्तत्राधिमुक्तोजनस्तदभिप्रायेन दशभूमीश्वरमहाबोधिसत्त्व संगीतिकारोऽन्यो वा तत्तत्रदेशना विस्तरेण करोति ।

सुचन्द्र इति … … सेक इत्यादि … . .
.. भगवानिति … . आयाममिति …
तत्र अपर इति महानिर्द्देश,—

So this is a good old manuscript of a standard work of the Mantrayāna

End —सेकोद्देशस्य टिप्पन्या यदलम्भि शुभं मया ।
लिखनाद् तेन [स]यायात् वज्रसत्त्वपदञ्जन ॥
सेकोद्देशटिप्पनी समाप्ता ।

Post-Colophon Statement —

कृतिरिय साधुपुत्रपण्डित श्रीधरानन्दस्य ।

For a Tibetan translation of the commentary, see Cordier page 16, and for that of the Text see Beckh, p 72, para 2

93.

4756A **ताराबोधय उत्पातकथा ।** *Tārābodhaya Utpāta-Kathā*

Substance, Nepalese paper 11 x 2¾ inches Folia 20 Lines, 5 on a page Extent in ślokas, 200 Character Newari Date N S 819 Appearance, discoloured Complete

Beginning —ॐ नमो लोकेश्वराय ।

श्रीमत्पोतलके रम्ये लोकनाथ प्रपृच्छति ।
मानवानां हितार्थाय तारादेवी महाकृपा ॥
उत्पातरत्नमस्यापि शुभाशुभपरिच्छया ।
देशयस्व कृपासिन्धो विधिना महसा प्रभो ॥
लोकेश्वराह ।
शृणुतात्र प्रवक्ष्यामि उत्पातशान्तिकक्रमम् ।
पश्चिमकालयो लोका पापाचारि भवन्ति हि ॥
इत्यादि ।

Colophon —इति श्रीतारबोधये उत्पातकथा समाप्त ॥ सवत् ८१६ ।

94.

3855 **वज्रावली नाम मण्डलोपयिका ।** *Vajrāvalī nāma Mandalopāyikā*

By ABHAYAKARA GUPTA

Substance, seasoned palm leaf 13×2¼ inches Folia, 123, of which 72 is twice marked. Lines, 6 on a page Character, Newari of the 12th century Appearance, mouse-eaten Complete The last leaf is a restoration on paper

The leaves are marked with letter numerals on the left and figures on the right Both sides agree up to 88, then letter numerals increase by one till 118 What should be leaf 119 is marked 116 in letter numerals and 118 in figures, and the mistake is continued to the end

See Bendall's Cambridge Catalogue, p 197

Beginning नम श्रीवज्रसत्त्वाय ।

वन्दे श्रीकुलिशेश्वर स्मरतरे मारभवारे पदम्
क्रोधो धावति दिक्षु मङ्गलगिरो गायन्तु वज्राङ्गना ।
श्रीमद्वज्रभृतो महिम्नि जगदाधातुन्महामण्डले
निष्प्रत्यूहमिहाभयस्य महसा वज्रावली मीलतु ॥

अस्तवह्निर्वज्रभृतेव वज्र परम्पराभिर्ध्रियता ह्वदीयं
यज्ज्योतिरन्तस्तिमिरं निरस्य श्रीवज्रभृन्मूर्त्तिमती बिभर्त्ति ॥

Object of the work

मण्डलादि विधिः शास्त्रविस्तृत' कमलोदये ।
सङ्क्षिप्तमिह [सु] व्यक्तं ब्रूम' शुकक्रियं क्रमात् ॥
क्रिष्वाचार्य्यग्र'थितप्रक्रियास्वा
पूर्णत्वं न प्रस्तुतत्व स्फुटोक्तिः ।
क्वापि क्वाप्याम्नाततो युक्तता चे-
त्यस्माभि स्तत्तद्गुणैर्मण्डितेयम् ॥

इह हि दुःखजानाद्यविद्यादिदासपरम्परावद्धबुद्धीन् दुर्व्वारकर्म्मोर्म्मिप्रेरणया प्रायशोऽपायत्रेषु गतिद्वयेषु च गम्भीरसंसारसरिदावर्त्तेऽतिदुस्तरे प्रतिमुहुर्न्निमज्ज्योन्मज्जन + म्भिविश्राममस्वतंन्त्रास्तनुभृतः परमकृपाप्रणयात् समुद्धर्त्तुमुच्चरे· प्रथममार्गाद्युपकरणसन्निधापनादिक्रमतो मनोहरविहारादिक्रियाप्रतिष्ठापनानुष्ठानादिस्वभिषेकश्रुतचिन्तादौ च यथायोगं पुण्यसम्भारे ज्ञानसम्भारे च सम्यगुत्साह्याचार्य्यैर्वाङ्मश्रुत्यमन्त्रनीतिनिपुणधीधैर्य्यमात्सर्य्योत्साहशालिभि' कृपालुभिर्यथाक्रम विहाराद्यर्घ्यार्घ्यादिदानलक्षणं पूर्व्वसेवाप्रयोजनं शिष्यसंग्रहो भूखननं भूशोधन भूमिपरिग्रहो विघ्नकीलन वसुन्धराधिवासन कलसाधिवासनं वसुन्धराधिवासनं देवताधिवासन मण्डलसूत्रणं रजपातनं कलसन्यासो मण्डलसाधन देवताधिवासनं प्रतिमादिप्रतिष्ठा पुष्करिण्यादिप्रतिष्ठा आमारामादिप्रतिष्ठा शिष्याधिवासनं आचार्य्यप्रवेश शिष्यप्रवेशो मालोदकमुकुटवज्रघण्टानामसेका स्त्रिसमयदानं आचार्यश्रीको मन्त्र श्रर्पण अञ्जनं दर्पणसेक· शरक्षेपो गुह्यसेक· प्रज्ञाज्ञानचतुर्थसेका विद्याव्रत वज्रव्रत चर्य्याव्रतं व्याकरणमनुज्ञा आश्वास स्सेको होमो मण्डलोपसंहारो मानसमण्डल वलिः विघ्ननिवारणं वज्र' वज्रघण्टालक्षणं धारणञ्चेति पञ्चाशद्विधयो विधेया ॥

Authorities consulted 21B, नागबुद्धिपाद ; 23B, निष्पन्नयोगावली ; 24B, सम्पुटतन्त्र , 27A, हृत्यानन्दगर्भोदय ; 29B, डाकिनीवज्रपञ्जर ; 32B, विमलप्रभ , 36A, वज्रडाकतन्त्र , 39A, मञ्जुवज्रमण्डलटिप्पनी , 42B, तत्त्वसंग्रह , 43B, भूतडामर , 44B, कालचक्र , 48B, त्रैलोक्य-

विजयतन्त्रे, 54A, अभिधानोत्तरतन्त्र, 58A, अपरञ्चामृतत्रयसा मण्डलेषु चिह्नानि वज्रामृततन्त्रे वेदितव्यानि, 87A, तदुक्तं भगवता सार्द्धत्रिशतिकायाञ्च, 87B, विहता चास्माभिराम्नायमञ्जर्य्यादिषु अन्यत्र च नापश्चि, 89B, विहतमिदमाम्नायमञ्जर्य्या, 104B, बुद्धकपालसम्बरहेवज्रादीना, 109A, डाकिनीवज्रपञ्जरतन्त्र, 110A, योगिनीसञ्चारतन्त्रे, 111A, श्रीसमाजे, दिकल्पतन्त्रे, 112B, कालचक्रे, 112B, सुबाहुपरिपृच्छा, पद्मसुप्रतिष्ठिते च तन्त्रे, 119A, चास्माभि श्रीसम्बरोदयाभिसमयोपायिकाया प्रकटित ।

Topics 5B, इति विहारगन्धकुटीचैत्यावस्थाश्रमार्घविधि, पुष्करिण्याद्यर्घविधि, , 6A, इति प्रतिमाद्यर्घविधि, 7A, इति सर्व्वविधिष्वर्घ्यादिदानलक्षणविधि, 8A, पूर्व्वसेवानियमप्रयोजनविधि, 8B, शिष्यसङ्ग्रहविधि, 9B, भूखननविधि, 10B, भूमिशोधनविधि, 13B, बुद्धबलाक्षेप, 16A, इति भद्रासनम्, 16B, इति कूटकासनम्, इति स्वस्तिकासनम्; 17A, इति भूपरिग्रहविधि, 20A, वसुन्धराधिवासनविधि, 22A, इति कलसलक्षणाद्यवस्था, 25A, इति कलशाधिवासनविधि, 25B, देवताधिवासनविधि, 72 2B, वज्रपातनविधिः, 73A, इति कल्पन्यासविधि ततश्चतुर्दिक्षु मण्डलाद्बहिरार्य्याप्रज्ञापारमितादिसधर्म्मचतुष्टय पाठयितव्यम्, 80A, इत्युदकाभिषेक, इति मुकुटाभिषेक., 80B, इति वज्राभिषेक, 81A, इति आचार्य्याभिषेक गुह्याभिषेक प्रज्ञानावाभिषेक·, चर्य्याभिषेक, 85A, विद्याप्रतिष्ठा, अष्टसूत्रप्रतिष्ठा, प्रतिमादिप्रतिष्ठाविधि, इति पुष्करणीवापीकूपप्रतिष्ठाविधि·, 86A, आकाशादिप्रतिष्ठाविधि, 89A, विशेषतोऽध्येषणा कारयित्वा बोधिचित्तोत्पाद कारयेत्, 90B, इह य सम्बरामाचार्य्यमकर्त्तुमाय दीयते स सामान्य शरणागमनबोधिचित्तोत्पादमात्रलक्षण, यस्त्वाचार्य्य कर्त्तुं दीयते स आचार्य्यसम्बर । पञ्चकुलसङ्गृहीत । अतोऽय सम्बरहृदयदानपूर्व्वक शिष्याधिवासनविधि, 92A, इत्याचार्य्यप्रवेशविधि, 93B, इति समयोदकदानम्, 95B, शिष्यप्रवेशविधि, 96A, मालाभिषेकविधि, 97A, इति मण्डले शिष्यस्य दर्शनात्मक प्रवेश, 98A, इत्युदकाभिषेकविधि, 98B, मुकुटाभिषेक, 99A, वज्राभिषेकविधि, घण्टाभिषेकविधि, 100A, नामाभिषेकविधिः, 100B, घण्टासमय, 101A, इति त्रिसमयदानविधि, 101B, इति मन्त्र-

समर्पणविधिः, इति अञ्जनविधिः; 102A, इति दर्पणाभिषेकविधिः; इति शरक्षेपविधिः; 103A, इति गुह्याभिषेकविधिः; 104B, वज्रव्रतविधिः; 106B, चर्य्याव्रतदानविधि; इति व्याकरणविधि; 111B, इति स्वस्त्या-भिषेकविधि; इति साम्नायः सपरिकरोऽभिषेकविधिः; 113B, इति ज्योति मञ्जरी होमविधेय; 114B, इति मण्डलोपसंहारादिविधि· एवमयं लेख्य-मण्डलविधि ; 115A, इति मानसो मण्डलविधि ; 115B, इत्यमृतसाधनम्; 117B, सार्व्वभौतिकबलिविधि; 119A, सार्व्वभौतिकबलिमन्त्र; 120B, इति हेवज्रिक्रसार्व्वभौतिकबलिविधिः; 121A, इति विघ्ननिवारणविधि। महा-पण्डिताभयाकरगुप्तरचिता वज्रावलीनाम मण्डलोपयिका समाप्ता ॥

The detailed description of *Bodhicittotpāda*

89. विशेषतोऽध्येषणा कारयित्वा बोधिचित्तोत्पादं कारयेत्। समन्वा-हरन्तु मा बुद्धाः बोधिसत्त्वा अहममुकनामा इमा वेलामुपादाय यावदाबोधि मण्डनिषदनादुत्पादयामि परम बोधिचित्तमनुत्तरं।

यथा चैयधिका नाथाः सम्बोधौ कृतनिश्चया।
त्रिविधा शीलशिक्षाञ्च कुशलं धर्म्मसंग्रहम् ॥
सत्वार्थक्रियाशीलञ्च प्रतिगृह्णाम्यह दृढम्।
बुद्धं धर्म्मञ्च सङ्घञ्च त्रिरत्नाग्रमनुत्तरम् ॥
अद्याग्रेण गृहिष्यामि (?) सम्बर बुद्धयोगजम्।
वज्रघण्टाञ्च मुद्राञ्च प्रतिगृह्णामि तत्त्वत ॥
आचार्य्यञ्च गृहिष्यामि महावज्रकुलोच्चये।
चतुर्द्दान प्रदास्यामि षट्कृत्वा तु दिने दिने ॥
आमिषाभयसधर्म्ममैत्रीबुद्धकुलोच्चये।
महारत्नकुले योगे समये च मनोरमे ॥
सद्धर्म्मं प्रतिगृह्णामि वाह्य गुह्य त्रियानिकम् ॥
महापद्मकुले शुद्धे महाबोधिसमुद्भवे।
सम्बर सर्व्वसंयुक्तं प्रतिगृह्णामि सर्व्वत ॥
पूजाकर्म्म यथाशक्ति महाकर्म्मकुलोच्चये।
उत्पादयित्वा परम बोधिचित्तमनुत्तरम् ॥

गृहीत्वा सम्वरं कृत्स्न सर्व्वसत्त्वार्थकारणात् ।
अतीर्णान् तारयिष्येहममुक्तान् मोचयाम्यहम् ॥

अनाश्वस्तानाश्वासयिष्यामि सर्व्वसत्त्वान् स्थापयिष्यामि । निर्व्वृत्ता चेति वार-त्रयं पाठयन् (विवृतमिद आम्नायमञ्जर्य्या) ततोऽमृतकुण्डलीमन्त्रेणारक्ष्य तेषा हृतकण्ठशिरसि वज्रपद्मचक्रोपरि सूर्य्यचन्द्रस्थानि वा कृष्णरक्तशुक्लानि । हूं आ' उं अक्षराणि चिन्तयित्वा तानुच्चारयन् कृतकण्ठशिरासि गन्धोदकवज्रयुक्तेन सव्यमुष्टिना संस्पृश्य शिरसि पुष्प अग्रे धूप दीपञ्च हृदये पुनर्गन्ध दद्यात् ।

There are twenty-seven mandalas treated of in this book in full detail, therefore it is called Mandalanpayika.

(1) 53B, सम्वरमण्डले तु, (2) 54A, अतो मञ्जुवज्रमण्डले, (3) 55A, पिण्डीक्रमोक्तमण्डले; (4) 55B, सम्पुटतन्त्रोक्तवज्रसत्वमण्डले; (5) 56A, नागडाकिन्या मण्डले, (6) 56B, सप्तदशात्मकस्य हेवज्रत्रयस्य मण्डले; (7) 57A, षोडशभुजस्य तु मण्डले, (8) 57B, नैरात्माया मण्डले; (9) 57B, एव कुरुकुल्लामण्डले, (10) 57B, वज्रामृतमण्डले, (11) 58A, अपरवज्रामृतत्रयस्य मण्डले, (12) 58A, महामायामण्डले, (13) 58B, नवात्मक बुद्धकपालमण्डले; (14) 58B, वज्रहूंकारमण्डले, (15) 59A, सम्वर-मण्डले, (16) 59B, पञ्चविंशत्यात्मकबुद्धकपालमण्डले, (17) 60A, योगा-म्बरमण्डले, (18) 60B, यमारिमण्डले, (19) 60B, वज्रतारामण्डले, (20) 61A, मारीचिमण्डले, (21) 61B, पञ्चरक्षाया मण्डले, (22) 61B, वज्रधातुमण्डले, (23) 62B, त्रिचत्वारिंशदात्मकमञ्जुवज्रमण्डले, (24) 67A, दुर्गतिपरिशोधनीमण्डले; (25) 67B, भूतडामरमण्डले, (26) 69A, षट्-चक्रवर्त्तीमण्डले, (27) 70A, कालचक्रमण्डले ॥

Vajrávali means a row of conventional figures of thunder-bolt, which are to be found everywhere among the Buddhists in Nepal

The detailed description of *Caryāvrata*

104B, ततो बुद्धकपालसम्वरहेवज्रादीना अन्यतमष्टतमन्त्रेण खट्टाङ्गपद्म भाजनानि निर्जपित्वा ॥

गृह्ण दत्तमतो वीर खट्टाङ्ग डमरुपात्रकम् ।
श्रीचक्रसत्त्वमुद्रेय वहिरण्यात्मसस्थितेति ॥

गाथा पठन् ग्राहयेत्। तन्त्रान्तरोक्तम्वा खट्वाङ्गादिभ्यो चर्य्याङ्गं तत्तचक्र प्रज्ञन्मन्त्रमन्त्रित गृह्णेत्यादिना ग्राहयेत् तथाच श्रीसमाजे।

जटामुकुटधरं विम्बं सितवर्णनिभं महत्।
कारयेद्विधिवत् सर्व्वं मन्त्रसम्बरसम्वृतम्॥

कन्दमूलफलैः सर्व्वं भोज्यं भक्ष्य समाचरेत् इत्यादिना विद्याव्रतसमादानेन कर्त्तुञ्चर्य्याव्रतमुक्त॥ यातु योषित पुरुषो वा चर्य्याव्रतं याचते ता वज्रवाराहीरूपा नैरात्मारूपा पुष्पपातानुरूपकुलदेवतारूपा वा पुरुषन्तु श्रीसम्बर हेवज्राद्यन्यतमरूप विचिन्त्य तस्या तस्मिन् वा।

हूंबीजमयुखैरानीता कुलदेवता प्रवेश्य।
अक्षोभ्यश्चक्रिरूपेण अमिताभ कुण्डलात्मकः।
रत्नेशः कण्ठमालाया हस्ते वैरोचनः स्मृतः।
मेखलाया स्थितो अमोघ इत्युक्तैर्यथाक्रमम्॥

चक्रीकुण्डलकण्ठिकारुचकमेखला अक्षोभ्यामिताभरत्नसम्भववैरोचनामोघसिद्धिरूपा झटिति विचिन्त्य तत्र तन्मुद्रागतत्त्व तथानीत प्रवेश्याक्षोभ्यादिपरिणताचक्रादिमुद्रा अक्षोभ्यादिस्वभावा एवेत्यधिमुच्य ॐ धर २ धारय २ मर्द्द ३ वज्रधृक् फट स्वाहेति मन्त्रेण त्रिजप्ता चक्रीन्तस्या स्तम्भ वा शिरसि गृह्णेत्यादि गाथा स्त्रीपक्षे वारेति पाठे देवीति निक्षिप्य पठन्नारोपयेत् ॐ वज्रधर मक्षाय (?)न्त्र ऊलु३ स्वाराजित फट् स्वाहेति त्रिर्जप्त कुण्डलद्वय कर्णयोः ॐ वज्रसूर्य्यो तमो[illegible]धमनसमयज्ञमर रत्नदत्त फट्स्वाहेति त्रिर्जप्ता कण्ठकाया ग्रीवाया ॐ प्रायन परमशाशन ए[illegible]द्रि निर्घातक फट् स्वाहेति विर्जप्त रुचकद्वयं करयो कुर्य्यात् ॐ फट् ++ प्रज्ञाहृत्स्वाहेति त्रिर्जप्ता च मेखला श्रोणौ देयात्यनन्तरं [illegible] वा यथाक्रम चक्रिन अक्षोभ्यरूपिणमिति वागुच्च कुण्डलमिति। रत्नसम्भवकण्ठिकामिति [illegible] अमोघसिद्धि सिद्धिमेखलमिति प्रतिपाद्य गृह्णेत्यादिना पठेत्। या तु स्त्री पुरुषो वा [illegible]दिमामर्थ्य [illegible] [illegible]नादातुमिच्छति [illegible] [illegible]

शोधननिति । वज्रवाराही मूलमन्त्रेण सर्व्वबुद्धेत्यादिमन्त्रेण वा विन्यस्य कण्ठिका यदुक्तं वज्रवाराही यन्मन्त्र कण्ठकण्ठिकामण्डितमिति ॐ हन मद्दि स्वाहा हुं गोपट् ऐं ॐ श्रीं फट् ऊं इति विन्यस्य रुचकादय यदुक्तं षड्भि कवचस्य वीरेण मुद्रेय गात्रशोभनेति । ॐ वं एं यों हूं मों क्षं क्ष्रीं हूँ २ फट् फडिति निर्माता मेखला यदुक्तं षड्योगिन्येति मन्त्रेण मेखलाकृतभूषणमिति ॐ श्री वध ऐं २ कृत हूं २ फट् डाकिनीजालसम्बर स्वाहेति विन्यस्य परिधानस्य व्याघ्रचर्म्म यदुक्तं सर्व्वबुद्धस्य डाकिनस्य चर्म्माम्बरधरा परा इति ॐ प्रचण्ड हूं फडित्यादिभि । ॐ रुधिप्रिये ऊं २ फडित्यन्तै पट् त्रिंशता मन्त्रै विन्यस्य ज्ञानामृतपानपात्र पानी यदुक्तं सर्व्वचक्रस्य योगिन्यो मत्तमाणकरोटकमिति खट्वाङ्गडमरु ॐ भगवन् मूलमन्त्रेण त्रिरभिमन्त्र्य गृह्णे इत्यादिगाथया श्रीसम्वरस्य मूलमन्त्रेण विन्यस्य अक्षसूत्र कण्ठावलम्बितहारामालालम्बितभरणवच्च वीरकेशकृतमुकुटी द्विनिष्टनकचधारी भक्तकेयूरं नुपुर घुंघराव स्वस्थाने । यदुक्तं ॥

मूलमन्त्रस्य यद्वीर ब्रह्मसूत्रादिकल्पितमिति ।

तच्चैकयावल्या ब्रह्मसूत्र कर्त्तव्य । अष्टभिरावलीभिर्म्मेखला सैव स्त्रीकण्ठा षोडशभि पञ्चविंशत्याहार यदुक्तं ।

एकयष्टि भवेत् सूत्र मेखला त्वष्टयष्टिका ।
रसना षोडशा ज्ञेया पञ्चविंशत्तु मालिनमिति ॥

अथवा न्यनरत्नमय(?) केशकृत वा ब्रह्मसूत्र अत्र चक्रादिक यथायोग अस्थि घटितमाभरण वच्याणि तदेक शिखाया । तदुक्तम् ।

पञ्चाङ्गुलकपालखण्ड कृत्वा मुकुट्या श्रियत इति ।

अन्यानि कर्णग्रीवाहृद्गुह्यभुजाभरणस्थानि यथाशोभमानानि षट्त्रिंशन्मन्त्रा मूलमन्त्रौ वा अस्माभि श्रीसम्वरोदयाभिसमयोपयिकाया सम्वर्णितौ वीरचर्य्याव्रतमेव यौवराज्यव्रतचर्य्यातिवज्रकपालीचर्य्याव्रतमिति चोक्तं श्रीसम्पुटतन्त्रे तदनु पञ्चमुद्रादिक पूजयेदिति चर्य्या व्रतदानविधि ॥

110A, पञ्चज्ञानमयबोधिचित्तव्रत एव अत्यन्त नियोजयितु वज्रव्रत बोधिचित्तास्व न विना चर्य्ययेति शिक्षणाय चर्य्याव्रत तस्य त्रय· प्रकाराः । तत्राद्य अध्यात्ममुद्रात्रयनियोजनपर । तथाचोक्तं ।

खट्टाङ्गदेवतामूर्त्तिप्रज्ञातमस्तकल्पितमिति मन्त्रयानकरोटकमिति च। देवता-शरीरमनाहतरूपचण्डालीनादोऽदयमहासुखानुभवाश्रयतान्वितबोधिचित्त चेति त्रयप्रतिपादिकं द्वितीय। पञ्चविशुद्धधर्म्मधातुज्ञानादिजननियोजनपरोयोगिन्या-चर्य्याव्रतनिच(?)तृतीयसत्वादृष्टिचतुष्टयाभिज्ञादिशक्तौ सत्वार्थसम्पादनपरस्य लोक-वहिर्भूतस्य योगिनो योगिन्या वा अध्यात्मतमत्ताभरणादितसमर्थनपर शून्यतोप-करुणामयबोधिचित्तोदयनियोजनं। तथाचोक्त योगिनीसञ्चारतन्त्रे॥

प्रथमं समाहितो योगी भक्तिमुत्पाद्य यत्नत।
पश्चादुत्पन्नचामर्थ्यो व्रतचर्य्यां समेश्चितम्॥
पञ्चवर्णसमाचार एकवर्णन्तु कल्पितम्।
निर्विकल्पकचित्तात्मा भुञ्जीत कामपञ्चकम्॥
एव श्रीहेरुकज्ञानी सर्व्वाशापरिपूरक।
करोति स महाप्राज्ञो चर्य्यज्ञानसुव्रतम्।
चर्य्याव्रतप्रवृत्तस्य ज्ञेयं योगसुनिश्चितम्॥

इति त्रैधातुकव्यतिवर्त्ति धर्म्मतावेगमक्रमयोग्यक्त इत्युद्दीपयितु व्याकरणम्॥

On the blank side of the first leaf we have the following

क्रिया चित्तमयराज भूतडामरतन्त्र॥
चर्य्या वैरोचनाभिसम्बोधितन्त्रादि॥
योग तत्त्वसग्रहादितन्त्र॥
योगोत्तर समाज तन्त्रादि॥

योगनिरुत्तर सम्बरोदय डाकिनीवज्रपञ्जर डाकार्णव अभिधानोत्तरादय इति योगिनीतन्त्र॥

95.

4835 **वज्रावली नाम मण्डलोपायिका।** *Vajrāvalī nāma maṇḍalopāyikā*

By Abhayākara Gupta

Substance seasoned palm-leaf 12×2½ inches Folia 1 to 96 Lines 7 on a page Extent in Slokas 3200 Character, Bengali of the 12th century Appearance old and soiled

See the previous number

The last Colophon —

सवित्तरन्तु घण्टावज्रप्रभेदाना जन्मगादिकमाम्नायमङ्ग्यमिभिहित-
मिति वज्रवधघण्टालक्षणादिविधि ।

Then we have the following verse —

इति परममुनीना वागुदन्वत्यगाधे
श्रुतिमपि न परीयु केपि केपि श्रवन्ते ।
सकृपमतिमहिम्नाऽस्माभिरन्तर्निमज्ज्या-
मृतमिदमुपनीत प्रीतये ते भजन्ताम् ॥
सुकृतमुदितमुच्चैर्व्योतिरन्तर्व्यगाधत्
प्रकृतमिह महिम्नामाकरस्यास्तु ताम्या । (?)
विरमतु मम वज्रप्रेयसी सर्म्मधाम्नि
त्रिभगदभयमर्त्तुर्मण्डले विश्वमूर्त्ते ॥

२५० ॥ महापण्डिताभयकरगुप्तविरचिता वज्रावली नाम मण्डलोपयिका समाप्ता ॥

The figure 250 may be a date, but then why should a book copied in Bengal have a newari date? The handwriting of the MS agrees pretty nearly with Cam Cat Plate II b, *i e* end of the 12th century

96.

4732 **कालचक्रावतार** *Kālacakrāvatāra*

By ABHAYĀKARA GUPTA

Substance, seasoned palm leaf 12×2 inches Folia 7 Lines, 7 on a page Extent in Ślokas, 250 Character Bengali Date Saka 1047 Appearance, old and discoloured Complete

Beginning — ॐ नमो मञ्जुश्रिये ।

प्रज्ञादयाद्वैतमसीमधर्म्मं विश्रान्तितिम्बिभदकल्परूप ।
नीरूपरूपादिमय शरीर जैन निजं सार्व्वजनं नमामि ॥

याम्यम्बरस्य श्रियमादधन्ति सम्पद्विपत्ती च निवेदयन्ति ।
तथागताभ्यन्तरिव स्फुरन्ति ज्योतींषि तान्यद्य तमो जयन्ति ॥

इह हि मात्सर्य्योपहतैस्तीर्थिकैर्ज्योतिषे सिद्धान्त गुप्तीकृत्य बहुप्रपञ्च लघु-करणं कृतमपीदानीं न ज्ञायत इति तत्प्रतिपाद्यते । त्रिषष्ठ्यधिक शतचतुष्टय लिख-नीयं । शुक्लप्रतिपदादिचैत्रमासादिवर्षं यदा स्यात् तदानेन तन्मिश्र कार्य्यं । तद्द्व्यशीतिशतेन शुद्ध वर्षध्रुवकं भवति । इत्यादि ।

End —एवञ्च वार-तिथि-नक्षत्र-योग-करण-राशि-क्षेपि संक्रान्ति । ग्रहाणां फलमन्यत्र सुगममिति नेह प्रतन्यत इति ।

उदितमिदमुदानं ज्योतिरेतत् फल न
प्रथितमिह हि तन्त्रे कालचक्रेऽवतीर्य्य ।
गमयतु पदबन्धं निर्व्विबन्धं सुबुद्धि
सुखमिति रचितेऽस्मिन् क्षन्तुमर्हन्ति सन्तः ॥
विरचितिरियमभयस्य प्रविचयपदवी तनोतु हृदयस्य ।
उदिततमः सुकृतञ्च त्रिजगति जिनसम्पदः फलन्तु ॥

Colophon —इति कालचक्रावतारः समाप्तः । कृतिरियं पण्डिताभयाकर-गुप्तपादानामिति । चन्द्रः प्रतिमासन्त्रयोदशराशीश्चरति । सूर्य्य एकराशि । राहोर्म्मण्डलदिनानि ६६०० मङ्गलस्य ६८७ वुधस्य ७८७ गुरोः ४३३२ शुक्रस्य २२४७ शनैश्चरस्य १०७६६ । सिद्धान्ते सूर्य्यस्य मण्डलदिनानि ३६५ दण्ड १६ पाणीपल(?) ४ प्रत्यह भोग द ४ पाद २६ ॥ चन्द्रस्य मण्डलदिनानि २७ दं ४२ प्रत्यह भोगो द ५८ पाद ३० राहोस्तिथिदिन भोगः पा १४ श्वासार्द्ध १ मङ्गलस्य द ३ पा २१ श्वा २ वुधस्य पा ११ गुरोः पा २२ श्वा ३ शुक्रस्य ४३ श्वा १ शनैश्चरस्य पा ८ केतोः प्रत्यहं द ३४ पा २६ सूर्य्यादधिकसार्द्ध लिप्तं दय लि २ ॥ शकाब्दा १०४७ शकाब्दे रुद्र मिश्रयित्वा षष्ठिभागेन शेषः प्रभवादिज्ञातव्यो वह्न्यृत्वद्वौ प्रक्षेपाय । यथेमम सम्वत्सरे प्रभवादि वर्षाणि ३८ अलेखिय श्रीघनश्रीमित्रेणः । (?)

97.

8827 बुद्धकपालतन्त्रटीका । *Buddhakapala-Tantra-Tika*

By Abhayākara Gupta

Substance [illegible] palm-leaf. 11 × 2 inches. Folia 69. Lines 6 on a page. [illegible] 1620. Character Newari of the 12th century. Appearance old and worm-eaten. Complete.

The last Colophon —

इति पण्डितस्थविराभयकरगुप्तपादानामिति ॥ ३

Post Colophon —

सपादयोऽग्रश्लोकशती सत्पण्डिता प्रमा ।
पण्डितैर्मण्डनायास्या प्रमेत्र द्दि वास्तवीति ॥

This is a commentary on the Buddhakapālatantra by Abhayākara Gupta. The text has not yet been found out, for a Tibetan translation of which, however, see Beckh, p. 82, para. 85, where it is called बुद्धकपाल नाम योगिनीतन्त्रराज. For a Tibetan translation of Abhaya's commentary, see Cord., p. 107. Abhayākara Gupta finished this commentary at Vikramaśīlā in the 25th year of Rāmapāla Deva.

The colophon of the 14th paṭala and the subsequent lines run thus :—

पण्डिताभयकरगुप्तकृतायामभयपद्धत्या श्रीबुद्धकपालमहातन्त्रटीकाया चतुर्दश. पटल. समाप्त ।

श्रीमद्धेरुकवीरवर्त्मविहृतेरुच्चैरुदञ्चच्छुभा
